CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

क्र.सं.१३६

संकल्परत्नावली

स्व० पण्डित हरिनाथ प्याकुर्‍याल

ऋद्धि-सिद्धि शैक्षिक केन्द्र, ठमेल, काठमाडौं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

क्र. सं. 936



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

कक्ष 936

संकल्परत्नावली

नाम

जप दान पाठ व्रतादि नानाकृत्य संकल्प
परिपूर्ण पुरोहितकर्मोपयुक्ताऽऽवश्यक
विविधविषययुतकर्मकाण्डपुस्तकम् ।

—: ० :—

नेपालदेशीय प्याकुर्याालोपनामक
कौण्डिन्य कुलोत्पन्न
पण्डित हरिनाथशर्म संगृहीता

कि 1
9366 (1377)

—: ० :—

साच
तदादेशानुसारात्तदात्मजेन
पं० ऋद्धिनाथ शर्मणा प्रकाशिता
(पुनर्मुद्रणाधिकारः प्रकाशकस्यैव)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MD

प्रकाशक :

योगनाथ प्याकुर्याल

ऋद्धिसिद्धि शैक्षिक केन्द्र
ठमेल, काठमाडौं।

२०४० लक्ष्मीपूजा
द्वितीयवारम् : १००० प्रति

मूल्य : २०/०० रु०

मुद्रक :
शिवशंकर प्रसाद
दीपक प्रेस
एस० १७/२७२, नदेसर, वाराणसी कैण्ट।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri; Funding: MI

भूमिका

कर्मबोधकानि शास्त्राणि श्रुतयः स्मृतयो गृह्यसूत्राणि निवन्धाः पुराणानि तन्त्राणीत्यनेकानि विद्यन्ते तेषु च कर्मवोधकेषु केन कस्य प्रमाण्यं प्रधानीकृत्य तद्वोधितानि कर्माण्यऽनुष्ठेयानीत्यऽपरिज्ञाय कर्तव्यं कर्मैव नोपादातुं शक्यते। अतोऽत्र स्वस्वगृह्यसूत्राऽनुसारेणैव कर्माण्यऽनुष्ठेयानीति प्रथमं निर्णीय कोमलमतीनां द्विजोत्तमानां पुरोहितकार्यपथप्रदर्शनाय तनीयसोऽस्य सन्दर्भस्याऽऽविर्भूतत्वेन प्रायः प्रचलिता एवाऽऽवश्यका विषया अलेखिषत।

व्रतपूजादानादिषु च कर्मसु सङ्कल्पमन्तरेणाऽऽरम्भस्यैवाऽसम्भवेन, संकल्पस्य च प्रतिकर्मविभिन्नस्वरूपतया, सङ्कलितसङ्कल्पकदम्वकस्य पुस्तकस्य विरहेण, शास्त्रीयां व्युत्पत्तिं विना ऽपेक्षितसंकल्पकल्पनायां स्वयमक्षमतया, पौरोहित्यप्रवृत्तानां वहूनामुपस्थितस्य गहतः प्रत्यूहस्या ऽपाचिकीर्षया, संकल्परचनायामपेक्षितान्विषयांस्तेषां व्युत्पत्याधानायोदाहरणरूपेण प्रचलितान्पाठजपदानव्रतप्रायश्चित्तादीनां कतिपयान् पृथक् पृथक् संकल्पान्प्रदर्श्य प्रवन्धस्य नामापि संकल्पप्राचुर्येण 'सङ्कल्परत्नावली' त्याऽऽधाय सन्दर्भोऽयं समारम्भि मन्ये च सन्दर्भमेनं सम्यक् पर्यालोचयतां प्रचलितेषु सङ्कल्पेषु निरावाधमववोधः-स्यादिति। पुरोहितकृत्यशिक्षायै लब्धजनुषोऽस्य सन्दर्भस्य नामा ननुगुणोपि कतीनांचित्प्रयोगाणां प्रसक्ताऽनुप्रसक्ततया लेखोऽपि न विरोधमावहति।

अत्रच पाठे—सप्तशती संपुट ग्रहस्तोत्रादीनां, अभिषेके—रुद्री लघुरुद्र्यादीनां, जपे—ग्रहाणां योगिनीनां, वैदिकतान्त्रिकमंत्रोल्लेखपुरःसरं संकल्पाः; दाने—द्रव्यदेवता प्रार्थनाश्लोकप्रतिग्रहस्थानादि दानोपयोगिविषयप्रदर्शनपूर्वकं, गोदान तन्मूल्यदान ग्रहवस्तुदान आमान्नदान वेद अष्टादशपुराण महाभारत रामयणादिपुस्तकदान दशदानादि शय्यादान पञ्चवलिदानादीनां प्रचलितानामन्येषां वहूनाञ्च दानानां संकल्पः; पूजायां—दीपगणेशादीनां संक्षिप्तपूजाप्रयोगाः, कलशस्थापनं, अर्घसंस्थापनं, उपचारभेदाः, सर्वदेवसाधारणा वैदिकास्तान्त्रिकाश्चोपचारसमर्पणमंत्राः, पुष्पादिसमर्पणे विधिनिषेधादयश्च संगृहीताः। अतः संभावये पाठाऽभिषेकजपदानपूजाधाऽऽवश्यकंकृत्यमितो निर्वहेदिति।

श्राद्धविषये—मृतानां कर्माधीनजनुषां विभिन्नजातिदेशानामत्र पुत्रादिभिर्दत्तं पिण्डजलादिकं कथमुपतिष्ठते, मुक्तानां च शरीरविरहात्पिण्डादिभिः कथमुपयोग इत्यादि वितर्कगोचरा विषयाः सुवोधेन लेखेन यथामति विशदी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

कृताः । प्रायः सर्वासां श्राद्धपद्धतीनां सौलभ्येन श्राद्धभेदप्रदर्शनादि पूर्वकं प्रकृतिभूतपार्वणश्राद्धाऽवान्तरकर्मप्रतीकाः सुवर्णश्राद्धस्य प्रयोगः, कर्तृभेदाच्छ्राद्धभेदाच्च । विभिन्नानामामान्नदानादीनां पार्थक्येन संकल्पाः, मलमासमृतोद्देश्यकमासिकवार्षिकादिनां सोदाहरणा निर्णयाश्च लिखिताः । **तत्तत्कर्मोपयोगितया**—कर्मपात्रनिर्माणं, स्वस्तिपुण्याहवाचनाऽभिषेकमंत्राः, मधुपर्कप्रयोगः, दैवपित्र्यकर्मणिप्रसाददानमन्त्राः, अश्वत्थतुलस्यादीनां नमस्कारमन्त्राः, द्रव्यादिमानं, पञ्चरत्नादिस्वरूपाणि लिखितानि । **अवश्यज्ञेयाः**—यज्ञोपवीतरचनादिप्रकारः नामकरणविवाहरजोदर्शनग्रहणयात्रासमयकृत्यसम्बन्धिनः कतिपये विषयाः, अङ्गस्फुरण पल्लीपतनफलादयश्चाऽत्र समाहृताः ।

अयञ्च सन्दर्भः हेमाद्रि, कालमाधव, दानदिनकरोद्योत, त्रिस्थलीसेतु, दानमयूख, दानचन्द्रिका, मिताक्षरा, संस्काररत्नमाला, अनुष्ठानप्रकाश, निर्णयसिन्धु, धर्मसिन्धु, शारदातिलक, पदार्थादर्श, तन्त्रसार, मंत्रमहोदधि, पुरश्चर्यार्णव, मेरुतन्त्र, शान्तिसार, महार्णव, रत्नावली, लघुपाराशरी, शीघ्रबोध, प्रायश्चित्तेन्दुशेखर, कूर्माचलीय वर्षकृत्यदशकर्मादिपद्धतीनां साहाय्येन प्रादुर्भूत ।

प्रभूततरविषयाऽनाकलनविकलया स्वल्पया धिया संकलितेऽत्र सन्दर्भे संभवते, दोषान्संसूचयतां महानुभावानां धन्यवादपुरःसरमात्मनो भ्रान्ति न्यूनाऽधिकभावं च संस्करणान्तरे परिशोधयेयम् ।

सतामनुकम्पाऽऽस्पदं,
कौण्डिन्यकुलोत्पनो
हरिनाथशर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

संकल्परत्नावल्याः

सूचीपत्रम्

अथसङ्कल्पप्रकरणम् ।

पृ०	विषयाः
१	मंगलाचरणादि
२	स्वस्वगृह्यसूत्रानुसारेणैवकर्माणि-अनुष्ठेयानिइत्युच्यते
४	धर्मस्यज्ञापकम्
५	वेदाः
,,	उपवेदाः
,,	अंगानि
,,	स्मृतयः
६	उपस्मृतयः
,,	पुराणानि
,,	उपपुराणानि
७	षट्शास्त्राणि
८	संकल्परचना प्रकारः
,,	संकल्पेवक्तव्याः पदार्था इति कर्तव्यताच
१०	संकल्पवाक्यस्वरूपम्
,,	युगादीनि
११	सम्वत्सराः
१२	अयने
,,	ऋतवः
१३	मासाः
१४	पक्षौ
,,	तिथयः
१५	वाराः
,,	नक्षत्राणि
१६	योगाः
१७	करणानि
१८	करणचक्रम्
१९	ग्रहाः, राशयः
,,	संक्रान्तयः
,,	सूर्यादीनाम्
,,	चन्द्रस्य
२२	गोत्रं, प्रवराः
२४	नाम
२५	फलम्
,,	संकल्प्यंकर्म
२६	कर्मपात्रनिर्माणप्रकारः
२८	चण्डीपाठसंकल्पाः
२९	पुटितपाठप्रकारो मन्त्रभेदेनफलभेदश्च
३०	पुटितपाठेसंकल्पः
३१	शतरुद्रोयेमन्त्राः
३३	शतरुद्रोयपाठस्यफलम्
३३	शतरूद्रोयपाठस्य आवृति भेदेन नामभेदाः
३४	रूद्राऽभिषेकसंकल्पाः
३६	ग्रहाणां स्तोत्रस्य पाठेसंकल्पाः
३७	योगनीनां स्तोत्रस्यपाठे संकल्पाः
३८	जपेसंकल्पाः
,,	ग्रहाणाम्
३९	योगिनीनाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

पृ०	विषयाः
३९	प्रत्यक्षगवीदानस्यसप्रयोगः सं०
४३	नियमलोपप्रायश्चित्तगोमूल्यदान-संकल्पः
४४	चातुर्मास्ये गृहीतनित्यस्नानादि-व्रतलोपप्रायश्चित्त गोमूल्यदान-संकल्पः
४५	व्रताऽऽचरणाऽशक्तौ प्रायश्चित्तानुकल्पगोमूल्यदानसंक०
,,	रोगावस्थाकालिकादि-नियमच्युतिप्रायश्चित्तगो मूल्यदान संक०
४६	भ्रूणहत्याप्रायश्चित्तम्
४७	भ्रूणहत्याप्रायश्चित्तगवादि दा० सं०
४९	उपवासादिव्रते साद्गुण्यफलकगो-मूल्यदानसं०
,,	दुःस्वप्नदर्शने गोमू० दा० सं०
,,	कार्तिकमासगृहीतनियमसाद्गुण्य-फलकगो मू० दान संक०
,,	व्रतनिष्क्रयदान सं०
५०	व्रताऽऽचरणाऽशक्तावा-मान्नदानसं०
५१	विषुवच्छान्त्यर्थतण्डुलदा० सं०
,,	उपवासादिव्रते साद्गुण्य-फलकसोपकरणामान्नदान संक०
५२	ग्रहाणाँ देयानिवस्तूनि
५५	ग्रहसम्बन्धिवस्तुदाने संकल्पाः
५५	सूर्यस्य
५६	चन्द्रस्य
५७	भौमस्य
,,	बुधस्य
५८	वृहस्पतेः
,,	शुक्रस्य
५९	शनैश्चरस्य
६०	राहोः
,,	केतोः
६१	त्रिमधुदानसं०
६३	अष्टादशपुराणमहाभारत रामायणहरिवंशपुस्तक-दानोपयोगिचक्रम्
६५	अष्टादशपुराणादिपुस्तकानां दानस्य सपरिकराः संक०
६७	वेदपुस्तकदानस्यसप्रयोगः
	संकल्पः
	दशदानादीनि
	—: ० :—
६९	दशदानसंङ्कल्पाः
७०	गोदान सं०
७१	भूमिदान सं०
,,	तिलदान सं०
७२	हिरण्यदान सं०
७३	आज्यदा० सं०
,,	वस्त्रदान सं०
७३	धान्यदान सं०
७४	गुडदान सं०
,,	रौप्यदान सं०
७५	लवणदान सं०
७५	दशदानोक्तवस्तूनां युगपद्दाने सं०
७६	दशदानोक्तवस्तूनामभावे तन्मूल्यानां युगपद्दाने संक०
७७	पञ्चधेनुदानसङ्कल्पाः
,,	ऋणाऽपनोदधेनुदा० सं०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पृ० विषयाः

७८ मोक्षधेनुदा० सं०
७८ वेतरणीधेनुदा० सं०
७९ उत्क्रान्तिधेनु० सं०
,, पञ्चधेनूनामभावेतन्मूल्यानांयुग्मपद्दाने सं०

—: ० :—

८० अष्टदानानि (आसन्नमरणस्य)
८१ तिलपात्रदानसंक०
(आसन्नमृत्योः)
,, मंत्रचतुर्थीकरणेआवश्यकता
८२ मंत्रचतुर्थीसिद्ध्यर्थंगोदानं संक०
८३ अकृतव्रतोद्यानस्य तत्सिद्ध्यर्थंगो० सं०

——

८४ घृतच्छायादानस्य सप्रयोगःसंकल्पः
८५ काष्ठपादुकादान सं०
८६ यष्टिदानसंकल्पः
,, छत्रदानसंक०
८७ उपान्नदानसंक०
,, सतूलप्रावरणादिदानसंक०
,, सेन्धनांगारहसन्तिकादानसंक०
८८ इन्धनस्य तन्मूल्यस्य वा दानेसंक०
,, सहिरण्यतिलताम्रपात्रदानसं०
,, अपूपदानसंक० (मलमासे)
९० शय्यादानसंक०
९२ भूमिदान
९३ भूमिदानसंक०
९४ पञ्चवलिदानस्य सप्रयोगः संकल्पः
९५ वलिदानप्रयोगः संकल्पश्च
९८ पूजासामग्रीसंक०

पृ० विषयाः

९९ उपयाचितपूजासं०
९९ लक्षदीपदानसङ्कल्पा
१०१ लक्षवर्तिकासङ्कल्पा
१०२ विष्णुलक्षदीपदान सं०
१०३ देहवर्तिसमर्पणसं०
१०४ जलाशयोत्सर्गसं०
१०५ धर्मशालोत्सर्गसं०
१०५ घट्टोत्सर्गसं०
१०६ घण्टासमर्पणसं०
इतिसंकल्पप्रकरणम् ॥

अथ श्राद्धप्रकरणम्

—: ० :—

१०७ श्राद्धशब्दार्थविचारस्तस्याऽऽवश्यकताच
,, श्राद्धभेदाः
१०८ श्राद्धोद्देश्यता जनकादीनामेव
१०९ पित्राद्युद्देशेनदत्तं पिण्डादिकथं तेषामुपतिष्ठते इति विचारः
११० काश्यादिमरणादिनामुक्तानांश्राद्धंकर्तव्यं नवेतिवि०
११३ पार्वणश्राद्धेतिकर्तव्यतासंग्राहकाश्लोकः
११४ एतेषां श्लोकानां व्याख्यारूपाःश्राद्धकर्मप्रतीकाः
११५ पार्वणश्राद्धसामग्रीसंग्राहकश्लोकाः
११६ सुवर्णश्राद्धप्रयोगः
११८ अपुत्रविधवाकर्त्रीकामान्नदानसंकल्प
१२१ अपुत्रविधवाकर्त्रीकः संक्षिप्तः आमान्नदानसं०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

पृ० विषयाः

१२२ विधवाकर्त्रीकैकपार्वणेऽन्नसंक०
१२३ एकोद्दिष्टश्राद्धेऽन्नसंकल्पः
१२४ क्षयाहस्राद्धेशय्यादानम्
१२६ क्षयाहश्राद्धे शय्यादानसंकल्पः
,, गण्डकमांसमाहात्म्यं
(पित्र्यकर्मणि)
१२७ मलमासमृतस्यमासिकादि
१२८ तत्रउदाहरणानि
१३३ शुद्धमासमृतस्यमलमासे प्रथमाब्दिकम्

इति श्राद्धप्रकरणम्

१३५ अथविविधविषयप्रकरणम्
(पृ० २६)

—: ० :—

कर्मपात्रनिर्माणम्
स्वस्तिवाचनम्
१३६ यजुर्वेदीयम्
१३७ ऋग्वेदीयम्

—: ० :—

१३८ पुण्याहवाचनम्
१४० मधुपर्कः
दीपगणेशादिपूजा
१४४ दीपपूजा
१४५ गणेशपूजा
,, कलशस्थापनम्
१४९ अर्घस्थापनम्

———

उपचारभेदाः
१५० पञ्चोपचाराः
,, सप्तोपचाराः
,, दशोपचाराः

पृ० विषयाः

१५० द्वादशोपचाराः
,, षोडशोपचाराः
१५१ अष्टत्रिंशदुप०

———

१५२ उपचारसमर्पणे सर्वदेवसाधारणामंत्राः
,, वैदिकामंत्राः

——

१५४ पञ्चामृतस्नाने.
,, उपचारान्तरसमर्पणे.

—: ० :—

१५५ स्मार्तामन्त्राः
१६० कर्मेश्वरार्पणं अच्छिद्रप्रार्थनाच
१६१ निराहारव्रते जलेनपारणस्य प्रकारोऽच्छिद्रप्रार्थनासहितः
१६३ व्रतोद्यापनम्
१६४ हरितालिकाव्रतम्
१६६ ऋषिपञ्चमीव्रतम्
१६७ नवरात्रव्रतम्
,, सत्यनारायणव्रतम्
१६८ इष्टदेवताव्रतम्
,, कोजागरपूर्णिमाव्रतम
१६९ सोमवती अमावास्याव्रतम्-
,, अनन्तनारायणव्रतम्
,, प्रदोषव्रतम्
१७० शिवरात्रिव्रतम्
,, पूर्णिमाव्रतम्
१७१ कृष्णाष्टमीव्रतम्
,, रामनवमीव्रतम्
१७२ एकादशीव्रतम्
१७२ श्रीपञ्चमीव्रतम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पृ०	विषयाः
१७३	वैकुण्ठचतुर्दशीव्रतस्य
१७४	कोजागरव्रतस्य
१७५	अभिषेकः
,,	अभिषेकमन्त्राः
१७८	दैवकर्मणितिलकपुष्पादिप्रसाद-दानेमत्राः
१८०	पित्र्यकर्मणितिलकपु०नेमन्त्राः
१८१	पञ्चरत्नादीनांस्वरूपम्
,,	पञ्चरत्नानि
,,	पञ्चपल्लवाः
१८२	पञ्चाऽमृतम्
,,	पञ्चगव्यम्
,,	सर्वौषधयः
,,	सप्तमृदः
,,	सप्तधान्यानि
,,	मधुपर्कः
,,	सौभाग्यद्रव्याणि
१८३	ताम्बूलम्
,,	मुखवासम्
,,	यक्षकर्दमः
,,	उद्वर्तनद्रव्याणि
,,	अर्घेनिक्षेप्यंवस्तु
,,	पाद्यनिक्षेप्यंवस्तु
१८४	आचमनीयेनिक्षे०
,,	शस्यधान्यादयः
,,	साष्टाङ्गनमस्कारः

—:०:—

१८४	अश्वत्थतुलस्यादीनांनमस्कारमन्त्राः

पृ०	विषयाः
,,	अश्वत्थस्य
,,	तुलस्याऽ
,,	कुशस्य
,,	शमीवृक्षस्य
१८५	धात्रीवृक्षस्य
,,	बटवृक्षस्य
,,	दूर्वायाः

—:०:—

ग्रहाणांमत्राः

१८६	तान्त्रिकाः
,,	सूर्यस्य
१८७	चन्द्रस्य
१८८	भौमस्य
१८९	बुधस्य
१९०	वृहस्पतेः
१९०	शुक्रस्य
१९१	शनैश्चरस्य
१९२	राहोः
१९३	केतोः

—:०:—

वैदिकाः

१९६	सूर्यस्य
	सोमस्य
१९७	भौमस्य
,,	बुधस्य
,,	वृहस्पतेः
,,	शुक्रस्य
१९८	शनैश्चरस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

पृ०	विषयाः
१९८	राहोः
,,	केतोः
	योगिनीनांमन्त्राः
१९९	पिङ्गलायाः
२००	मङ्गलायाः
,,	भ्रामर्याः
२०१	भद्रिकायाः
,,	धन्यायाः
२०२	सिद्धायाः
,,	उल्कायाः
२०३	सङ्कटायाः
,,	विकटायाः
२०४	द्रव्यदेवताः
२०६	प्रतिग्रहस्थानानि
२०८	प्रतिग्रहप्रकारः
२०९	प्रार्थनाश्लोकाः
	(द्रव्याणां)
	द्रव्यादिमानम्
२२२	सुवर्णस्य
,,	रजतस्य
२२३	ताम्रस्य
,,	धान्यानाम्
२२४	द्रवद्रव्याणाम्
,,	भूमेः
२२५	पञ्चगव्यरचनाप्रयोगः
२२६	आशौचिनःसन्ध्यादि

पृ०	विषयाः
२२७	आमिषाणि
२२९	हविष्याणि
२३१	यज्ञोपवीतरचनाप्रयोगः
२३३	यज्ञोपवीतप्रतिष्ठाप्रयोगाः
२३४	यज्ञोपवीतधारणप्रयो०
२३६	यज्ञोपवीतधारणेविशेषः
२३८	रक्षावन्धनपूजा
२४०	यात्रासमयकृत्यं
२४४	नामकरणविषये किंचिदुच्यते
२४६	बिवाह विषये किंचिदुच्यते
,,	कन्याकीदशीविवाह्या ?
२४७	सापिण्ड्यविचारः
२४९	तत्रोदाहरणानि
२५१	नाडीषट्काष्ठविचारः
	—:०:—
,,	रजोदर्शनविषये किंचिदुच्यते
२५५	ग्रहणविषये किंचिदुच्यते
२६०	देवविशेषणवर्तितन्तुविशेषः
२६१	तत्र अञ्जनस्नेहविशेषेण
	फलविशेषः
२६२	पुष्पाद्यर्पणे विधिनिषेधौ
२६४	अङ्गस्फुरणे फलम्
२६५	पल्लीपतने फलम्
	इतिविविधविषयप्रकरणम् ।

Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मंगलाचरणादि

यो ऽनीहमानस्संकल्पात्तनुते कल्पनामयम् । जयद्वन्दे तमीशानं संकल्पज्ञानसंविदे ॥१॥ धाम्नो-ऽग्न्यात्तपसां वभूव तनयाद्धातुर्वशिष्ठात्कुलं नाना शाख-मभूच्च तत्र महितः कौण्डिन्यनामा मुनिः । तद्गोत्रे हरिनाथशर्मविबुधो नेपालदेशेऽभवत् तेनेयं ग्रथिताऽऽ-शुशिक्षणकरी संकल्परत्नावली ॥२॥ संकल्पाः प्रति-कृत्य मन्यरचना इत्थञ्च सौकर्यतो विद्वांसो रचयन्ति तानिति नृणां येषां न शिक्षालवः । पौरोहित्यविधौ न पक्वमतयो ये तर्षतः सत्वरास्तेषां मार्गनिदर्शनार्थ मयमाऽऽरम्भो न धीगौरवात् ॥३॥ अर्थे भूरितरप्रचा-रपथगे सद्भिर्जनैःसम्मते नापेक्षागिरि साक्षिणामिति मया नोदाहृता साक्षिगीः । सङ्कल्प प्रचुरत्वतोऽस्य बिहितं सङ्कल्परत्नावली नामेतिप्रकृतो विचार इह संत्यक्तुं कथं शक्यते ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

पृ०	विषयाः
१९८	राहोः
,,	केतोः
	योगिनीनांमन्त्राः
१९९	पिङ्गलायाः
२००	मङ्गलायाः
,,	भ्रामर्याः
२०१	भद्रिकायाः
,,	धन्यायाः
२०२	सिद्धायाः
,,	उल्कायाः
२०३	सङ्कटायाः
,,	विकटायाः
२०४	द्रव्यदेवताः
२०६	प्रतिग्रहस्थानानि
२०८	प्रतिग्रहप्रकारः
२०९	प्रार्थनाश्लोकाः
	(द्रव्याणां)
	द्रव्यादिमानम्
२२२	सुवर्णस्य
,,	रजतस्य
२२३	ताम्रस्य
,,	धान्यानाम्
२२४	द्रवद्रव्याणाम्
,,	भूमेः
२२५	पञ्चगव्यरचनाप्रयोगः
२२६	आशौचिनःसन्ध्यादि

पृ०	विषयाः
२२७	आमिषाणि
२२९	हविष्याणि
२३१	यज्ञोपवीतरचनाप्रयोगः
२३३	यज्ञोपवीतप्रतिष्ठाप्रयोगाः
२३४	यज्ञोपवीतधारणप्रयो०
२३६	यज्ञोपवीतधारणेविशेषः
२३८	रक्षावन्धनपूजा
२४०	यात्रासमयकृत्यं
२४४	नामकरणविषये किंचिदुच्यते
२४६	बिवाह विषये किंचिदुच्यते
,,	कन्याकीदृशीविवाह्या ?
२४७	सापिण्ड्यविचारः
२४९	तत्रोदाहरणानि
२५१	नाडीषट्काष्ठविचारः
	—:०:—
,,	रजोदर्शनविषये किंचिदुच्यते
२५५	ग्रहणविषये किंचिदुच्यते
२६०	देवविशेषणवर्तितन्तुविशेषः
२६१	तत्र अञ्जनस्नेहविशेषेण
	फलविशेषः
२६२	पुष्पाद्यर्पणे विधिनिषेधौ
२६४	अङ्गस्फुरणे फलम्
२६५	पल्लीपतने फलम्
	इतिविविधविषयप्रकरणम् ।

Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मंगलाचरणादि

यो ऽनीहमानस्संकल्पात्तनुते कल्पनामयम् । जगद्वन्दे तमीशानं संकल्पज्ञानसंविदे ॥१॥ धाम्नो-ऽग्न्यात्तपसां वभूव तनयाद्धातुर्वशिष्ठात्कुलं नाना शाख-मभूच्च तत्र महितः कौण्डिन्यनामा मुनिः । तद्गोत्रे हरिनाथशर्मविबुधो नेपालदेशेऽभवत् तेनेयं ग्रथिताऽऽ-शुशिक्षणकरी संकल्परत्नावली ॥२॥ संकल्पाः प्रति-कृत्य मन्यरचना इत्थञ्च सौकर्यतो विद्वांसो रचयन्ति तानिति नृणां येषां न शिक्षालवः । पौरोहित्यविधौ न पक्कमतयो ये तर्षतः सत्वरास्तेषां मार्गनिदर्शनार्थ मयमाऽऽरम्भो न धीगौरवात् ॥३॥ अर्थे भूरितरप्रचा-रपथगे सद्भिर्जनैःसम्मते नापेक्षागिरि साक्षिणामिति मया नोदाहृता साक्षिगीः । सङ्कल्प प्रचुरत्वतोऽस्य बिहितं सङ्कल्परत्नावली नामेतिप्रकृतो विचार इह संत्यक्तुं कथं शक्यते ॥४॥



पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

अथ सङ्कल्पप्रकरणम् ।

स्वस्वगृह्यसूत्राऽनुसारेणैव कर्माणि अनुष्ठेयानि इत्युच्यते ।

ब्राह्मणा दशविधाः । सारस्वत, कान्यकुब्ज, गौड, मैथिल, उत्कल, कार्णाटक, महाराष्ट्र, आन्ध्र, तैलंग, गुर्जरभेदात् । आन्ध्रा द्राविडाः, तेषु सारस्वताद्याः पञ्चगौडाः, कार्णाटकाद्याः पञ्चद्राविडा उच्यन्ते। एष च भेदस्तत्तद्देशनिवासहेतुक इति स्पष्टं प्रतीयते । जयपुरी, माथुर, सरयूपारी, गढवाल, कूर्माचली, नैपालीप्रभृतयो वहवोप्येतेषामेवाऽवान्तरभेदाः सन्ति । तेषु च ब्राह्मणेषु येन पूर्वपुरुषेण यो वेदोऽधीतस्तद्वंश्यास्तद्वेदाऽध्यायिनः समजनिषत । एवञ्च केचिद्यजुर्वेदाध्यायिनः, केचिदृग्वेदाध्यायिनः, केचित्सामवेदाध्यायिनः, केचिदथर्ववेदाध्यायिनः, पाठ भेदेन प्रतिवेदंशाखाभिन्नाः यथा यजुर्वेदस्य काण्वमाध्यन्दिनतैत्तिरीयादयः, ऋग्वेदस्य शाकलवाष्कलादयः, सामवेदस्य कौथुमप्रभृतयः । ततश्च सम्प्रदायाऽनुसारेण स्वस्ववेदशाखा अवश्यमेवाऽध्येतव्या । नित्यनैमित्तिक-

Valmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

कर्मेतिकर्तव्यताज्ञानाय च गृह्यसूत्राणि रचितानि मुनिभिः। यथा काण्वमाध्यन्दिनादिशुक्लयजुशाखिनां पारस्कर गृह्यसूत्रं; तैत्तिरीयाणामापस्तम्बीयं; ऋग्वेदिनामाश्वलायनप्रणीतं; सामवेदिनां गोभिलरचितम्।

एवं सतिसत्स्वपि बहुषु गृह्यसूत्रेषु स्मृतिसंहितासु पुराणेषु निबन्धेषु च स्वशाखागृह्येणैव नित्यनैमित्तिकादिकर्माणि कर्तव्यानि न परशाखागृह्यादिना 'स्वशाखाश्रयमुत्सृज्य परशाखाश्रयञ्च यः। कर्तुमिच्छति दुर्मेधा मोघं तस्य विचेष्टितम्' इति कात्यायनोक्तेः। 'न जातु परशाखोक्तं बुधः कर्म समाचरेत्। आचरन्परशाखोक्तं शाखारण्डः स उच्यते'। इति संस्काररत्नमालायामुक्तेः। एतदपि स्वशाखोक्त कर्मत्यागाऽभिप्रायेणः, स्वगृह्यानुसारेण कर्मानुष्ठाने स्वल्पेनापि समग्रशास्त्रार्थानुष्ठानसिद्धिः। 'वहूल्यं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम्, तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्' इति हेमाद्रौ गृह्यपरिशिष्टोक्तेः। स्वगृह्येऽनुक्तमनुक्तसर्वाङ्गंतु कर्म स्वगृह्यविरोधं परिहरन्परगृह्यस्मृतिसंहितानिवन्धानुसारेणापि कुर्यात्। 'यन्नाम्नातं स्वशाखायां पारक्यमविरोधियत्, विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत्' इति कात्यायनोक्तेः। ततश्च नित्यनैमित्यिकादिकर्मानुष्ठाने स्वगृह्योक्तैवेति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

कर्तव्यता ग्राह्या। ततोऽपरिपूर्णे स्वशाखीयस्मृतिनिबन्धप्रोक्ता। यथाकाण्वमाध्यन्दिनैः पारस्करगृह्यसूत्रेण कर्कजयरामहरिहरगदाधरभाष्यैरुक्ता। ततोऽपरिपूर्णे कात्यायनयाज्ञवल्क्यस्मृतिदिवोदासीय संस्कारभास्करादिशुक्लयजुःशाखिनिबन्धप्रोक्ता ततोप्यऽपरिपूर्णे स्वगृह्यविरोधिविहाय परगृह्यस्मृतिपुराणाऽन्यवेदशाखिनिबन्धेनाऽभिहिता।

धर्मस्य ज्ञापकम्॥

धर्मस्य ज्ञापकं मूलं श्रुतिस्मृत्यादयः 'श्रुतिस्मृतिः सदाचारः स्वस्य च प्रियमात्मनः, सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्' इति याज्ञवल्क्योक्तेः। अस्य श्लोकस्य व्याख्या मिताक्षरायाम्। श्रुतिर्वेदः स्मृतिर्धर्मशास्त्रम्। तथा च मनुः 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तुवै स्मृतिः' इति। सदाचारः सतांशिष्टानामाचारोऽनुष्ठानं स्वस्यचात्मनः प्रियं, विकल्पे विषेयथा 'गर्भाष्टमेऽष्टमेवाऽब्दे ब्राह्मणस्योपनायनम्' इत्यादावात्मेच्छैवनियामिका। सम्यक् सङ्कल्पाज्जातः कामः शास्त्राऽविरुद्धो यथा 'मयाभोजनव्यति रेकेण जलं न पातव्यम्' इति। एते धर्मस्य मूलं प्रमाणम्। एतेषां विरोधे पूर्वपूर्ववलीयस्त्वमिति। वेदस्य स्वतः प्रामाण्यं,

University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

स्मृतेर्वेदमूलकतया प्रामाण्यम् । पुराणमपि स्मृतिरेव। तन्त्राणान्तु शिवोक्तत्वेन वेदस्येव स्वतः प्रामाण्यं वर्णयन्ति तीर्थकाराः ॥

वेदाः ।

१ ऋग्वेदः
२ यजुर्वेदः
३ सामवेदः
४ अथर्ववेदः

उपवेदाः ।

१ आयुर्वेदः (ऋग्वेदस्य)
२ धनुर्वेदः (यजुर्वेदस्य)
३ गान्धर्ववेदः (सामवेदस्य)
४ तन्त्राणि, अर्थशास्त्रञ्च } (अथर्ववेदस्य)

अङ्गानि ।

शिक्षा	निरुक्तम्
कल्पः	छन्दः
व्याकरणम्	ज्यौतिषम्

स्मृतयः ।

मनुः	व्यासः	प्रजापतिः
विष्णु	शङ्खः	बृद्धशातातपः
यमः	लिखितः	पैठीनसिः
दक्षः	संवर्तः	आत्रेयः
अङ्गिराः	गौतमः	नारदः
अत्रिः	शातातपः	वौधायनः
बृहस्पतिः	हारीतः	पितामहः
उशना	याज्ञवल्क्यः	सुमन्तुः
आपस्तम्बः	प्राचेतसः	छागलयेः
वशिष्ठः	बुधः	च्यवनः
कात्यायनः	देवलः	मरीचिः
पराशरः	सोमः	वत्सः
पारस्करः	बभ्रुः	काश्र्नाजिनिः
पुलस्त्यः	व्याघ्रः	जाबालिः
पुलहः	सत्यव्रतः	जमदग्निः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

क्रतुः भारद्वाजः लौगाक्षिः
ऋष्यश्रृङ्गः गार्ग्यः शौनकः
काश्यपः

एतैरुक्ता मनुस्मृति प्रभृतयोग्रन्थाः ॥

उपस्मृतयः ।

हेमाद्रौदानखण्डेअङ्गिरसाउक्ताः ॥

जाबालिः व्यासः कात्यायनः
नाचिकेतः सनत्कुमारः जातूकर्ण्यः
स्कन्दः शतर्जुः कपिञ्जलः
लौगाक्षिः जनकः वौधायनः
काश्यपः व्याघ्रः कणादः
विश्वामित्रः

एतैरुक्ताजाबालिस्मृतिमुखाग्रन्थाः ।

पुराणानि ।

'मद्वयं भद्वयञ्चैव ब्रत्रयं वचतुष्टयम् ।
अनाप लिङ्ग कूस्कानि पुराणानि दशाऽष्टच' ॥

१ मत्स्यपुराणम्
२ मार्कण्डेयपुराणम्
३ भविष्यपुराणम्
❀ ४ भागवतपुराणम्
५ ब्रह्मपुराणम्
६ ब्रह्माण्डपुराणम्
७ ब्रह्मवैवर्तपुराणम्
८ बराहपुराणम्
९ बामनपुराणम्
१० वायुपुराणम्
११ विष्णुपुराणम्
१२ अग्निपुराणम्
१३ नारदपुराणम्
१४ पद्मपुराणम्
१५ लिङ्गपुराणम्
१६ गरुडपुराणम्
१७ कूर्मपुराणम्
१८ स्कन्दपुराणम्

उपपुराणानि ।

१ सनत्कुमारपुराणम्
२ नर्सिंहपुराणम्
३ नन्दिपुराणम्
४ मानवपुराणम्

❀ मतान्तरे भागवतं उपपुराणं, शिवपुराणं महापुराणम् ।

...ity, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

५ औशनसपुराणम्	१२ कपिलपुराणम्
६ वारुणपुराणम्	१३ पराशरपुराणम्
७ कालिकापुराणम्	१४ भागवतपुराणम्
८ माहेश्वरपुराणम्	१५ विष्णुधर्मोत्तरपुराणम्
९ सौरपुराणम्	१६ शिवधर्मोत्तरपुराणम्
१० दुर्वासःपुराणम्	१७ कौमारपुराणम्
११ नारदपुराणम्	१८ देवीपुराणम्

महाभारतम् रामायणम् हरिवंशम्

षट्शास्त्राणि ।

१ मीमांसादर्शनम्	४ न्यायदर्शनम्
२ वेदान्तदर्शनम्	५ सांख्यदर्शनम्
३ वैशेषिकदर्शनम्	६ पातञ्जलदर्शनम्

अनुपदोक्ता वेदादयो धर्मार्थकाममोक्षसाधनज्ञानानां विद्यापदार्थानां धर्मस्य च हेतवः । तदुक्तं महर्षिणा याज्ञवल्क्येन ।[1] 'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिता । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश' इति । अन्यत्राप्युक्तम्[2] 'अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः । धर्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्दश' इति । उपवेदानांवेदेष्वन्तर्भावेन विद्यानां चतुर्दशत्वं, पार्थक्येन गणनायां त्वष्टादशत्वम् । तदुक्तम् 'षडङ्गा चतुर्वेदी मीमांसा न्याय विस्तृतिः । आयु-

(१) स्थानानि हेतवः इति मिताक्षरायां विज्ञानेश्वरः ।

(२) विद्याःविद्यापदार्थानां धर्मार्थिकाममोक्षसाधनज्ञानानां हेतवः आयुर्घृतमितिवत् उपचारात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

वेदो धनुर्वेदो गान्धर्वश्चार्थशासनम्। पुराणं धर्मशास्त्रञ्च विद्या अष्टादश स्मृता' इति। मीमांसायां ब्रह्ममीमांसायाः, न्याये सांख्यपातञ्जलवैशेषिकाणामन्तर्भावमभिप्रेत्य याज्ञवल्क्यवचने न्यायमीमांसयोरेवोल्लेख इति ॥

सङ्कल्परचनाप्रकारः।

यद्यपि सङ्कल्पोनामाऽहमेवं करिष्यामीत्यध्यवसायरूपो मनसोव्यापारः तथापि तदभिधायिवाक्यमपि सङ्कल्पः। सङ्कल्पं रचयामि, सङ्कल्पं पठामि, सङ्कल्पंकुरु इति व्यवहारदर्शनेन निरूढलक्षणाङ्गीकारात् ॥ सपरिकरसङ्कल्पवाक्यप्रयोगश्च नित्ये, नैमित्तिके, काम्ये, प्रायश्चिते च कर्मणि सर्वत्र आवश्यकः। 'सङ्कल्पेन बिना विप्र यत्किञ्चित्कुरुते नरः। फलं चाल्पाऽल्पकं तस्य धर्मस्याऽर्धक्षयो भवेत्' इति रत्नावलीधृतभविष्यवाक्यात्। 'मासपक्षतिथीनाञ्च निमित्तानां च सर्वशः, उल्लेखनमकुर्वाणो नरकं प्रतिपद्यते' इति तत्रैव शातातपोक्तेश्च ॥

सङ्कल्पे वक्तव्याःपदार्था इतिकर्तव्यताच।

पुरश्चर्यार्णवरत्नावल्योर्मेरुतन्त्रे 'ताम्रपात्रेकृत्वा कुशातिलाऽक्षतान्। उदङ्मुखस्तु सङ्कल्पं कुर्यात्संवत्सरादिकान्। कामनान्तनुच्चरेत्तु त्रयोविंशतिसंख्यकान्।

Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सम्वत्सराऽयने मासः पक्षः पञ्चाङ्गमेव च। नवग्रहस्थितिं घस्रभागं मुहूर्तकन्त्विति। स्वदेशभेदांस्तन्तुल्यान्कामनासहितान्वदेत्। द्वीपेऽमुकेऽमुके खण्डऽमुकेवर्षे च नीवृति। 'अमुके चामुके क्षेत्रे गोत्रप्रवरमुच्चरेत्। स्वनामजातिनामान्तं द्विजाच्छर्मचवर्मच'। गुप्तोदास इति। पुरश्चर्यार्णवे सनत्कुमारसंहितायाम् 'प्रणवं तत्सदद्येति मासपक्षतिथीरपि। अमुकगोत्रोऽमुकोहंचेति'। रत्नावल्याम् 'कुशोदकं समादाय सङ्कल्पेत हि वाक्यतः। तिङ्सुवन्तयुतं वाक्यमात्मनेपदि युज्यते। मध्येकामञ्च हेतुञ्च तिथ्याद्यं वाक्यमुच्चरेत्। मासं पक्षं तथा वारं तिथिं नक्षत्रमेवच। योगं नाम स्वगोत्रंच अद्यादि काम एवच' इति स्कन्दपुराणम्। सङ्कल्पेत वाक्यतः, मानसं कर्म वाक्येन प्रकाशयेत्।

शुक्तिशङ्खाऽश्मरूप्यमृन्मयपात्रैः केवलेन हस्तेन वा सङ्कल्पं न कुर्यात्। अत्र हस्तनिषेधः। पात्रान्तरसद्भावविषय एकहस्तपरोवेति रघुनन्दनीये दुर्गाकृत्यकामुद्यां च। देशकालयोरधिकरणत्वात्सप्तमीविभक्त्या प्रयोगः। ततश्च प्रतिपदोक्तासन्दर्भानुसारेण साम्प्रदायिकं सङ्कल्पवाक्यम्।

ताम्रपात्रे कुशत्रयं तिलाञ्जलञ्च निधाय तत्पात्रमादाय वामहस्ताऽन्वारब्धेन दक्षहस्तेन कुशातिलजलान्यादाय वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

❀ (संकल्पवाक्यस्वरूपम्)

ॐतत्सत् अद्य ब्रह्मणो द्वितीयेपरार्द्धे श्वेत वाराह-कल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलौयुगे जम्बू-द्वीपे भारतेवर्षे उत्तरेखण्डे आर्यावर्तान्तरगते नेपालदेशे पाशुपते क्षेत्रे प्रभवे सम्वत्सरे दक्षिणेऽयने शरदिऋतौ आश्विनेमासे कृष्णेपक्षे द्वितीयायां तिथौ शनौवारे रेवत्यांनक्षत्रे ध्रुवेयोगे गरेकरणे कन्याराशिस्थितयोः सूर्यशुक्रयोः कर्कटराशिस्थितेषु केतुषु मिथुनराशि-स्थितयोः शनिभौमयोः मीनराशिस्थितयोश्चन्द्रजीवयो-र्मकरराशिस्थिते राहौ तुला राशिस्थिते बुधे कौण्डिन्य-गोत्रः कौण्डिन्यवाशिष्ठ मैत्रावरुणेति त्रिप्रवरो हरिनाथ-शर्मा सकलपापक्षयार्थं वाग्मतीस्नानमहङ्करिष्ये इति सङ्कल्प्य जलमैशान्यां क्षिपेत् ।

युगादीनि ।

तत्तत्पूजादिप्रयोगज्ञाननिघ्नंहि पौरोहित्यम् । धर्मार्थेषुपूजादिप्रयोगेषु सङ्कल्प आवश्यकः । सङ्कल्प-वाक्यरचना च युगादिज्ञानाधीना । अतः प्रथमं युगादीनां नामादीनि लिख्यन्ते ।

❀प्रमाणवाक्ये सतोर्दिनभागमुहुर्तयोः संकल्पवाक्ये उल्लेखं प्रायो नकुर्वन्ति । असतां परार्धकल्पमन्वन्तरादीनां प्राय उल्लेखं कुर्वन्ति तत्र मूलमन्वेषणीयम् ।

Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

युगानि सत्यं, त्रेता, द्वापरः, कलिश्च। वर्तमानं कलियुगम् । सङ्कल्पवाक्ये कलौयुगे इति प्रयोगः ।

द्वीपानि जम्बुप्लक्षादीनि । अस्माभिरधिष्ठितं जम्बूद्वीपम् । जम्बूद्वीपे इति प्रयोगः ।

वर्ष नाम द्वीपस्य भागाः । हरिवर्षेलावृतभारतादयः । अस्माकं निवासो भारतं वर्षम् । भारतेवर्षे इति प्रयोगः । खण्डोनाम वर्षस्याऽवान्तरोभागः । महादेशाः आर्यावर्तान्तर्वेदिप्रभृतयः । विन्ध्यहिमालयान्तर्वर्तीपुण्यभूम्यपरपर्यायः आर्यावर्तः ।

देशाः काशी, चेदि, चोल, अङ्ग, वङ्ग, कलिङ्ग, कामरूप, नेपालप्रभृतयः आर्यावर्तान्तर्गते नेपालदेशे इति प्रयोगः ।

क्षेत्रं नाम देवनदीमुनिसम्बन्धेन पवित्रं कियत्परिमाणपरिछिन्नं स्थलं, नैमिषारण्य दण्डकारण्य पाशुपतादि । पाशुपते क्षेत्रे इतिप्रयोगः ।

सम्वत्सराः ।

प्रभवादिषु तेषु चैत्रशुक्लप्रतिपदमारभ्याऽऽगामि चैत्रकृष्णाऽमावस्यापर्यंतमेकैकः प्रवर्तते । पूर्वकालप्रवृत्ताश्चन्ते पञ्चाङ्गपत्रदर्शनेन सुज्ञानाः । अस्य वर्षस्य प्रभवो नाम, अस्यवर्षस्य विभवोनामेति । प्रभवे सम्वत्सरे, विभवे सम्वत्सरे इत्यादिरीत्योल्लेखः । तेच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

१ प्रभवः	२१ प्रजापतिः	४१ युवा
२ विभवः	२२ अङ्गिराः	४२ धाता
३ शुक्लः	२३ श्रीमुखः	४३ ईश्वरः
४ प्रमोदः	२४ भावः	४४ बहुधान्यः
५ प्रमाथी	२५ मन्मथः	४५ विरोधकृत्
६ विक्रमः	२६ दुर्मुखः	४६ परिधावी
७ वृषः	२७ हेमलम्बः	४७ प्रमादी
८ चित्रभानुः	२८ विलम्बः	४८ आनन्दः
९ सुभानुः	२९ विकारी	४९ राक्षसः
१० तारणः	३० शार्वरी	५० नलः
११ पार्थिवः	३१ प्लवः	५१ पिंगलः
१२ व्ययः	३२ शुभकृत्	५२ कालयुक्तः
१३ सर्वजित्	३३ शोभनः	५३ सिद्धार्थः
१४ सर्वधारी	३४ क्रोधी	५४ रौद्रः
१५ विरोधी	३५ विश्वावसुः	५५ दुर्मतिः
१६ विकृतिः	३६ पराभवः	५६ दुन्दुभिः
१७ खरः	३७ प्लवङ्गः	५७ रुधिरोद्गारी
१८ नन्दनः	३८ कीलकः	५८ रक्ताक्षः
१९ विजयः	३९ सौम्यः	५९ क्रोधनः
२० जयः	४० साधारणः	६० क्षयः

अयने ।

कर्कटसंक्रान्तिमारभ्य मकरसंक्रान्तिपर्यन्तं दक्षिणाऽयनम् । मकरसंक्रान्तिमारभ्य कर्कटसंक्रान्तिपर्यन्तमुत्तरायणम् । दक्षिणेऽयने, उत्तरेऽयने इतिप्रयोगः ।

ऋतवः ।

मीनसंक्रान्तिमारभ्य वृषसंक्रान्तिपर्पन्तं वसन्तऋतुः । वृषसंक्रान्तिमारभ्य कर्कटसंक्रान्तिपर्यन्तं ग्रीष्मः

Valmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ऋतुः । कर्कटसंक्रान्तिमारभ्य कन्यासंक्रान्तिपर्यन्तं वर्षाः ऋतुः । कन्यासंक्रान्तिमारभ्य वृश्चिकसंक्रान्तिपर्यन्तं शरद्ऋतुः । वृश्चिकसंक्रान्तिमारभ्य मकरसंक्रान्तिपर्यन्तं हेमन्तऋतुः । मकरसंक्रातिमारभ्य मीहसंक्रान्तिपर्यन्तं शिशिरऋतुः । वसन्तऋतौ, ग्रीष्मऋतौ, वर्षास्वृतौ, शरदिऋतौ (शरद्यृतौवा), हेमन्तऋतौ, शिशिरऋतौ इति प्रयोगः ।

सङ्कल्पवाक्ये ऋतं सौरं व्यवहरन्ति, मासन्तु चान्द्रम् ।१

*मासाः १२ ।

मासानां नाम ।	संकल्पे विभक्तिः ।
१ वैशाखः	वैशाखे मासे
२ ज्येष्ठः	ज्येष्ठे मासे
३ आषाढः	आषाढे मासे
४ श्रावणः	श्रावणे मासे

---

१ मासन्तु चान्द्रमेव प्रयुञ्जीत नतु सौरमपि । 'सम्वत्सराऽयने मासः पक्षः पञ्चाङ्गमेवच' इति मेरुवचनस्य चान्द्रस्यैकस्यैव उल्लेखेपि चरितार्थत्वात् । अन्यथा नाक्षत्रवार्हस्पत्यादीनामप्युल्लेखः कथं वार्येत । सौरस्येव नाक्षत्रादीनामपि मासत्वाविशेषात् । अतएव दीपिकायाम् । 'यन्मासर्तुविशेषतो यदुदितं तत्कर्म कार्यन्तथा मासत्वादिषु चान्द्रमानमुररीकुर्वाद्विशेषो नचेत्' एतेन चान्द्रेणाऽमुकेमासे सौरेणाऽमुकेमासे इति वदन्तः परास्ताः । ऋतूनामपि द्वैविध्येन सौरेणाऽमुकर्तो चान्द्रेणाऽमुकर्ताविति उल्लेखापत्तेश्च पक्षतिथ्यादिसाहचर्येण मासस्यापि चान्द्रस्यैव ग्रहणौचित्याच्च ।

*नेपालदेशे पर्वतीयाः पूर्णिमान्तंमानमाश्रित्य व्यवहरन्ति अतश्चैत्रशुक्लपक्षाऽनन्तरः पक्ष वैशाखकृष्ण इति व्यवहियते, लिख्यतेच पञ्चाङ्गपत्रेपि तथैव । एवं सर्वेषु पक्षेषु वोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

५ भाद्रः	भाद्रपदे मासे
६ आश्विनः	आश्विने मासे
७ कार्त्तिकः	कार्तिके मासे
८ मार्गः	मार्गे मासे
९ पौषः	पौषे मासे
१० माघः	माघे मासे
११ फाल्गुनः	फाल्गुने मासे
१२ चैत्रः	चैत्रे मासे

पक्षौ २ ।

पक्षाणांनाम ।	संकल्पे विभक्तिः ।
१ शुक्लः	शुक्ले पक्षे
२ कृष्णः	कृष्णे पक्षे

तिथयः १५

तिथीनां नाम ।	संकल्पे विभक्तिः ।
१ प्रतिपद्	प्रतिपदि तिथौ
२ द्वितीया	द्वितीयायां तिथौ
३ तृतीया	तृतीयायां तिथौ
४ चतुर्थी	चतुर्थ्यां तिथौ
५ पञ्चमी	पञ्चम्यां तिथौ
६ षष्ठी	षष्ठ्यां तिथौ
७ सप्तमी	सप्तम्यां तिथौ
८ अष्टमी	अष्टम्यां तिथौ
९ नवमी	नवम्यां तिथौ
१० दशमी	दशम्यां तिथौ
११ एकादशी	एकादश्यां तिथौ
१२ द्वादशी	द्वादश्यां तिथौ
१३ त्रयोदशी	त्रयोदश्यां तिथौ
१४ चतुर्दशी	चतुर्दश्यां तिथौ
१५ पूर्णिमा	पूर्णिमायां तिथौ
३० अमावास्या	अमावास्यायां तिथौ

Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

वाराः ७ ।

१ रविः	रवौ वासरे
२ सोमः	सोमे वासरे
३ भौमः	भौमे वासरे
४ बुधः	बुधे वासरे
५ वृहस्पतिः	गुरौ वासरे
६ शुक्रः	शुक्रे वासरे
७ शनिः	शनौ वासरे

नक्षत्राणि २७ ।

(नक्षत्राणां नाम)	(संकल्पे विभक्तिः)	(नक्षत्राणां नाम)	(संकल्पे विभक्तिः)
१ अश्विनी	अश्विन्यांनक्षत्रे	१५ स्वातिः	स्वातौ नक्षत्रे
२ भरणी	भरण्यां न०	१६ विशाखा	विशाखायां न०
३ कृत्तिका	कृत्तिकायां नक्षत्रे	१७ अनुराधा	अनुराधायां न०
४ रोहिणी	रोहिण्यां नक्षत्रे	१८ ज्येष्ठा	ज्येष्ठायां न०
५ भृगशिरा	मृगशिरसि न०	१९ मूलम्	मूले न०
६ आर्द्रा	आर्द्रायां नक्षत्रे	२० पूर्वाषाढा	पूर्वाषाढायां न०
७ पुनर्वसुः	पुनर्वसौ न०	२१ उत्तराषाढा	उत्त०षा०यां न०
८ तिष्यः	तिष्ये न०	२२ श्रवणः	श्रवणे न०
९ अश्लेषा	अश्लेषायां न०	२३ धनिष्ठा	धनिष्ठायां न०
१० मघा	मघायां न०	२४ शतभिषज्	शतभिषजि न०
११ पूर्वफाल्गुनी	पूर्व०न्यांनक्षत्रे	२५ पूर्वभाद्रपदा	पूर्वभाद्रपदायां नक्षत्रे
१२ उत्तरफाल्गुनी	उत्तर फा० नक्षत्रे	२६ उत्तरभाद्रपदा	उत्तरभाद्रपदायां न०
१३ हस्तः	हस्ते न०	२७ रेवती	रेवत्यां न०
१४ चित्रा	चित्रायां न०		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MD

योगाः २७ ।

योगानां नाम ।	संकल्पे बिभक्तिः ।
१ विष्कुम्भः	विष्कुम्भे योगे
२ प्रीतिः	प्रीतौ योगे
३ आयुष्मान्	आयुष्मति योगे
४ ❀सौभाग्यः	सौभाग्ये योगे
५ शोभनः	शोभने योगे
६ अतिगण्डः	अतिगण्डे योगे
७ सुकर्मा	सुकर्मणि योगे
८ धृति.	धृतौ योगे
९ शूलम्	शूले योगे
१० गण्डः	गण्डे योगे
११ बृद्धिः	बृद्धौ योगे
१२ ध्रुवः	ध्रुवे योगे
१३ व्याघातः	व्याघाते योगे
१४ हर्षणः	हर्षणे योगे
१५ वज्रः	वज्रे योगे
१६ ❀सिद्धिः	सिद्धौ योगे
१७ व्यतीपातः	व्यतीपाते योगे
१८ वरीयाम्	वरीयसि योगे
१९ परिघः	परिघे योगे
२० शिवः	शिवे योगे
२१ सिद्धिः	सिद्धौ योगे
२२ साध्यः	साध्ये योगे
२३ शुभः	शुभे योगे
२४ शुक्लः	शुक्ले योगे

❀ योगवाची सौभाग्यशब्दः पुल्लिङ्गः 'विष्कुम्भः प्रीतिरा युष्मान्सौभाग्यः शोभनस्तथा' इति शीघ्रवोधादिफलग्रन्थोक्तेः ।

❀ सिद्धियोगौ द्वौस्तः वज्रादुत्तरः शिवादुत्तरश्च ।

Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: MI

२५ ब्रह्मा	ब्रह्मणि योगे
२६ ऐन्द्रः	ऐन्द्रे योगे
२७ वैधृतिः	वैधृतौ योगे

करणानि ११ ।

करणनां नाम ।	संकल्पे विभक्तिः ।
१ ववः	ववे करणे
२ वालवः	वालवे करणे
३ कौलवः	कौलवे करणे
४ तैत्तिलः	तैत्तिले करणे
५ गरः	गरे करणे
६ वणिजः	वणिजि करणे
७ विष्टिः	विष्टौ करणे
८ शकुनिः	शकुनौ करणे
९ चपुष्पाद्	चतुष्पदि करणे
१० नागः	नागे करणे
१० किंस्तुघ्नः	किंस्तुघ्ने करणे

एताति करणानि पंचाङ्गपत्रेण ज्ञेयान्यपि सुखेन बोधाय चक्रगतानि लिखितानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

करणचक्रम् ।

शुक्लपक्षे			कृष्णपक्षे		
तिथयः	पूर्वार्द्धे	उत्तरार्द्धे	तिथयः	पूर्वार्द्धे	उत्तरार्द्धे
१	किंस्तुघ्नः	ववः	१	वालवः	कौलवः
२	वालवः	कौलवः	२	तैत्तिलः	गरः
३	तैत्तिलः	गरः	३	वाणिग्	विष्टिः
४	वणिग्	विष्टिः	४	ववः	वालवः
५	ववः	वालवः	५	कौलवः	तैत्तिलः
६	कौलवः	तैत्तिलः	६	गरः	वणिग्
७	गरः	वणिग्	७	विष्टिः	ववः
८	विष्टिः	ववः	८	वालवः	कौलवः
९	वालवः	कौलवः	९	तैत्तिलः	गरः
१०	तैत्तिलः	गरः	१०	वणिग्	विष्टिः
११	वणिग्	विष्टिः	११	ववः	वालवः
१२	ववः	वालवः	१२	कौलवः	तैत्तिलः
१३	कौलवः	तैत्तिलः	१३	गरः	वणिग्
१४	गरः	वणिग्	१४	विष्टि	शकुनिः
१५	विष्टिः	ववः	३०	चतुष्पाद्	नागः

❀ तिथेः पूर्वार्द्धं नाम तिथिभोग्यघटिकौघपूर्वार्द्धभागः ।

Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ग्रहाः ९	राशयः १२	तत्तद्राशिस्थानां ग्रहाणां प्रयोगः ।
१ सूर्य	१ मेषः	मेषराशिस्थिले सूर्ये
२ चन्द्रः	२ वृषः	वृषराशिस्थिते चन्द्रमसि
३ भौमः	३ मिथुनम्	मिथुनराशिस्थिते भौमे
४ बुधः	४ कर्कटः	कर्कटराशिस्थिते बुधे
५ वृहस्पतिः (गुरु)	५ सिंहः	सिंहराशिस्थिते गुरौ
६ शुक्रः	६ कन्या	कन्याराशिस्थिते शुक्रे
७ शनिः	७ तुला	तुलाराशिस्थिते शनौ
८ राहु।	८ वृश्चिकः	वृश्चिकराशिस्थिते राहौ
९ केतवः	९ धनुष्	वृषराशिस्थितेषु केतुषु
	१० मकरः	
	११ कुम्भः	
	१२ मीनः	

संक्रान्तयः ।

सूर्यादीनाम् ।

संमेषेर्कः, संवृषेर्कः, वृषेभौमः, मिथुने बुधः, कर्कटे गुरुः, सिंहे शुक्रः, कन्यायां शनिः, तुलायां राहुः, मेषे केतुः इति पञ्चाङ्गपत्रलिखितेन संक्रान्ति-वाक्येन सूर्यादीनां राशिसंक्रमो ज्ञायते। एकसंक्रान्ति-समयादारभ्याऽपरसंक्रान्तिसमयपर्यन्तमेकस्मिन् राशौ ग्रहस्तिष्ठतीति सुबोधमेव ।

(१) चन्द्रस्य ।

अश्विनी, भरणी, कृत्तिकायाः पादो❀ मेषः ।

---

(१) चन्द्रस्य राशिसंक्रमोपि पञ्चाङ्गपत्रलेखाद्बोध्यः ।

❀ नक्षत्रस्य पादो नाम तद्भोग्यघटिकौघचतुर्थांशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

कृत्तिकायास्त्रयः पादाः, रोहिणी, मृगशिरोर्द्धं वृषः। मृगशिरोर्द्धमार्द्रा, पुनर्वसोस्त्रयः पादा मिथुनम्। पुनर्वसोरेकः पादस्तिष्योऽश्लेषा कर्कटः। मघा, पूर्वफाल्गुन्युत्तरफाल्गुन्या एकः पादः सिंहः। उत्तरफाल्गुन्यास्त्रयः पादाः, हस्त, चित्रार्द्धं कन्या। चित्राऽर्द्धं, स्वातिः, विशाखायास्त्रयः पादाः तुला। विशाखाया एकः पादो ऽनुराधा, ज्येष्ठा वृश्चिकः! मूलं, पूर्वाषाढोत्तराषाढायाः पादो धनुः। उत्तराषाढायास्त्रयः-पादा, श्रवणो, धनिष्ठार्द्धं मकरः। धनिष्ठार्द्धं, शतभिषक, पूर्वभाद्रपदायास्त्रयः पादाः कुम्भः। पूर्वभाद्रपदायाः एकः पादः, उत्तरभाद्रपदा, रेवती मीनः।

गोत्रं, प्रवराः।

इहाऽनादौ संसारे विश्वामित्र, जमदग्नि, भरद्वाज, गौतमाऽत्रि, वशिष्ठ, कश्यपाऽगस्तिषु एषां पुत्रपौत्रादिषु वा यस्य मुनेर्गोत्रत्वव्यवहारः समुनिर्गोत्रम्। एषु एषामपत्येषु वा शिष्टपरम्परा प्रसिद्धाः कस्यचिद्गोत्रस्य द्वौ, कस्यचिद्गोत्रस्य त्रयः, कस्यचिद्गोत्रस्य चत्वारः, कस्यचिद्गोत्रस्य पंच प्रवराः। प्रवरानाम तस्मिन्गोत्रे प्रवराः श्रेष्ठा पुरुषाः।

CC-0. Nepal Sanskrit University. Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

नेपालदेशे प्रचलिताः

गोत्रम् ।	प्रवराः ।
आत्रेयः	आत्रेयोऽर्चनानसः श्यावाश्वश्चेति त्रयः
अत्रिः	अत्रिः,अर्चनानसः श्यावाश्वश्चेति त्रयः
उपमन्युः	उपमन्युः, कपिलः, विरुजश्चेति त्रयः ।
कौण्डिन्यः	कौण्डिन्यो, वाशिष्ठो, मैत्रावरुणश्चेति त्रयः ।
काश्यपः	काश्यप, आवत्सारो, नैध्रवश्चेति त्रयः ।
कौशिकः	कौशिकः, अघमर्षणः, विश्वामित्रश्चेति त्रयः । वा
कौशिकः	कौशिकः, देवरातः, औदलश्चेति त्रयः ।
गौतमः	गौतम, आङ्गिरस, उतत्थ्यश्चेति त्रयः ।
भारद्वाजः	भारद्वाज, आङ्गिरसो, बार्हस्पत्यश्चेति त्रयः ।
मौद्गल्यः	मौद्गल्यः, आंगिरस, भार्म्याश्वश्चेति त्रयः ।
वशिष्ठः	वाशिष्ठ, इन्द्रप्रमद, आभरद्वसुश्चेति त्रयः ।
धनञ्जयः	धनञ्जयः, विश्वामित्रः, माधुच्छन्दसश्चेति त्रयः ।
गर्गः	गर्गः, गार्ग्यः, गौतमः विश्वामित्रः पराशर्यश्चेति पंच ।
वत्सः	भार्गवः, च्यावनः, आप्तवानः, और्वः, जामदग्न्यश्चेति पंच इत्यादीनि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

१ कूर्माचले प्रचलिताः ।

गोत्रम्	प्रवराः
कात्यायनः	कत्यायनः, विष्णुः, आंगिरसः ।
पराशरः	वशिष्ठः, शक्तिः, पराशरः ।
काश्यपः	काश्यपः, वत्सः, नैध्रुवः ।
बृहस्पतिः	बृहस्पतिः, कपिलः, पार्वणः ।
अगस्तिः	अगस्तिः, जैमिनीः, दधीचिः ।
गौतमः	अङ्गिराः, वशिष्ठः, वार्हस्पत्यः ।
कानः	अश्वत्थः, देवलः, देवसेनः ।
भारद्वाजः	भारद्वाजः, आङ्गिरसः, वार्हस्पत्यः ।
कौशिकः	कौशिकः, जामदग्न्यः, आयम्यः ।
विश्वामित्रः	विश्वामित्रः, मरीचिः, कौशिकः ।
मिहिलः	मिहिलः, असितः, देवलः ।
आत्रेयः	आत्रेयः, शातातपः, साङ्ख्यः ।
शाण्डिल्यः	शाण्डिल्यः, असितः, देवलः ।
सांकृत्यः	सांकृत्यः वशिष्ठः, व्याहरः ।
कृष्णात्रिः	कृष्णात्रेयः, आप्लावनः, सारस्वतः ।
शौनकः	शौनकः, वशिष्ठः, पाराशरः
हारीतः,	हारीतः, देवराजः, विश्वामित्रः ।
कौण्डिन्यः	कौण्डिन्यः, अत्रिः, कौशिकः ।

१ नैनीतालमुद्रित दशकर्मादिपद्धतेरुद्धृतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

(गोत्रम्)	(प्रवराः)
आलावुकः	सागरः, गौतमः, वशिष्ठः ।
विष्णुवृद्धिः	विष्णुवृद्धिः, कौवपुच्छः, दश्वितः ।
उपमन्युः	उपमन्युः, कपिलः, विरुजः ।
कनवटः,	कनवट, अश्वत्थः, देवलः ।
कृष्णावसुः	सव्यः, व्ययनः, सारस्वतः ।
शिशिहरः	शिशिहरः, कौशिकः, जामदग्न्यः ।
वैयाघ्रः	वैयाघ्रः, सांकृतिः, माण्डव्यः ।
जमदग्निः	जमदग्निः, वशिष्ठः, और्वः ।
कपिलः	कपिलः, काञ्चन, विश्वामित्रः ।
आङ्गिरसः,	आङ्गिरसः वार्हस्पत्यः, औदुम्बरः ।
मौनसः	मौनसः, वैतहव्यः, सेनिः ।
गौतमः	गौतमः, आङ्गिरसः, सौतथ्यः ।
वत्सः	वत्सः, और्वः, च्यवनः, भार्गवः, जामदग्न्यः ।
भार्गवः	भार्गवः, च्यवनः, अनर्घ्यः, जामदग्न्यः ।
मिहिरः	मिहिरासनः, वशिष्ठः, और्वः, च्यवनः, जामदग्न्यः ।
वशिष्ठः	वशिष्ठः, वाशिष्ठः, शाक्तः, पाराशरः च्यवनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

(गोत्रम्)	(प्रवराः)
शाकटायनः	शाकटायनः, आङ्गिरसः, अलभः, आथर्वणः, वैशम्पायनः ।
सावर्णः	सावर्णः, और्वः, च्यवनः, जामदग्न्यः, आप्तवानः ।
गर्गः	गार्ग्यः, घृतकौशिकः, माण्डव्यः, अथर्वः, वैशम्पायनः ।

प्रयोगस्तु आकाङ्क्षानुसारात् कौण्डिन्य गोत्रः कौण्डिन्य वाशिष्ठ मैत्रावरुणेतित्रिप्रवर इत्यादिरीत्या द्वन्द्वगर्भबहुव्रीहिसमासेन ।

गोत्राऽज्ञानेतु आचार्यगोत्रेण व्यवहारः । आचार्यस्तूपनयनकर्ता । 'गोत्रनाशेतुकाश्यपम्' इति हेमाद्रौ व्याघ्र इति संस्कारमयूखे ।

नाम ।

नामानि चतुर्विधानि भवन्ति । देवीभक्तिः शिवभक्तो, विष्णुभक्तइत्यादि भक्त्यनुसार्येकम् । चु चे चोला अश्विनीत्याद्यऽवकहडचक्राऽनुसारि जन्मनक्षत्रपादप्रयुक्ताऽक्षरादि चूडामणि इत्याद्येकम् । मासदेवतानामानुसारिकेशवो, गभस्तिरित्याद्येकम् । व्यावहारिकं पित्राप्रीत्योल्लपितं भट्टोजी, बबुवा,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

गोरे इत्यादि एकम्। तेषु प्रसिद्धेन नाम्ना सङ्कल्पः कार्यः।

फलम्।

स्नानदानव्रतजपहोमादिसङ्कल्पे तावदेव फल मुल्लिखेत् अधिकारविधिर्यावद्विधत्ते। ❀अधिकार-विधिर्हि फलमुद्दिश्य कर्म विधत्ते। अधिकारविधि नानुद्दिष्टानिफलानि शब्दैकवेद्यानि तेन कर्मणोत्प द्यन्ते इत्यत्र प्रमाणमेव नास्ति।

संकल्प्यं कर्म।

कर्मव्युत्पत्या जातकर्म नामकरणादीनि संस्कार-रूपाणि, स्नान सन्ध्या तर्पण ब्रह्मयज्ञ नित्यश्राद्धादी-नि नित्यकर्माणि, आब्दिकप्रभृतीनि श्राद्धानि, शि-वरात्रि हरितालिकादीनि व्रतानि, आधान दर्शपर्ण-मास चातुर्मास्याद्यश्वमेधान्तानि श्रौतानि, दीक्षा-ग्रहण मालासंस्कार पुरश्चर्याद्यानि तान्त्रिकाणि, शि-वस्थापन वापीकूपधर्मशालानिर्माणादीनि पूर्तानि, ग्रहयज्ञवर्द्धापनादीनि शान्तिकपौष्टिकानि, गोदान, कन्यादान विद्यादान महादानप्रमुखानि दानानि, प्राजापत्य चान्द्रायणपराकप्रभृतीनि प्रायश्चित्तानि,

❀ फलविशेषसम्बन्धबोधकोविधिरधिकारविधिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

रजोदर्शनशान्ति गोमुखप्रसवादीनि शान्तिकर्माणि कर्मशब्देनोच्यन्ते। तानि च करिष्ये इतिकृतेः कर्मतया तद्वाचकानि द्वितीयाविभक्त्या प्रयुञ्जीत।

इत्थं साधारणसङ्कल्पकल्पनायां व्युत्पत्तिं मासाद्य प्रयोगविधिपर्यालोचनया वाक्यं रचयित्वा तानि तानि कर्माणि सङ्कल्पयेत् इति॥

यतः कर्मपात्रजलेन सङ्कल्पः कर्तव्यस्तस्मादादौ कर्मपात्रनिर्माणप्रकारो लिख्यते।

कर्मपात्रनिर्माणप्रकारः।

कर्मपात्रंनाम प्रक्षिप्तकुशातिलयवगन्धपुष्पं जलैराजपूरितं पात्रम्। तच्च दानदेवपूजादौसङ्कल्पे श्राद्धे चाऽऽवश्यकम् 'रजतादिनिर्मितं सकलकर्मार्थं पात्रनिर्मलाऽद्भिरापूर्णमष्टाङ्गुलाऽधिकविस्तारं पुरःप्रतिष्ठाप्य तत्र कुशान्क्षिप्त्वा' इति दिवोदासीय गद्यात्। 'ततः कर्मार्थं जलाऽभिमन्त्रणं दर्भैरालोड्य यद्देवा इति ऋचेन अतऊर्ध्वं जलकार्यमनेन' इति श्राद्धसूत्रगदाधरभाष्यगद्यात्। शुद्धेपात्रे। ॐयद्देवादेव हेडनन्देवासश्चकृमाव्वयम्। अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्व ँ हसः॥ १॥ यदिदिवा यदि नक्तमेनाँसि चकृमाव्वयम्। वायुर्मा तस्मादेनसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

विश्वान्मुञ्चत्व ँ हसः ॥ २ ॥ यदिजाग्रद्यदिस्व प्नएनाँसि चकृमाव्वयम् । सूर्योमातस्मादेनसो वि- म्वान्मुञ्चत्व ँ हसः ॥ ३ ॥ पवित्रेस्थो व्वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः इति कुशान् । ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तुनः इतिजलम् । ॐ यवो सि यवयास्मद्वेषो यवयारातीः इति यवान् । ॐ तिलो सिसोमदेवत्यो गोसवोदेवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्पृणाहिनः स्वाहा इतितिलान् । ॐगन्धद्वारान्दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं इतिगन्धम् । ॐ श्री- श्चतेलक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्वि- नौव्यात्तम् । इष्णन्निषाणामुम्मइषाण सर्वलोकं मइषाण इति पुष्पाणि प्रक्षिप्य दर्भैरालोडयेत् । सङ्कल्पादिकार्यं तैरेव कुशजलादिभिः कुर्यात् ।

शिक्षायै केषाञ्चित्कर्मणां सङ्कल्पवाक्यानि लिख्य- न्ते । कर्ता स्नातः सुप्रक्षालितकरचरणः शुद्धवस्त्रः शुद्धे आसने प्राङ्मुखः, उदङ्मुख, ऐशान्यभिमुखोवोप- विश्य कुशतिलजलान्यादाय सङ्कल्पं कुर्यात् । एते कर्तृधर्माः सर्वत्र सङ्कल्पादिषु आवश्यकाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

चण्डीपाठसंकल्पाः ।

ब्राह्मणद्वारापाठकरणे । अहं उपसर्गशान्त्यर्थं सप्तशतीस्तोत्राऽऽवृत्तित्रयपाठं करिष्ये, तत्कर्मकर्तुममुकशर्माणंब्राह्मणमेभिश्चन्दनपुष्पाऽक्षत पूगीफलैस्त्वामहं वृणे इति वृणुयात् ।

पाठसमाप्तौ, ब्राह्मणद्वाराकृतस्य सप्तशतीस्तोत्राऽऽवृत्तित्रयपाठकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतखण्डं चन्द्रदेवताकं ताम्रखण्डं सूर्यदेवताकममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इति हस्ते दद्यात् । कालान्तरेदानेतु ब्राह्मणाय दातुमहमुत्सृजे इति कुशादिकं जलेप्रक्षिपेत् । वरणं पाठस्तत्समाप्तौ दक्षिणादानमिति स्वारसिकः क्रमः ।

स्वयं पाठकरणेतु अहं उपसर्गशान्त्यर्थं सप्तशती स्तोत्रावृत्तित्रयपाठं करिष्ये इति सङ्कल्पं कुर्यात् ।

वरणदक्षिणादानयोर्युगपत्करणे संकल्पः ।

अहं उपसर्गशान्त्यर्थं सप्तशतीस्तोत्राऽऽवृत्तित्रय पाठं करिष्ये, तत्कर्मकर्तुममुकगोत्रममुकशर्माणमेभिश्चन्दनपुष्पाऽक्षतपूगीफलैस्त्वामहं वृणे इति ब्राह्मणं गन्धादिभिः सम्पूज्य; दक्षिणां सम्पूज्याऽऽदाय ब्राह्मणद्वाराकरिष्यमाणसप्तशतीस्तोत्राऽऽवृत्तित्रयपाठकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां ताम्रखण्डं सूर्यदेवताकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

रजतखण्डं चन्द्रदेवताकममुकगोत्रायेत्यादि दात्वा, अच्छिद्रप्रार्थनां कर्मेश्वरार्पणं च कुर्यात् ॥

दुःस्वप्नजनिताऽरिष्टशान्त्यर्थं, अतीसारशान्त्यर्थं एतद्गृहेमहामारीप्रवेशाऽभावाय, ज्वरशान्त्यर्थमित्यादि फलानुसारेण आवृत्तिपञ्चकपाठं, आवृत्तिनवकपाठमित्याद्यावृत्यऽनुसारेण सङ्कल्पवाक्यं रचयेत् । एकाऽवृत्यादिसहस्राऽऽवृत्तिपर्यन्तं फलभेदोऽनुष्ठानप्रकाशे वाराहीतन्त्रे ज्ञेयः ।

पुटितपाठप्रकारो मन्त्रभेदेन फलभेदश्च ।

'दुर्गास्तवनमन्त्राणां सङ्ख्या सप्तशतं भवेत् । कामनामन्त्रसंख्याच शतं चैव चतुर्दश' इति । 'होमसंख्याच मन्त्राणां शतञ्चैवकविंशतिः' इति चोक्तेः । पुटितपाठइत्यक्षरार्थस्वारस्याच्च प्रतिमन्त्रमादावन्ते च संपुटकारीमन्त्रपाठ इति निश्चीयते ।

मन्त्रविशेषेण फलविशेषोऽनुष्ठानप्रकाशे कात्यायनीतन्त्रोक्तत्वेनोक्तः । 'प्रणवपुटितपाठे मन्त्र सिद्धिः; प्रणवमहाव्याहृतियुतगायत्रीपुटितपाठे महाफलं, जातवेदसे इत्यृचा सर्वकामसिद्धिः; गायत्री जातवेदसे त्र्यम्बकमिति मिलितं शताऽक्षरो मन्त्रः । तेनाऽपमृत्युनिवारणं, रोगक्षयः, अरिक्षयः, सर्वाऽऽपद्विनिवारणं;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

शरणागतमन्त्रेण सर्वकार्यसिद्धिः; करोतुसानः इत्यर्द्धेन सर्वकामावाप्तिः; दुर्गेस्मृता इति सर्वापत्तिनिवारणं; कांसोस्मि इति ऋचा लक्ष्मीप्राप्तिः; रोगा नशेषानिति सकलरोगनाशः; इत्युक्तासातदा देवी इति विद्याप्राप्तिर्वाग्वैकृतनाशश्च; देवी प्रपन्नार्तिहरे इति सर्वापन्निवृत्तिः, सर्वकार्यसिद्धिश्च; कामबीज संपुटितस्यैकचत्वारिंशद्दिनं त्रिरावृत्तौ पुत्र प्राप्तिः; मायाबीजपुटितस्य फट्पल्लवसहितस्य सप्त दिनपर्यन्तं त्रयोदशावृत्तौ सर्वोपद्रवनाशः; लक्ष्मी बीजपुटितस्यैकोनविंशतिदिनपर्यन्तं पञ्चदशावृत्तौ लक्ष्मीप्राप्तिः; वाग्बीजपुटितस्य शतावृत्या विद्या प्राप्तिः ।

सप्तशतीपुस्तकं द्विविधमुपलभ्यते । श्लोकाङ्कमात्रसहितं मन्त्राङ्कसहितञ्च । पुटितपाठे मन्त्राङ्कसहितं पुस्तकमादाय प्रथमं संपुटमन्त्रः, ततः सप्तशतीमन्त्रः, ततः संपुटमन्त्रः इति सप्तशतीमन्त्रस्याऽऽदावन्ते च सम्पुटमन्त्रं कृत्वा पाठं कुर्यात् ।

पुटितपाठे संकल्पः ।

ब्राह्मणद्वारापाठकरणे । अहं सकलरोगनाशार्थं रोगानशेषानितिमन्त्रकरणक प्रतिमन्त्रसम्पुटसप्तशतीस्तोत्रावृत्तिपञ्चकपाठं करिष्ये, तत्कर्मकर्तुममुकगोत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाऽक्षतपूगीफलैस्त्वां (युष्मान्वा) अहं वृणे इति वृणुयात् ।

पाठसमाप्तौ, ब्राह्मणद्वाराकृतस्य सम्पुटसप्तशतीस्तोत्राऽऽवृत्तिपञ्चकपाठकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतं चन्द्रदेवताकं (ताम्रखण्डं सूर्यदेवताकं वा) अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इति हस्ते दद्यात् ।

कालान्तरे दानेतु ब्राह्मणाय दातुमहमुत्सृजे इति जले कुशादिकं प्रक्षिपेत् । अन्यत्सर्वं साधारणसप्तशतीपाठे पूर्वलिखितमिव कर्तव्यम् ।

शतरुद्रीये मन्त्राः ।

जावालश्रुतिः अथ हैनं ब्रह्मचारिणऊचुः किं जप्येनाऽमृतत्वं ब्रूहीति सहोवाच याज्ञवल्क्यः शतरुद्रीयेणेत्येतान्येवहवा अमृतस्यनामानि एतैर्हवा अमृतो भवतीति । एवमेवैतद्याज्ञवल्क्येति । शतरुद्रीयञ्च विवृतमस्याएवोपनिषदोदीपिकाकारैर्नारायणैः 'षट्षष्टिर्नीलसूक्तं च षोडशर्चस्तथैवच । एषते द्वे नमस्तेद्वे नतंविद्वयमेवच । मीढुष्टमचतुष्कंच एतद्धिशतरुद्रियम्' । मनस्त इत्याति षट्षष्टिः; नीलसूक्तं बय७ सोमेत्यष्टौ, षोडशर्चो नमस्ते इत्यादिरेवाऽऽवृत्या; ततो द्विकत्रयं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

ततश्चतुष्कमिति शतमृचो रुद्रजाप्यं यजुर्विदामिति। अत्र नमस्तेद्वे इत्यनेन नमस्तेरुद्रमन्यव इति यातेरुद्रशिवेतिच द्वितयं गृह्यते। संग्राहकपद्यद्वितीयार्द्धस्य व्याख्याने प्रसिद्धवत्। ततो द्विकत्रयमितिमात्राऽभिधानेन विशेषाऽनवबोधनात्। यदि विशेषमविवक्षिष्यत् तदा नमस्ते हरसे, नमस्ते अस्तु इत्यभ्यधास्यात्। अतो नमस्ते हरसे नमस्ते अस्तु इति द्वयं पठन्तः केचन प्रमाणं मृगयन्तु।

❀षट्षष्टिः	नमस्तेरुद्र०–दध्मः	६६
नीलसूक्तम्	बय॰सोम०	८
	एषते०	
	अवरुद्र०	
	भेषजमसि०	
	त्र्यम्बकं०	
	एतत्तेरुद्रा०	
	त्र्यायुषं०	
	शिवोनामा० वीर्याय०	
षोडशर्चः	नमस्तेरुद्रमन्यव०	१६
एषतेद्वे	एषते०	२
	अवरुद्र०	

❀ नेपालदेशीयास्तु षट्षष्टिमारभ्य क्रमेण पठित्वा नीलसूक्तमन्ते पठन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

नमस्तेद्वे	नमस्तेरुद्र०	२
	यातेरुद्र०	
नताम्बिद्वयं	नतंविदाथ०	२
	विश्वकर्मा०	
मीदुष्टमचतुष्कं	मीदुष्टम०	४
	विकिरिद्र०	
	सहस्राणि०	
	असङ्ख्याता०	
		१००

शतरुद्रीयपाठस्यफलम् ।

कैवल्योपनिषदि श्रूयते 'यः शतरुद्रीयमधीते सोऽग्निपूतो भवति, सुरापानात्पूतो भवति, ब्रह्महत्यायापूतो भवति, सुवर्णस्तेयात्पूतो भवति, कृत्याऽकृत्यात्पूतो भवति' तस्मादविमुक्तमाश्रितो भवत्यत्याश्रमी सर्वदा सकृद्वा जपेदनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । "तस्मादेवंविदित्वैनं कैवल्यं फलमश्नुते" इति । रुद्राऽभिषेकस्य पापक्षय व्याधिविमोक्ष जीवन श्री शान्ति पुष्टि तुष्टि मोक्षादीनि फलानि निबन्धेषु द्रष्टव्यानि ।

शतरुद्रीयपाठस्य आवृत्तिभेदेन नामभेदाः ।

'षडङ्गैकादशी रुद्रो रुद्र्येकादशरुद्रतः । एकादशभिरेताभिर्महारुद्रश्च कथ्यते । एकादशमहारुद्रैरति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

रुद्र इतीरितः। अस्यार्थः षडङ्गा षडङ्गन्याससहिता एकादशरुद्राणांसमाहारः एकादशीरुद्रः इत्युच्यते' इति दिनकरभट्टाः।

शतरुद्रीये एकादशाऽनुवाकाः सन्ति। अनुवाका रुद्रपदेनोक्ताः।

रुद्रः	१	आवृत्या।
रुद्री	११	एकादशाऽऽवृत्तिभिः।
❀महारुद्रः	१२१	एकविंशत्युत्तरशताऽऽवृत्तिभिः।
अतिरुद्रः	१३३१	एकत्रिंशदुत्तरत्रयोदशशताऽऽवृत्तिभिः।

रुद्राऽभिषेकसंकल्पाः।

स्वयंकरणे अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माऽहं सकलपापक्षयार्थं रुद्र (१ आवृत्ति) पाठेन जलधारया सदाशिवस्याऽभिषेकं करिष्ये।

ब्राह्मणद्वाराकरणे अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माऽहं ज्वरनिवृत्यर्थं रुद्री (११ आवृत्तयः) पाठेन जलधारया सदाशिवस्याऽभिषेकं करिष्ये, तत्कर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाऽक्षतपूगीफलैस्त्वामहं वृणे।

❀ नेपालदेशे महारुद्रं लघुरुद्री इति कथयन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

कृतस्य रुद्रीपाठपूर्वकसदाशिवाऽभिषेककर्मणः साङ्गफलप्राप्तये इमां दक्षिणामित्यादि ।

अमुकगोत्रोऽमु०शर्माऽहं गृहे महामारीप्रवेशाऽभावार्थं महारुद्र (१२१ आवृ०) पाठेन जलधारया सदाशिवस्याऽभिषेकं करिष्ये; तत्कर्मकर्तुं नानागोत्रान्नानाशर्मणो ब्राह्मणानेभिश्चन्दनाऽक्षतपुष्पपूगीफलैर्युष्मानहं वृणे । दक्षिणाद्रव्यमादाय कृतस्य महारुद्रपाठपूर्वकसदाशिवाऽभिषेककर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतं चन्द्रदेवताकं नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य सम्प्रददे तत्सन्नमम इत्यादि ।

वेदाऽनधिकारिणो यजमानस्यकर्तृत्वेतु अमुकगोत्रोऽमुकप्रवरोऽमुकनामधेयोऽहं ज्वराऽतीसारनिवृत्यर्थं ब्राह्मणद्वारा महारुद्रपाठेन जलधारया सदाशिवस्याऽभिषेकं करिष्ये, तत्कर्मकर्तुमित्यादि । ब्राह्मणद्वारेतिपदप्रक्षेपेण सङ्कल्पं कुर्यात् ।

अमुकशर्माऽनेकजन्मोपार्जितपापनाशपूर्वकंज्वराऽतीसारादि नानारोगनिवृत्यर्थमपमृत्युनिरसनपुरःसरं दीर्घायुरारोग्यावाप्तयेऽतिरुद्र (१३३१ आवृ०) पाठेन जलधारया सदाशिवस्याऽभिषेकं करिष्ये, तत्कर्मकर्तु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

न्नानागोत्रान्नानाशर्मणो ब्राह्मणानेभिश्चन्दनाऽक्षत-पुष्पपूगीफलैर्युष्मानहं वृणे ।

कृतस्याऽतिरुद्रपाठपूर्वकसदाशिवाऽभिषेककर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतखण्डं चन्द्रदेवताकं नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य सम्प्रददे तत्सन्नमम इत्यादि ।

रुद्राभिषेकस्य पापक्षय, व्याधिविमोक्ष, जीवन, श्री, शान्ति, पुष्टि, तुष्टि, मोक्षादीनिफलानि । तत्रफलाऽवत्योरनुसारेण सङ्कल्पवाक्यं रचयेत् ।

ग्रहाणांस्तोत्रस्य पाठे संकल्पाः ।

अहं जन्मलग्नाद्वर्षलग्नाद्गोचराद्वाऽमुकस्थान-स्थितेन महादशाऽधिपतिनाऽन्तर्दशाऽधिपतिना वा सूर्यग्रहेण सूचितसूच्यमानसूचयिष्यमाणनिखिलाऽरिष्ट-निवृत्तिपूर्वकं शुभस्थानावस्थितिजन्यशुभफलप्राप्त्यर्थं सूर्यग्रहप्रीतये आदित्यहृदयस्तोत्रेयदावृत्ति पाठं करिष्ये इतिस्वयंकरणे ।

ब्राह्मणद्वाराकरणे । चन्दनपुष्पाऽक्षतपूगीफला-न्यादाय देशकालकीर्तनान्ते अहं जन्मलग्ना०—प्राप्त्यर्थंसूर्यप्रीतये आदित्यहृदयस्तोत्रेयदाऽऽवृत्तिपाठा-र्थममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाऽक्षत-पूगीफलैस्त्वामहं वृणे इति वृणुयात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पाठसमाप्तौ दक्षिणाद्रव्यमादाय ब्राह्मणद्वारा कृतस्याऽऽदित्यहृदयस्तोत्रेयदाऽऽवृत्तिपाठस्य साङ्गफलप्राप्तये इमां दक्षिणां रजतं चन्द्रदैवतं ताम्रखण्डं सूर्यदैवतममुकगोत्रायेत्यादि दद्यात् ।

सोमादिस्तोत्रपाठे सूर्यपदस्थाने सोमादिपदाऽऽवापेन संकल्पं रचयेत् ।

योगिनीनां स्तोत्रस्य पाठे संकल्पः ।

अहं महादशास्वामिन्या (अन्तर्दशास्वामिन्यावा) ऽमुकयोगिन्या सूचितसूच्यमानसूचयिष्य माणसकलाऽरिष्टनिवृत्तिपूर्वकं शुभफलप्राप्तये ऽमुकयोगिनीप्रीतयेऽमुकयोगिनीस्तोत्रेयदावृत्तिपाठं करिष्ये इतिस्वयंकरणे ।

ब्राह्मणद्वाराकरणेतु चन्दनपुष्पाऽक्षतपूगीफलान्यादाय अहं महादशा० योगिनीस्तोत्रे यदावृत्ति पाठार्थममुकगोत्रममुकशर्माणं ब्राह्मणं चन्दनपुष्पाऽक्षतपूगीफलैस्त्वामहं वृणे इति वृणुयात् ।

दक्षिणाद्रव्यमादाय ब्राह्मणद्वाराकृतस्याऽमुकयोगिनीस्तोत्रे यदावृत्तिपाठकर्मणः साङ्गफलप्राप्तये रजतं चन्द्रदेवताकं ताम्रखण्डं सूर्यदैवतं वा अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणायेत्यादि दद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

जपेसंकल्पाः ।

ग्रहाणाम् ।

अहं जन्मलग्नादमुकस्थानस्थितेन वर्षलग्नादमुकस्थानस्थितेन गोचरादमुकस्थानस्थितेनाऽमुक ग्रहेण सूचितसूच्यमानसूचयिष्यमाणसकलाऽरिष्ट निवृत्तिपूर्वकं शुभस्थानाऽवस्थितिजन्यशुभफलप्राप्तये ऽमुकग्रहप्रीत्यर्थं वैदिकमन्त्रस्य द्वादशसहस्रजपं करिष्ये इति ।

❀ब्राह्मणद्वाराजपकरणे जन्मलग्नादमुकस्थानस्थितेन वर्ष०—जपं करिष्ये तत्कर्मकर्तुममुकगोत्र ममुकशर्माणं ब्राह्मणमेभिश्चन्दनाऽक्षतपुष्पपूगीफलैस्त्वामहं वृणे इति वृणुयात् ।

दक्षिणाद्रव्यं सम्पूज्याऽऽदाय ब्राह्मणद्वाराकृतस्य द्वादशसहस्राऽमुकग्रहवैदिकमन्त्रजपस्य साङ्गफलप्राप्तये इदं रजतखण्डं चन्द्रदेवताकममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम ।

अहं महादशेशेनाऽन्तर्दशाऽधिपतिना शनिना सूचितेत्यादि ।

तान्त्रिकमन्त्रजपे 'वैदिक' पदस्थाने 'तान्त्रिक' पदप्रक्षेपेण सङ्कल्पवाक्यं रचनीयम् ।

❀ "उपवासो व्रतं होमस्तीर्थस्नानजपादिकम् । विप्रैः सम्पादितं यस्य सम्पन्नं तस्य तत्फलम्" इति त्रिस्थलीसेतौ धर्मविवृतौ ।

Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

योगिनीनाम् ।

अहं उल्कया सूचितसूच्यमानसूचयिष्यमाणसकलाऽरिष्टनिवृत्यर्थमुल्कायोगिनीप्रीतये तान्त्रिकमन्त्रस्य पञ्चविंशतिसहस्रजपं करिष्ये, तत्कर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनेत्यादि ।

दक्षिणाद्रव्यमादाय अहं उल्काप्रीत्यर्थं ब्राह्मण द्वाराकृतस्य पञ्चविंशतिसहस्रतान्त्रिकमन्त्रजपकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतं चन्द्रदेवताकममुकगोत्रायेत्यादि दद्यात् ।

अन्तर्दशायाम् । उल्कान्तर्गतभ्रामर्या सूचितसूच्यमानसूचयिष्यमाणेत्यादि ॥

प्रत्यङ्गवीदानस्य सप्रयोगः संकल्पः ।

कर्ता कृतनित्यक्रियः प्राङ्मुख उपविश्याऽऽचम्य कर्मपात्रं कृत्वा देशकालौ सङ्कीर्त्य अहं पृथ्वीदान फलसमफलसर्वपापक्षयकामो गोदानं प्रतिपादयिष्ये इति प्रतिज्ञाय । उदङ्मुखं ब्राह्मणं सम्पूज्य, हेमाद्रि प्रभृतिनिबन्धधृतभारतादिप्रोक्तदोषरहितां तदुक्तगुणां धृताऽलङ्कारां गां प्राङ्मुखीमवस्थाप्य, गोभ्यो यज्ञाः प्रवर्तन्ते गोभ्यो देवाः समुत्थिताः । गोभिर्वेदाः समुद्गीर्णाः सषडङ्गपदक्रमाः । 'सर्वपापहरा धेनुः सर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

मङ्गलदायिनी। संसारोत्तारिणी यस्माद्दानपुण्यं ददा तु मे' इति सम्पूज्य। गोरङ्गेषु देवानावाह्य पूजयेत्। शृङ्गमूले ब्रह्मविष्णू आवाहयामि ब्रह्मविष्णुभ्यांनमः १ शृङ्गाग्रे सर्वाणितीर्थान्यावाहयामि सर्वेभ्यस्तीर्थेभ्यो नमः २ शिरोमध्ये शिवमावाहयामि शिवायनमः ३ ललाटे देवीमावाहयामि देव्यैनमः ४ नासावंशे षण्मुखमावाहयामि षण्मुखायनमः ५ नासापुटयोः कम्बलाश्वतरौ आवा० क० ताभ्यांनमः ६ कर्णयोः अश्विनावावाहयामि अश्विनभ्यांनमः ७ चक्षुषोः शशिभास्करावावाहयामि शशिभ्यान्नमः ८ दन्तेषु वायूनावाहयामि वायुभ्यां० ९ जिह्वायां वरुणमावाहयामि वरुणायनमः १० हुङ्कारे सरस्वतीमावाहयामि सरस्वत्यैनमः ११ गण्डयोः पक्षमासावावाहयामि पक्षमासाभ्यान्नमः १२ ओष्ठयोः सन्ध्येआवाहयामि सन्ध्याभ्यां० १३ ग्रीवायाम् इन्द्रमावाहयामि इन्द्रायनमः १४ कुक्ष्योः रक्षांसि आवाहयामि रक्षोभ्योन० १५ उरसि साध्यानावाहयामि साध्येभ्योनमः १६ पादेषु धर्ममावाहयामि धर्मायनमः १७ जङ्घासु अधर्ममावाहयामि अधर्मायनमः १८ खुरमध्ये गन्धर्वानावहयामि गन्धर्वेभ्योनमः १९ खराग्रे पन्नगानावाहयामि पन्नगेभ्योनमः २० खराणां पश्चिमा-

National Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ग्रेषु अक्षरस आवाहयामि अप्सरोभ्योनमः २१ पृष्ठे एकादशरुद्रानावाहयामि ऐकादशरूद्रभ्यो न० २२ सर्वसन्धिषु वसूनावाहयामि वसुभ्योनमः २३ श्रोण्योः पितॄनावाहयामि पितृभ्यो० २४ लांगूले सोममावाह यामि सोमाय० २५ गुह्ये आदित्यरश्मीनावाहयामि आदित्यरश्मिभ्योनमः २६ गोमूत्रे गङ्गामावाहयामि गङ्गायैनमः २७ गोमये यमुनामावाहयामि यमुनायै नमः २७ क्षीरे सरस्वतीमावाहयामि सरस्वत्यै० २९ दध्नि नर्मदामावाहयामि नर्मदायैनमः ३० सर्पिषि हुतासनमावाहयामि हुता०यनमः ३१ रोमसु अष्टा-विंशतिदेवकोटीरावाहयामि अष्टाविं० भ्योनमः ३२ उदरे पृथिवीमावाहयामि पृथिव्यै० ३३ स्तनेषु सा-गरानावाहयामि सागरेभ्योनमः०३४ इति सम्पूज्य ।

गोपुच्छं सकुशोदकेन करेणादाय देशकाल-कीर्तनान्ते अहं पृथ्वीदानफलसमफल सर्वपाप क्षयकाम इमां गां स्वर्णतिलकां सुवर्णशृंगीं रौप्यखुरां ताम्रपृष्ठां घण्टाग्रैवेयां मुक्तालाङ्गूलां कांस्योपदोहां सितवस्त्रद्वयोपेतां रुद्रदेवत्याममुकगोत्रायाऽमुकश-र्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे तत्स-न्नमम इति विप्रकरे कुशान्दत्वा अञ्जलिं वद्ध्वा 'या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता । धेनुरूपेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

सा देवी मम पापं व्यपोहतु ॥ देहस्था या च रुद्राणी शङ्करस्यच या प्रिया। विष्णोर्वक्षसि या लक्ष्मी स्वाहा या च विभावसोः ॥ चन्द्राऽर्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये। चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ॥ लक्ष्मीर्या लोकपालानां साधेनुर्वरदा मम। स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां तथा। सर्वपापहरा धेनुस्तस्माच्छीरक्षयास्तुमे। पूजिताऽसि वशिष्ठेन विश्वामित्रेण धीमता। सुरभे हर मे पापं यन्मया दुष्कृतं कृतम्। गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवांमध्ये वसाम्यहम्। गावः सुरभयो नित्यं गावो गुग्गुलगंधिकाः ॥ गावः प्रतिष्ठाभूतानां गावः स्वस्त्ययनं महत्। अन्नमेव परङ्गावो देवानां हविरुत्तमम्। पावनं सर्वभूतानां रक्षन्ति च वहन्ति च। हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि। ऋषीणामपि होतॄणां गावो होमे प्रतिष्ठिताः। सर्वेषामेवा भूतानां गावः शरणमुत्तमम्। गावः पवित्रं परमं गावो मङ्गलमुत्तमम्। गावः सर्वस्य लोकस्य गावो धन्याः सवाहनाः। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एवच। नमो ब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधाकृतम्। एकत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति। गावो मामु-तिष्ठन्तु हेमशृङ्ग्यः पयोमुचः। सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा। गावै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा। गावोऽस्माकं वयं तासां यतो गावस्ततो वयम्' इतिप्रार्थ्य। दानप्रतिष्ठां सुवर्णं (तन्मूल्य-द्रव्यं वा) गृहीत्वा कृतस्य सालङ्कारगवीदानकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां सुवर्णमग्निदैवतममुक गोत्रायेत्यादि दत्वा, धेनुं द्विजंच प्रदक्षिणीकृत्य। गोपुच्छोदकेन, मातृपक्षाश्च ये केचिद्येकेचित्पितृ-पक्षकाः। 'गुरुश्वसुरबन्धूनां ये कुलेषु समुद्भवाः। ये चान्ये लुप्तपिण्डावै पुत्रदारविवर्जिताः। ते सर्वे तृप्ति मायान्तु गोपुच्छोदकतर्पणैः' इति तर्पणं कृत्वा। गवे ग्रासम्। 'सौरभेयि जगत्पूज्ये विश्वमातरघापहे। मया दत्तमिमं ग्रासं ग्रस त्वं विष्णुवन्दिते' इतिमन्त्रेण दत्वा किञ्चिदनुव्रजेत्। विप्रश्च गोपुच्छोदकेन यज-मानमभिषिच्याऽऽशिषं दद्यात्। ततः कर्ता अच्छिद्र-प्रार्थनमीश्वरार्पणं च कृत्वा कर्म समापयेत्। इतिगो-दानप्रयोगः॥

नियमलोपप्रायश्चित्तगोमूल्य-दानसंकल्पः।

कर्मपात्रं कृत्वा ब्राह्मणं गोमूल्यद्रव्यं च सं पूज्य सकुशोदकेन पाणिना देयं स्पृष्ट्वा अहं अवश्यकर्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

व्यनियमाऽकरणजन्यप्रत्यवायपरिहारपूर्वकं सद्योदेह-विशुद्धये प्राजापत्यप्रत्याम्नातगोमूल्यं रजतं चन्द्र-दैवतं (ताम्रखण्डंसूर्यदैवतंवा) अमुकगोत्रायाऽमुक-शर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम । इति कुशान् विप्रहस्ते दत्वा प्रार्थयेत् । 'कपिले सर्वदेवानां पूजनी यासि रोहिणी । सर्वदेवमयी यस्मादतः शान्ति प्रयच्छ मे' इतिप्रार्थ्य दानप्रतिष्ठाद्रव्यमादाय कृतस्य प्राजा-पत्यप्रत्याम्नातगवीमूल्यरजतखण्डदानकर्मणः साङ्ग-फलप्राप्तये इदं सुवर्णनिष्क्रयीभूतं ताम्रखण्डं सूर्य देवताकममुकगोत्रायाऽमुकशर्मणे ब्राह्मणायेत्यादि दद्यात् । ब्राह्मणश्च द्यौः शन्तिरित्यभिषेकं कृत्वा गोमूल्यद्रव्यं गृह्णीयात् ।

गोमूल्यदाने सर्वत्र पूर्वं सङ्कल्पितकुशदानं, ततः प्रार्थना, ततोदानप्रतिष्ठादानं. ततोऽभिषेकस्ततो-ऽच्छिद्रप्रार्थनेश्वरार्पणे इति क्रमः ॥

चातुर्मास्येगृहीतनित्यस्नानादिव्रतलोप-प्रायश्चित्तगोमूल्यदानसंकल्पः ।

अहं चातुर्मास्ये गृहीतनित्यस्नानादि व्रतांना-चरणजन्यप्रत्यवायपरिहारपूर्वकं तदनुष्ठानजन्यसक-लफलावाप्तये इदं गोमूल्यं रजतं चन्द्रदैवतमित्यादि दत्वा प्रार्थ्य दानप्रतिष्ठां दद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

व्रताऽऽचरणाऽशक्तौ प्रायश्चित्तानुकल्पगोमूल्यदानसंकल्पः ।

अहं नियमपूर्वकहरितालिकाव्रताऽनाचरणजन्य प्रत्यवायपरिहारपूर्वकं नियमपूर्वकव्रताऽऽचरणजन्य सम्पूर्णफलावाप्तये इदं गोमूल्यद्रव्यं रजतं चन्द्रदेवताकं (ताम्रखण्डं सूर्यदेवताकं वा) अमुकगोत्रायामुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इतिकुशान् विप्रहस्ते दत्वा प्रार्थ्य दानप्रतिष्ठांदद्यात् ।

रोगावस्थाकालिकादिनियमच्युतिप्रायश्चित्तगोमूल्यदानसंकल्पः ।

रोगनिर्मुक्तः स्नातः शुद्धवस्त्रः कर्ता ब्राह्मणं देयं च सम्पूज्य देयं स्पृष्ट्वा अहं रोगावस्थायामवश्यकर्तव्य शौचस्नानशुद्धवस्त्रपरिधान नि त्यकर्मानुष्ठानलोपाऽशुचिस्पृष्टभोजनादिरूपस्वजातिमर्यादापरिच्युतिजान्यप्रत्यवायपरिहारार्थमिदं प्राजापत्यानुकल्प गोमूल्य द्रव्यं रजतखण्डं चन्द्रदेवताकममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इति दत्वा, प्रार्थ्य, दानप्रतिष्ठां दद्यात् ।

सूतिकाऽवस्थाकालिकनियमच्युतिगोदाने 'रो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

गाऽवस्था' पदस्थाने 'सूतिकावस्था' पदं प्रक्षिपेत्, अन्यत्सर्वं समानम् ।

सन्ध्यावन्दनविस्मृतिप्रायश्चित्तगोदानसङ्कल्पे सन्ध्यावन्दनविस्मृतिजन्यप्रत्यवायपरिहारार्थमित्यादि ।

प्रवाससमयभवाऽऽचारपरिच्युतिप्रायश्चित्तगोदाने प्रवाससमयभवाऽऽचारपरिच्युतिजन्यप्रत्यवाय परिहारार्थमित्यादि ।

भ्रूणहत्याप्रायश्चित्तम् ।

भ्रूणो गर्भः 'भ्रूणोऽर्भकेस्त्रैणगर्भे' इत्यभिधानात् तस्य हत्या वधः । यज्जातिपुरुषवधे यत्प्रायश्चित्त मुक्तं तज्जातिगर्भवधे तच्चरेत् । 'गर्भहाच यथावर्णं' इति याज्ञवल्क्योक्तेः । ततश्च मृगादिगर्भवधे गर्भवधप्रायश्चित्तमेकम् । गर्भवधेगर्भिणीवधस्य नान्तरीकतया गर्भिणीवधप्रायश्चित्तामपरमिति मृगादिगर्भवधे सर्वत्रप्रायश्चित्तद्वयम् 'प्रतिनिमित्तं नैमित्तिकमावर्तते' इति न्यायात् । तत्र गर्भिण्यामृग्यावधे वत्सतरीद्वयदानम् । 'क्रव्यादस्तु मृगान्हत्वा धेनुन्दद्यात्पयस्विनीम् । अक्रव्यादो वत्सतरीमुष्ट्रंहत्वा तु कृष्णलम्' इति मिताक्षराधृत मनुवचनात् । मृगाः आरण्याः पशवः असतिवाधकेसर्वत्रेदं प्रवर्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

क्रव्यादो मांसभक्षिणः । गर्भिण्या वाराह्या वधे घृत-घटद्वयदानम् । 'कोले घृतघटोदेयं' इति तत्रैव मनुवचनात् । यद्यपि "पादउत्पन्नमात्रेतु द्वौ पादौ दृढ़तां गते । पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् । अङ्गप्रत्यङ्गसम्पूर्णे गर्भे चेतः समन्विते । द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिः' इतितत्र षट्त्रिंशन्मते गर्भाऽवस्थातारतम्येन प्रायश्चित्ततारतम्यमुक्तम् । तथापि प्रायश्चित्तस्य स्वल्पतयावत्सतर्या विभागाऽसम्भवेनचा-विशेषेण समग्रमेव प्रायश्चित्तमभिहितम् । अत्र गोपदमुपलक्षणम् । गर्भान्तरेऽपि आकाङ्क्षाया अनिवृत्तेः ।

खड्गिन्या गर्भिण्यावधेतु प्रत्येक गर्भस्य तन्मा-तुश्च द्व द्वे इति कृच्छ्रचतुष्टयम् । एतच्चप्रायश्चित्ते-न्दुशेखरोक्तम् ।

भ्रूणहत्याप्रायश्चित्तगवादिदान-सांकल्पः ।

गर्भिण्या मृग्यावधे कर्ता वत्सतरीद्वयं विप्रञ्च सम्पूज्य सकुशोदकेन पाणिना पुच्छं गृहीत्वा देश-कालकीर्तनान्ते अहं मृगीगर्भस्य मृग्याश्च वधेन जनितस्य प्रत्यवायस्य परिहारार्थमिदं वत्सतरीद्वयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

रुद्रदैवतममुकगोत्रायेत्यादि दत्वा–कपिले सर्वदेवानामिति प्रार्थ्य दान प्रतिष्ठाद्रव्यमादाय कृतस्य वत्सतरीद्वयदानकर्मणः साङ्गफलप्राप्तये रजतखण्डं चन्द्र दैवतं (ताम्रखण्डसूर्यदैवतं वा) अमुकगोत्रायेत्यादि दद्यात्। मूल्यदानेतु वत्सतरीद्वयमूल्यभागद्वयं विप्रञ्च सम्पूज्य देयंस्पृष्ट्वा अहं मृगीगर्भस्यमृग्या०–हारार्थ मिदं वत्सतरीद्वयमूल्यभागद्वयं रजतं चन्द्रं दैवतममुकगोत्रायेत्यादि दत्वा, प्रार्थ्य, दानप्रतिष्ठां दद्यात्।

वराह्यावधे घृतकुम्भद्वयं विप्रञ्च सम्पूज्य देयं स्पृष्ट्वा अहं वराहीगर्भस्य वराह्याश्च वधेन जातस्य प्रत्यवायस्य परिहारार्थमिदं घृतकुम्भद्वयं मृत्युञ्जय देवताकममुकगोत्रायेत्यादि दत्वा प्रार्थयेत्। 'कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परम्। आज्यं तद्घटदानेन मम पापं विनश्यतु' इति प्रार्थ्य दानप्रतिष्ठां दद्यात्। खड्गिन्यावधे प्रजापत्यचतुष्टयं कर्तुमशक्तः गोमूल्यभागचतुष्टयं विप्रञ्च सम्पूज्य अहं खड्गिनी गर्भस्य खड्गिन्याश्च वधेन जनितस्य प्रत्यवायस्य परिहारार्थमिदं गोमूल्यरजतभागचतुष्टयं चन्द्रदैवतं नानागोत्रेभ्य इत्यादि दत्वा, प्रार्थ्य, दानप्रतिष्ठां दद्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

उपवासादिव्रते साद्गुण्यफलक गोमूल्यदान संकल्पः ।

दयं विप्रं च सम्पूज्य देयं स्पृष्ट्वा अहं हरिशयन्येकादश्युपवासव्रतस्य साङ्गफलप्राप्तये इदं गोमूल्यद्रव्यं रजतं चन्द्रदेवताकममुकगोत्रायेत्यादि दत्वा, प्रार्थ्य, दानप्रतिष्ठान्दद्यात् ।

दुःस्वप्नदर्शने गोमूल्यदानसंकल्पः ।

अहं दुःस्वप्नदर्शनसूचितसकलाऽरिष्टनाशपूर्वकं शुभफलावाप्तये इदं गोमूल्यद्रव्यं रजतखण्डं चन्द्रदेवताकमित्यादि दत्वा, प्रार्थ्य, दानप्रतिष्ठान्दद्यात् ।

कार्तिकमासगृहीतनियमसाद्गुण्य-फलकगोमूल्यदान संकल्पः ।

अहं कार्तिकमासे कृतस्य स्नानतुलसीपूजनदीपदानादिकर्मणः साङ्गफलप्राप्तये इदं गोमूल्यद्रव्यं रजतं चन्द्रदेवताकममुकगोत्रायेत्यादि दत्वा प्रार्थ्य, दानप्रतिष्ठां दद्यात् ।

व्रतानिष्क्रयदानसंकल्पः ।

(प्रतिनिधीद्वारावतादिकरणे)

रोगवार्द्धक्यादिनोपवासव्रतादिकर्तुमशक्ता ब्राह्मणादिं प्रतिनिधिमुपवासव्रतपूजादिं कारयन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

तत उपवासादि सुकृतं निष्क्रीणन्ति। तत्र हरितालिकायां केनचिद्ब्राह्मणेनोपवासपूजादि कारयित्वा पारणादिने प्रातर्देवविसर्जनान्ते ब्राह्मणं निष्क्रय द्रव्यञ्च सम्पूज्याऽऽदाय देशकालकीर्तनान्ते अहं प्रतिनिधीभूय हरितालिकाव्रतोपवासपूजादिकारिणे ऽमुकगोत्रायाऽमुकशर्मणेब्राह्मणाय तद्व्रतनिष्क्रयं चन्द्रदेवताकं रजतखण्डं दक्षिणां सम्प्रददे इति दद्यात्। ब्राह्मणोपि करेण जलमादाय अहं हरितालिकाव्रतोपवासपूजादिजनितं सुकृतममुक गोत्रायै अमुकदेव्यै समर्पयामि इति जलं यजमानाया हस्ते दद्यात्। एवं व्रतान्तरेष्वपि प्रतिनिधिस्थापने 'हरितालिका' पदस्थाने व्रतान्तरनामोल्लिख्य संकल्पनीयम्।

आमान्नदान संकल्पाः।

व्रताऽऽचरणाःशक्तावामान्नदानसंकल्पः।

कर्ता ब्राह्मणं सोपकरणमामान्नंचाऽर्चयित्वा-अन्नं स्पृष्ट्वा अहं जन्माऽष्टमीव्रताऽनाचरणजन्य प्रत्यवायपरिहारपूर्वकं सनियमव्रताऽनुष्ठानजन्यपूर्णफलावाप्तये इदं विदलितमाषमुद्गाऽढकीलवणहरिद्राचूर्णजीरकरक्त कृष्णमरीचमेथिकाहिंगु घृततैलदारु अम्लव्यञ्जनाऽर्द्रकशर्कराशाकफलमूलादियुतमामान्नंप्र-

A366
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

जापतिदेवताकममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इति दत्वा । अञ्जलिंबध्वा 'अन्नेन जायते विश्वं प्राणिनां प्राणरक्षणम् । तण्डुलावैश्वदेवत्याः पाकेनान्न भवन्ति ये । पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि । तस्मात्तण्डुलदानेन प्रीयन्तां विश्वदेवताः' इति प्रार्थ्य । दक्षिणाद्रव्यं सम्पूज्याऽऽदाय कृतस्य सोपकरणाऽऽमान्नदानकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतं चन्द्रदेवताकं (ताम्रखण्डं सूर्यदेवताकं वा) अमुकगोत्रायेत्यादि दद्यात् ।

एवं व्रतान्तरेषु 'जन्माष्टमी' पदस्थाने हरितालिका, शिवरात्रिरामनवमीत्यादि व्रतान्तरनामोल्लिख्य सङ्कल्पवाक्यं रचनीयम् ।

विषुवच्छान्त्यर्थतण्डुलदानसंकल्पः ।

देशकालकीर्तनान्ते गोत्रस्य शर्मणो मम स्वनक्षत्रस्यविषुवत्पुरुषवामकरपातजनिताऽरिष्टनिवृत्तये इमांस्तण्डुलान्प्रजापतिदेवताकानमुकगोत्रायेत्यादि दत्वा अन्नेनजाय०--वन्तिये । पावनाःस०-विश्वदेवताः इति प्रार्थ्य दानप्रतिष्ठांदद्यात् ।

उपवासादिव्रते साद्गुण्यफलकसोपकरणाऽऽमान्नदानसंकल्पः ।

अहं हरिशयन्येकादश्युपवासव्रतस्य साङ्गफलप्राप्तये इदं सोपकरणामान्नं प्रजापतिदेवताकममु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

कगोत्रायेत्यादि दत्वा अन्नेनजायतेविश्वमित्यादिना प्रार्थ्य दानप्रतिष्ठां दद्यात् ।

ग्रहाणां देयानि वस्तूनि ।

सूर्यादीनां वैषम्ये दानान्युक्तानि दानचन्द्रिकायां ज्योतिःसारे । कौसुम्भवस्त्रं गुडहेमताम्रं माणिक्यगोधूमसुवर्णपद्मम् । सवत्सगोदानमितिप्रणीतं दुष्टाय **सूर्याय** मसूरिकाश्च ॥ १ ॥

घृतकलशं सितवस्त्रं दधि शंख मौक्तिकं सुवर्णं च । रजतं दद्याच **चन्द्रा**ऽरिष्टे तच्छान्तये त्वरितम् । २

प्रवालगोधूममसूरिकाश्च वृषश्च ताम्रः करवीर पुष्पम् । आरक्तवस्त्रं गुडहेमताम्रं दुष्टाय **भौमाय** सरक्तचन्दनम् ॥ ३ ॥

नीलं वस्त्रं मुद्गदानं **बुधाय** रत्नं पाची❀ दासिका हेम सर्पिः । कांस्यं दन्तं कुञ्जरस्याऽथमेषे-रौप्यं सर्वं पुष्पजात्यादिकं च ॥ ४ ॥

अश्वः सुवर्णं मधु पीतवस्त्रं सपीतधान्यं लवणं सपुष्पम्† । सशर्करं तद्रजनी‡ प्रयुक्तं दुष्टाय शान्त्यै गुरुवे प्रणीतम् ॥ ५ ॥

❀ पाची मरकतम् । † पुष्पं पुष्परागः । ‡ रजनी हरिद्रा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

चित्रवस्त्रमपिदानवाऽर्चिते (शुक्रे) दुष्टगे मुनिवरैः प्रणोदितम् । तण्डुलं घृतसुवर्णरूप्यकं वज्रकं परिमलो धवलोऽश्वः ॥ ६ ॥

नीलकं महिषं वस्त्रं कृष्णं लोहं सदक्षिणम् । [1]विश्वामित्र्यायुतं दद्याच्छनि दोषप्रशान्तये ॥७॥

राहौ दानं कृष्णमेषो गौमेदो लोहकम्बलौ । सुवर्णनागरूपं च सतिलं ताम्रभाजनम् ॥८॥

केतौ वैदूर्यममलं तैलं मृगमदस्तथा । ऊर्णा तिलैस्तुसंयुक्ता दद्यात् क्लेशापनुत्तये ॥९॥ इति ॥

लघुपाराशर्याम् ।

माणिक्यगोधूमसवत्सधेनुं कौसुम्भवस्त्रं घृत हेमताम्रम् । आरक्तचैलेनधृतं धनंवा वदन्ति दानानि विरोचनाय ॥ १ ॥

शङ्खं सपात्रं सितवामरंच कर्पूरमुक्ताफलशुभ्रवस्त्रम् । युगोपयुक्तं वृषभं च रौप्यं चन्द्राय दद्याद्घृतपूर्णकुम्भम् ॥ २ ॥

प्रवालगोधूममसूरिकाश्च वृषोरुणोप्याढकका सुवर्णम् । आरक्तवस्त्रं करवीरपुष्पं ताम्रञ्च भौमाय वदन्ति दानम् ॥३॥

---

१ 'दद्याच्च दक्षिणायुक्तं शनिदोष्ट्यप्रशान्तये' इति पीयूषधारायां पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

नीलं च चैलं कलधौतकांस्यं मुद्गाऽऽज्यगारुत्मत-सर्वपुष्पम् । दासी च दन्तो द्विरदस्य नूनं वदन्ति दानं विधुनन्दनाय ॥४॥

शर्करा च रजनी तुरङ्गमः पीतधान्यमपि पीतमम्बरम् । पुष्परागनवरत्नकाञ्चनं प्रीयते सुरगुरोः प्रदीयताम् ॥५॥

चित्राम्बरं शुभ्रतरस्तुरङ्गो धेनुश्च वज्रं रजतं सुवर्णम् । सतण्डुलाऽऽज्योत्तमगन्धयुक्तं वदन्ति दान भृगुनन्दनाय ॥६॥

माषाश्च तैलं विमलेन्द्रनीलं तिलाः कुलत्थाः महिषी च लोहम् । गौश्चासितेति प्रवदन्ति दानं कृष्णाच दद्याद् रविनन्दनाय ॥७॥

गोमेदरत्नञ्च तुरङ्गमश्च सुनीलचैलादि सकम्बलञ्च । तिलाश्च तैलं खलु लोहयुक्तं स्वर्भानवे दानमिदं वदन्ति ॥८॥

वैदूर्यरत्नं सतिलं सतैलं सुकम्बलं चापि मदो मृगस्य । वस्त्रं हि केतोः परितोषवीजमुदीरितं दान मिदं मुनीन्द्रैः ॥९॥ इति ॥

धर्मसिन्धौ । माणिक्य गोधूम धेनु रक्तवस्त्र गुड हेम ताम्र रक्तचन्दन कमलानि रवेः ॥ १ ॥

वंशपात्रस्थतण्डुल कर्पूर मौक्तिक श्वेतवस्त्र घृतपूर्णकुम्भ वृषभाश्चन्द्रस्य ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रवाल गोधूम मसूरिका रक्तवृषभ गुड सुवर्ण रक्तवस्त्र ताम्राणि भौमस्य ॥ ३ ॥

नीलवस्त्र सुवर्ण कांस्य मुद्ग गारुत्मत दासी हस्तिदन्त पुष्पाणि बुधस्य ॥ ४ ॥

पुष्परागमणि हरिद्रा शर्कराऽश्व पीतधान्य पीत वस्त्र लवण सुवर्णानि सुरगुरोः ॥ ५ ॥

चित्रवस्त्र श्वेताश्व धेनु वज्रमणि सुवर्ण रजत गन्ध तण्डुलाः शुक्रस्य ॥ ६ ॥

इन्द्र नील माष तैल तिल कुलत्थ महिषी लोह कृष्णधेनवः शनेः ॥ ७ ॥

गोमेदाऽश्व नीलवस्त्र कम्बल तैल तिल लोहानिराहोः ॥ ८ ॥

वैदूर्य तैल तिल कम्बल कस्तूरी च्छाग वस्त्राणि केतो ॥ ९ ॥ इति ॥

ग्रहसम्बन्धिवस्तुदाने संकल्पाः ।

सूर्यस्य ।

देयं ब्राह्मणं च सम्पूज्य देयं स्पृष्ट्वा अहं जन्मलग्नाद्वर्षलग्नाग्दोचराद्वाऽमुकस्थानस्थितेन महादशाऽधिपतिना अन्तर्दशाधिपतिना वा सूर्यग्रहेण सूचितसूच्यमानसूचयिष्यमाणसकलारिष्टनिवृतिपूर्वकं तृतीये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

कादशादिशुभस्थानावस्थितिजन्यशुभफलप्राप्त्यर्थं;रक्त - वस्त्रं किन्नरदेवताकं, गुडं कुवेरदेवता कं, सुवर्णं वह्निदेवताकं, ताम्रं सूर्यदेवताकं, माणिक्यं समुद्रदेवताकं, गोधूमान्प्रजापतिदेवताकान्, पद्मपुष्पं लक्ष्मीदेवताकं, गां रुद्रदेवताकां, मसूरान्प्रजापतिदेवताकान्, करवीरपुष्पं लक्ष्मीदेवताकं सूर्यप्रीतये ऽमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इति दत्वा; रक्तंवस्त्रादे प्रार्थनां कृत्वा दानप्रतिष्ठाद्रव्यमादाय कृतस्य रक्तवस्त्रादिदानकर्मणः साङ्गफलप्राप्तये रजतं चन्द्रदेवताकं ताम्रं सूर्यदैवत वा अमुकगोत्रायेत्याद्युकृत्वा दद्यात् ।

चन्द्रस्य ।

देयं ब्राह्मणं च सम्पूज्य देयस्पृष्ट्वा, अहं जन्मलग्नात्—अन्तर्दशाऽधिपतिनावा चन्द्रग्रहेण सूचितसूच्यमानसूच०—प्राप्त्यर्थं; घृतकलशं मृत्युञ्जदेवताकं, सितवस्त्रं बृहस्पतिदेवताकं, दधि चन्द्रदेवताकं शङ्खं समुद्रदेवताकं, मौक्तिकं वरुणदेवताकं, सुवर्णं वह्निदेवताकं, रजतं चन्द्रदेवताकं, वंशपात्रस्थितांस्तण्डुलान् प्रजापतिदेवताकान्, श्रीखण्डखण्डं वनस्पतिदेवताकं कर्पूरं गन्धर्वदेवताकं चन्द्रप्रीतये ऽमुक गोत्रायेत्यादि दत्वा; घृतकलशसितवस्त्रादीनां प्रार्थनां कृत्वा,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

दानप्रतिष्ठाद्रव्यमादाय कृतस्य घृतकलशादिदान-कर्मणः साङ्गफलप्राप्तये रजतं चन्द्रदैवतमित्याद्युक्त्वा दद्यात् ।

भौमस्य ।

देयं ब्राह्मणञ्च सम्पूज्य, देयं स्पृष्ट्वा, अहंजन्म० अन्तर्दशाधिपतिना वा भौमग्रहेण सूचित०—प्राप्त्यर्थं प्रवालं वरुणदैवतं, गोधूमामसूरान्प्रजापति दैवतान्, रक्तवृषभं रुद्रदैवतं, करवीरपुष्पं लक्ष्मीदैवतं रक्तवस्त्रं किन्नरदैवतं, गुडं, कुबेरदैवतं, हेम वन्हिदैवतं ताम्रं सूर्यदैवतं, रक्तचन्दनं वनस्पतिदेवताकं भौम प्रीयतेऽमुकगोत्रायेत्यादिदत्वा, प्रवालगोधूमादीनां प्रार्थनां कृत्वा, दानप्रतिष्ठाद्रव्यमादाय कृतस्य प्रवालादिदानकर्मणः साङ्गफलप्राप्तयेरजतं०—त्याद्युक्त्वा दद्यात् ।

बुधस्य ।

देयं स्पृष्ट्वा अहं जन्मल०—अन्तर्दशाधिपतिना वा बुधग्रहेण सूचि०—प्राप्त्यर्थं नीलवस्त्रं बृहस्पति देवताकं मुद्गान् प्रजापतिदैवतान्, मरकतं समुद्रदैवतं, दासीं प्रजापतिदैवतां, हेम वन्हिदैवतं, घृत मृत्युअयदैवतं, कांस्यमग्निदैवतं गजदन्तं शिवदैवतं-मेषं वरुणदैवतं, रौप्यं चन्द्रदैवतं, सर्वाणिपुष्पाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

लक्ष्मीदैवतानि, हरितवस्त्रं बृहस्पतिदैवतं बुधप्रीतये ऽमुकगोत्रायेत्यादि दत्वा; नीलवस्त्रादीनां प्रार्थना कृत्वा; दान प्रतिष्ठा०–दाय कृतस्य नीलवस्त्रादिदान कर्मणः साङ्गफलप्राप्तये रजतं०–वतंवा ऽमुकगोत्रा-यैत्याद्युक्त्वा दद्यात् ।

बृहस्पतेः ।

देयं०—स्पृष्ट्वा, अहं जन्मलग्ना०–अन्तर्दशा-धिपतिना बृहस्पतिग्रहेण सूचित०–प्राप्त्यर्थमश्वं यमदैवतं, सुवर्णं वन्हिदैवतं, मधु यक्षदैवतं' पीत वस्त्रं बृहस्पति दैवतं, पीतधान्यं प्रजापतिदैवतं' ल-वणं समुद्रदैवतं, पुष्परागं समुद्रदैवतं, शर्करां मित्र दैवतां, हरिद्रां शिवदेवताकं बृहस्पतिप्रीतये ऽमु-कगोत्रायेत्यादि दत्वा; अश्वसुवर्णादीनां प्रार्थनां कृत्वा । दानप्रतिष्ठाद्रव्यमादाय कृतस्य हयादि दानकर्मणः साङ्गफलप्राप्तयेरजतं०—तंवा ऽमुक गोत्रायेत्याद्युक्त्वा दद्यात् ।

शुक्रस्य ।

देयं ब्राह्मणंच सम्पूज्य, देयं स्पृष्ट्वा, अहं जन्म-लग्नात्०–अन्तर्दशाधिपतिना वा शुक्रेण सूचित-सू०–प्राप्त्यर्थं चित्रवस्त्रं बृहस्पतिदैवतं, तण्डुलान्प्रजा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पतिदेवताकान्, घृतं मृत्युञ्जयदेवताकं, सुवर्णं वन्हि-दैवतं, रौप्यं चन्द्रदैवतं, हीरकं समुद्रदैवतं, सुगन्ध-वस्तु अप्सरोदैवतं, श्वेताश्वं यमदैवतं शुक्रप्रीतये ऽमुकगोत्रायेत्यादि दत्वा; चित्रवस्त्रादीनां प्रार्थनां कृत्वा; दानप्रतिष्ठाद्रव्यमादाय कृतस्यचित्रवस्त्रा-दिदानकर्मणः साङ्गफलप्राप्तये रजतं०—वाऽमुकगोत्रा येत्याद्युक्त्वा दद्यात् ।

शनैश्चरस्य ।

देयं ब्राह्मणंच सम्पूज्य देयं स्पृष्ट्वा अहं जन्म लग्ना०—अन्तर्दशाधिपतिना वा शनिग्रहेण सूचित सू०—प्राप्त्यर्थं, नीलमणिं समुद्रदैवतं, महिषं यमदैवतं, कृष्णवस्त्रं बृहस्पतिदैवतं, लोहं भैरव दैवतं,तिलमाष-कुलत्थान् प्रजापतिदैवतांस्तैलं राहु दैवतं, सुवर्णं वन्हि-दैवतं शनिप्रीतये ऽमुकगोत्रायेत्यादि दत्वा, नीलमणि-महिष्यादीनां प्रार्थनां कृत्वा, दानप्रतिष्ठाद्रव्यमादाय कृतस्य नीलमण्यादिदानकर्मणः साङ्गफलप्राप्तये०—गोत्रायेत्याद्युक्त्वा दद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

राहोः ।

देयं ब्राह्मणञ्च सम्पूज्य देयं स्पृष्ट्वा अहं जन्मलग्नात्०–अन्तर्दशाधिपतिना वा राहुग्रहेण सूचितसू०–प्राप्त्यर्थं कृष्णमेष वरुणदैवतं, गोमेदं समुद्रदैवतं, लौहं भैरवदैवतं, कम्बलं बृहस्पतिदैवतं, सुवर्णनिर्मितंसर्पं विश्वकर्मदैवतं तिलपूर्णताम्रपात्रं तिलान्प्रजापतिदैवतांस्ताम्रपात्रं विश्वकर्मदेवताकं, तैलं राहुदैवतं, माषान्प्रजापतिदेवताकान्, कृष्णवस्त्रं बृहस्पतिदेवताकं, राहुप्रीतये ऽमुकगोत्रायेत्यादि दत्वा, कृष्णमेषादीनां प्रार्थनां कृत्वा, दानप्रतिष्ठां दद्यात् ।

केतोः ।

देयं ब्राह्मणंच सम्पूज्य देयं स्पृष्ट्वा, अहं जन्मलग्नात०–अन्तरर्दशाधिपतिना वा केतुग्रहेण सूचीतसू०–प्राप्त्यर्थं वैदूर्यं समुद्रदैवतं, तैलं राहुदैवतं मृगमदमप्सरो दैवतं, ऊर्णां विष्णुदैवतां, तिलान्प्रजापतिदैवतान्, धूम्रवस्त्रं बृहस्पतिदेवताकमजं वन्हि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

देवताकं, माषन्प्रजापतिदेवताकान्, सुवर्णं वन्हि-देवताकं, खड्ग शक्रदैवतं, लवणं समुद्रदेवताकं केतु ग्रहप्रीतये ऽमुकगोत्रायेत्यादि दत्वा वैदूर्यादीनां०—प्रार्थनां कृत्वा दानप्रतिष्ठां दद्यात् ।

त्रिमधुदानसंकल्प ।

(योगिनीनाम्)

योगिनीजन्याऽशुभशान्तये पट्टवस्त्रताम्रपात्र-स्थत्रिमधुदानम् । पट्टवस्त्रं ताम्रपात्रस्थमधुरत्रयं ब्राह्मणञ्च सम्पूज्य, अहं महादशाश्वामिन्याऽन्तर्द-शाश्वामिन्या वा ऽमुकयोगिन्या सूचितसू०—र्वक-शुभफलवाप्तये पट्टवस्त्रं बृहस्पतिदैवतं, मधुयक्षदैवतं शर्करां मित्रदैवतां, घृतं मृत्युञ्जयदैवतं, ताम्रपात्रं विश्वकर्मदेवताकममुकगोत्रायेत्यादि दत्वा प्रार्थयेत् । यस्मात्पितृणां श्राद्धे त्वं प्रीतं मध्वऽमृतोद्भवम् । तस्मात्तव प्रदानेन रक्ष मां दुःखसागरात् ॥ अमृतस्य कुलोत्पन्न इक्षुस्तद्रस शर्करा । सूर्यप्रीतिकरा नित्य-मतः शान्तिं प्रयच्छ मे ॥ कामधेनोः समुद्भूतं देवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIB

नामुत्तमं हविः। आयुर्विवर्धनं पुंसामाज्यं पातु सदैव माम् इति प्रार्थ्य; दानप्रतिष्ठाद्रव्यमादाय कृतस्य पट्टवस्त्रताम्रपात्रस्थात्रिमधुदानप्रतिष्ठार्थं रजतं चन्द्रदैवतं ताम्रखण्डं सूर्यदैवतं वा ऽमुकगोत्रायेत्यादि दद्यात्।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अष्टादशपुराण, महाभारत, रामायण, हरिवंशपुस्तकदानोपयोगिचक्रम् ।

	पुराणनाम	उपकरणम्	मुख्यदेवता[*]	दानफलम्	दानकालः	† ग्रंथसंख्या
१	मत्स्यपुराणम्	हैममत्स्यो धेनुश्च	महेश्वरः	अखिलपृथ्वीदानफलम्	विषुवत्संक्रांतिः	१४०००
२	मार्कण्डेयपुराणम्	सौवर्णहस्ती	,,	पुण्डरीक यज्ञफलम्	कार्तिकीपूर्णिमा	९०००
३	ब्रह्मवैवर्तपुराणम्	गृहम्	,,	ब्रह्मलोकमहितत्व	माघीपूर्णिमा	१८०००
४	वायुपुराणम्	गुडधेनुर्दधि च	,,	पूतात्मकर्तृकैककल्पपर्यन्तशिव लोकप्राप्तिः	श्रावणीपूर्णिमा	२४०००
५	नारदपुराणम्	हेम	,,	पुनरावृत्तिरहितोत्तमसिद्धिप्राप्तिः	पूर्णिमा	२५०००
६	पद्मपुराणम्	तिलाः, स्वर्ण, कम लानि च	,,	अश्वमेधफलम्	ज्येष्ठपूर्णिमा	५५०००
७	लिंगपुराणम्	तिलधेनुः	,,	शिवसात्म्यप्राप्तिः	फाल्गुनीपूर्णिमा	११०००
८	कूर्मपुराणम्	हैमः कूर्मः	,,	गोसहस्रदानफलम्	अयनसंक्रांतिः	१७०००
९	स्कन्दपुराणम्	सुवर्णम्	,,	शैवपदप्राप्तिः	मकरसंक्रांतिः	८११००
१०	गरुडपुराणम्	सौवर्णहंसः	,,	शिवतुल्यपरमपदप्राप्तिः	विषुवत्संक्रांतिः	१९०००
११	वामनपुराणम्	धेनुर्भूमिश्च	विष्णुः	वैष्णवपदप्राप्तिः	तुलासंक्रान्तिः	१००००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri.Funding: MI

१२	वराहपुराणम्	तिलधेनुः काञ्चन गरुडश्च	विष्णुः	वैष्णवपदप्राप्तिः	चैत्रपूर्णिमा	२४०००
१३	भागवतपुराणम्	हेमसिंहः	,,	परमपद प्राप्तिः	माघीपूर्णिमा	१८०००
१४	विष्णुपुराणम्	घृतधेनुः	,,	विपूतात्मकर्तृकवारुणपदप्राप्तिः	आषाढीपूर्णिमा	२३०००
१५	ब्रह्मपुराणम्	जलधेनुः	ब्रह्मा	ब्रह्मलोकमहितत्वम्	वैशाखीपूर्णिमा	१००००
१६	ब्रह्माण्डपुराणम्	सुवर्णधेनुः, कौशेय-युगलञ्च	,,	राजसूयसहस्रफलं, ब्रह्मलोक-वासश्च	व्यतीपातः	१२०००
१७	अग्निपुराणम्	तिल धेनुः	अग्निः	सर्वक्रतुफलम्	मार्गीपूर्णिमा	१५४००
१८	भविष्यपुराणम्	गुडधेनुः	सूर्यः	अग्निष्टोमफलम्	पौषीपूर्णिमा	१४५००
	महाभारतम्	राजतहस्ती		सकलवेदशास्त्रदानफलं, सर्वमहा यज्ञाधिकफलम्		‡१०००००
	वाल्मिकीयरामायणम्	सुवर्णरथः		सरस्वतीप्रसादः सर्वमहायज्ञा-धिकफलम्		२४०००
	हरिवंशम्			अतिदानफलम्		‡

❀ देवीभागवतटीकायां स्कान्दे सौरसंहितायाम्। 'कथ्यते दशभिर्विप्रा पुराणः परमेश्वरः। चतुर्भिर्भगवान्विष्णुर्द्वाभ्यां ब्रह्मा प्रकीर्तिताः। एकेनाग्निस्तथैकेन भगवाँश्चण्डभास्करः, इति ॥

† अष्टादशपुराणानां ग्रन्थसंख्या भागवतालिखिता।

‡ भारतस्य शतसहस्रश्लोकसंख्या हरिवंशयुक्तस्यैव नकेवलस्येति हरिवंशटीकाप्रारम्भे नीलकण्ठविबुधाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. NMP Public Domain. Digitization by eGangotri.Funding: MID

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अष्टादशपुराणादिपुस्तकानां दानस्य सपरिकराः संकल्पाः ।

यथाशक्ति कदलीस्तम्भादिना दानस्थानसाधनं, सम्प्रदानवरणसामग्री, प्रतिपुराणपुस्तकं, पृथक्पृथगुपकरणं, मसीमणिर्लेखनीपत्राणि, वितानः, खट्वि का, काष्ठपट्टद्वयं, पुस्तकबन्धनपट्टवस्त्रं सदोरकं, मूलदेवतादिकपालशिवब्रह्मसरस्वतीनां चतुर्दशप्रतिमाः, पूजासामग्रीचैकैकपुस्तकदाने सम्पादनीयानि ।

युगपदनेकपुस्तकदाने प्रतिपुस्तकं मूलदेवता प्रतिमा । अन्याश्च दिक्पालानां दश, शिवब्रह्मसरस्वतीनां प्रतिपुस्तकं पृथक्पृथक् प्रतिमाः । इति सामग्रीं सम्पाद्य उक्ते काले शुचिराचम्य कर्मपात्रं सम्पाद्य प्रधानसङ्कल्पं कुर्यात् । सयथा—देशकाल कीर्तनान्ते अहं कायिकवाचिकमानसिकसांसर्गिक ज्ञानाऽज्ञानकृताऽनेकजन्मोपार्जितसमस्तपापक्षयपूर्वकं गोसहस्रदानसमफलप्राप्ति चतुर्दशविद्यावेद वेदाङ्गपारगत्वसिद्धि सर्वबाधाप्रशमन स्वदर्शनोत्तर परपापनाशकारित्वाऽऽत्मसमेतसप्तपूर्वसप्ताऽपरवंशकर्मकपापकलिलावधिकोद्धृति ब्रह्मविष्णुनमस्कृतलोकमहितत्व पत्राऽक्षरसमसंख्यवर्षव्यापिविविधसुखभोगसम्पन्नत्वदेवीभक्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

प्रभृतिविद्यादानकल्पोक्तसकलफलप्राप्तिपूर्वकं ❀अमुकफलप्राप्तयेऽमुकपुस्तकदानं तत्र दीपगणेशवरुणदिक्पालशिवब्रह्मसरस्वतीमूलदेवतास्थापनपूजनादि च करिष्ये तत्पुस्तकदानग्रहणाय अमुकगोत्रनामानं विद्वांसं ब्राह्मणमेभिर्धौतोत्तरीयाङ्गुलीयाऽङ्गद काश्मीरकम्बलपरिधानीयवस्त्रकरकाऽऽसनाऽनुलेपन पुष्पपूगीफलादिभिर्भवन्तंवृणे इति वृणुयात् (वरणेऽसतां वस्तूनां सङ्कल्पवाक्ये नाम नोल्लिखेत)। ततः दीपं गणेशं स्थापितेकलशे वरुणं सम्पूज्य धूपदीपनैवेद्यानि समर्प्य लिखिताऽष्टदलकमलां स्थालीं स्वाग्रतः पुस्तकसमीपे निधाय तत्र यस्य पुराणस्यदानं तद्देवता प्रतिमां विशदया पद्धत्या सम्पूज्य तत्रैव शिव ब्रह्मणोः प्रतिमयोस्तौप्रतिदिशं दिक्पालप्रतिमासु तान्सरस्वतीप्रतिमायां ताञ्च पूजयित्वा तिस्रः सौभाग्यवती स्तिस्रः कन्यकाश्च सम्पूज्य देवविसर्जनान्तं निर्वर्त्य मित्रवर्गयुतः ❀सपरिवारो यजमानः देशकालकीर्तनान्ते अहंकायिकवाचिकमा०—देवी भक्ति प्रभृति विद्यादान-

---

❀ तत्रतत्राऽमुकपदस्थाने दानफल, पुराणोपकरणादिनामानि गोत्रनाम देवतानामादीनि च यथायोग्यं प्रक्षिपेत्।

❀अनुष्ठानप्रकाशे। वापीकूपतडागानां प्रतिष्ठायां महोत्सवे व्रतादौ शान्तिकेचैव पत्नीस्यादुत्तरे सदा।

शान्तिकेपुच सर्वेषु प्रतिष्ठोद्यापनादिषु वामेउपविशेत्पत्नी व्याघ्रस्य वचनं यथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

कल्पोक्तफलप्राप्तिपूर्वकं अमुकफलप्राप्तये, सुचित्रकाष्ठ-पट्टद्वययुतं विचित्रचीनांशुकपरिवीतं कौशेयदोरक-निबद्धं सुललिताऽक्षरं अमुकपुस्तकं खट्विकास्थं सुपूजिताऽमुकदेवता प्रतिमादिकपालसरस्वतीशिव-ब्रह्मप्रतिमासनाथं अमुकोपकरणसहितं सरस्वतीदेव-ताकममुक गोत्राय सुपूजिताय विद्वद्वरायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इति कुशान्दत्वा, अङ्गलिंबद्ध्वा सर्वविद्याऽऽश्रयज्ञानकरणं ललिताक्षरम्। पुस्तकं तस्य दानेन प्रीणातु मम भारती॥ सरस्वति जगन्मातः शब्दब्रह्माधिदेवते। अस्याः प्रदानाद्वागीशा प्रसन्ना जन्मजन्मनि इति प्रार्थ्य; दानप्रतिष्ठां सुवर्ण मादाय कृतस्याऽमुकपुस्तकदानकर्मणः साङ्गफलप्राप्तये इदं सुवर्णमग्निदैवतममुकगोत्रायेत्यादि दद्यात्।

ततः किञ्चित्पुराणं श्रुत्वा पुष्पाञ्जलिं समर्प्य, गां भूयसीञ्च सङ्कल्प्य दत्वा ऽभिषेकप्रसादौ गृहीत्वा ब्राह्मणांस्तद्देवभक्तानाथान्दीनांश्च सम्भोज्य सुहृद्युतो भुंजीत। इति हेमाद्रिप्रभृतिदानग्रन्थोक्ताऽष्टादशपुरा-णादिदानप्रयोगः॥

वेदपुस्तकदानस्यसप्रयोगःसङ्कल्पः।

हेमाद्रौ गारूडे। कर्ता शुचिः कर्मस्थानमागत्य

Nepal Sanskrit University, Balmeeki Campus, Kath

-0. In Public Domain. Digitization by eGangotri.Funding: M

आचम्य पलत्रयादारभ्य यथाशक्तिसुवर्णनिर्मितां, दक्षकरे धृतजपमालां **ऋग्वेद** प्रतिमां; दक्षकरे धृत-पद्मां **यजुर्वेद** प्रतिमां; दक्षकरे धृतवीणां **सामवेद** प्रतिमां; दक्षकरे धृतस्रुक्स्रुवां, वामे धृतकमलां **अथर्ववेद** प्रतिमां स्थाल्यां निधाय सर्वैरुपचारैः समहाव्याहृत्यागायत्र्या सम्पूज्य ऋग्वेदादिक्रमेण पीतशुक्लरक्तनीलवस्त्राणि समर्प्य पूजां समाप्य, प्रार्थयेत्—ऋग्वेद पद्मपत्राऽक्ष रक्ष रक्ष क्षिपाऽशुभम् । शरणं त्वां प्रपन्नोस्मि देहि मे हितमद्भुतम् । यजुर्वेद नमस्तेस्तु लोकत्राणपरायण । त्वत्प्रसादेन मे क्षेमा निखिलाः सन्तु सन्ततम् ॥ सामवेद महाबाहो त्वं हि साक्षादधोक्षयः । प्रसादसुमुखो भूत्वा कृपया ऽनुगृहाण माम् ॥ अथर्वन् सर्वभूतानां त्वदायत्ते हिताऽहिते । शान्तिं कुरुष्व देवेश पुष्टिमिष्टां प्रयच्छमे इति प्रार्थ्य । वेदपुस्तकेषु पट्टवस्त्रदोरकादिनिबद्धेषु स्वां स्वां प्रतिमां निधाय सम्प्रदानं ब्राह्मणं वृत्वा सम्पूज्य सकुशोदकेन हस्तेन पुस्तकानि स्पृष्ट्वा देशकालकीर्तनान्ते अहं विद्यादानकल्पोक्तसकल फलावाप्तिपूर्वकं नरकाऽदर्शनसर्वयज्ञसर्वदानफललाभस्वर्गापवर्गब्रह्मलोकप्राप्तये सुपूजितसौवर्णवेदप्रतिमायुतानि ऋग्, यजुः, सामाऽथर्व वेदपुस्तकानि सरस्वतीदेवताकानि नानागोत्रेभ्यो नाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य सम्प्रददे तत्सन्नमम इत्युत्सृजेत् (एकस्मैसर्वपुस्तकदाने ऽमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इत्यादि दत्वा) तत अञ्जलिं बद्ध्वा सर्वविद्याश्रयज्ञानकरणं ललिताक्षरम् । पुस्तकं तस्य दानेन प्रीणातु मम भारती ॥ सरस्वति जगन्मातः शब्दब्रह्माधिदेवते । अस्याः प्रदानाद्वागीशा प्रसन्ना जन्मजन्मनि इति प्रार्थ्य दानप्रतिष्ठामादाय कृतस्य सौवर्णप्रतिमा युतवेदपुस्तकदानप्रतिष्ठार्थमिदं सुवर्णं वह्निदेवताकं (सुवर्णनिष्क्रयीभूतं रजतं चन्द्रदेवताकंवा) इत्यादि एकैकस्मै एकैकपुस्तकदानेतु दानप्रतिष्ठाभागचतुष्टयमादाय कृतस्य सौवर्ण०—ष्टार्थमिमान्दानप्रतिष्ठा सुवर्णभागान् वह्निदेवताकान् प्रत्येकममुकगोत्रायेत्यादि दद्यात् । इति वेदपुस्तकदानप्रयोगः ॥

दशदानादीनि ।

—: ❀ :—

दशदानसङ्कल्पाः ।

निर्णयसिन्धौ दानचन्द्रिकायां च मदनरत्ने जातूकर्ण्यः । उत्क्रान्त्यादीनि दानानि दशदद्यान्मृतस्य तु । गोभूतिलहिरण्याऽऽज्यवासोधान्यंगुडानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

च। रूप्यं लवणमित्याहुर्दशदानान्यनुक्रमात्। एतानि दशदानानि नराणां मृत्युजन्मनोः। कुर्यादभ्युदयार्थन्तु प्रेतेपि हि परत्र वै इति। मृतस्य मुमूर्षोः उत्क्रत्यादीनि पञ्चधेनुदानानि दशदानानि च दद्यात्। मृत्युजन्मनोः मृत्युसमये जन्मसमये च एतानि दशदानानि अनुक्रमाद्दद्यात्। प्रेतेपि दानान्येतान्यदत्वा मृतेपि परत्राऽभ्युदयार्थं कुर्यात्। मुमूर्षोर्दशदानाऽऽवश्यकतोक्ता-विष्णुना 'यस्योत्क्रमणवेलायां दशैतानि विधानतः। दीयन्ते स नरो याति पुण्यलोकान्सुखेन च। अन्यथा निरयं यातीत्येवमाह प्रजापतिः' इति। तत्राऽऽदौगोदानम्।

—: ❀ :—

गोदानसंकल्पः।

गां विप्रञ्च सम्पूज्य सकुशोदकेन हस्तेन गोपुच्छं गृहीत्वा अहं सर्वपापक्षयार्थमिमां गां रुद्रदेवत्याममुकगोत्रायेत्यादि।

❀गोमूल्यदानपक्षे अहंसर्वपापक्षयार्थमिदं गोमूल्यं सुवर्णं वह्निदैवतं रजतं चन्द्रदेवतं वा अमुकगोत्रायेत्यादि दत्वा। अञ्जलिबद्ध्वायज्ञसाधनभूताया विश्व-

❀ गोमूल्यन्तु सुवर्णनिष्कं, रूप्यनिष्कं वा यथाशक्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

स्याऽघप्रणाशिनी। विश्वरूपधरो देव प्रीयतामनया गवा। गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च इति प्रार्थ्य दानप्रतिष्ठां दद्यात्।

भूमिदान संकल्प :

❀भूमिं (तस्याभूमेर्मृदंवा) सम्पूज्य भूमिं स्पृष्ट्वा अहं सर्वपापक्षयपूर्वकं षष्ठिवर्षसहस्रपर्यन्तशिवपुर निवासकाम इमामियत्परिमाणां बहुसस्यप्रदा भूमिं विष्णुदेवत्यां (भूमिमूल्यरजतं चन्द्रदेवताकं वा) अमुकगोत्रायेत्यादि दत्वा अञ्जलिं बद्ध्वा सर्वेषामाश्रया भूमिर्वराहेण समुद्धृता। अनन्तसस्यफलदा अतः शान्तिं प्रयच्छ मे। यस्यां रोहन्ति बीजानि काले चैव महीतले। त्वत्प्रसादाच्च सकला मम सन्तु मनोरथा इतिप्रार्थ्य निष्कं सुवर्णं (तन्मूल्यद्रव्यंवा) दक्षिणामादाय कृतस्य इयद्भूमिदानस्य साङ्गफल प्राप्तये इमां दक्षिणां सुवर्णं वह्निदैवतं (रजतं चन्द्रदैवतं वा) अमुकगोत्रायेत्यादि दद्यात्।

तिलदानसंकल्पः।

द्रोणमितांस्तिलांस्तदर्द्धं तदर्द्धंवा विप्रञ्च सम्पूज्य

❀ 'दशहस्तेन दण्डेन त्रिंशद्धस्ता निवर्तनम्। दशतान्येव गोचर्म' इति लक्षितां सहस्रत्रयहस्तायामां सहस्रत्रयहस्तविस्तारां दशहस्तायामविस्तारां पंचहस्तायामविस्तारां वा भूमिम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सकुशोदकेन हस्तेन स्पृष्ट्वा अहं सर्वपापक्षयकाम इमांस्तिलान्पूषदेवताका (तन्मूल्यंरजतं चन्द्रदेवताकं वा) नमुकगोत्रायेत्यादि दत्वा अञ्जलिंबद्ध्वा महर्षेर्गोत्रसम्भूताः काश्यपस्य तिलाः स्मृताः। तस्मादेषां प्रदानेन मम पापं व्यपोहतु इतिप्रार्थ्य। माषचतुष्टयमितं सुवर्णं (तन्मूल्यं वा) दक्षिणामादाय कृतस्य तिलदानस्य प्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं (रजतं चन्द्रदैवतं, ताम्रं सूर्यदैवतंवा) अमुकगोत्रायेत्यादि दद्यात्।

हिरण्यदानसंकल्पः।

एकतोलकं यथाशक्ति वा सुवर्णं (तन्मूल्यं रजतंवा) विप्रञ्च सम्पूज्य सुवर्णं (तन्मूल्यं वा) आदाय अहं सर्वपापक्षयकाम इदं सुवर्णमग्निदैवत (तन्मूल्यममुकदेवतंवा) ममुकगोत्रायेत्यादि दत्वा हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे इतिप्रार्थ्य। एकतोलकं सुवर्णं (तन्मूल्यंवा) मादाय कृतस्य सुवर्णदानस्य प्रतिष्ठार्थमिदं सुवर्णमग्निदेवताक (तन्मूल्यममुकदेवताकं वा) ममुकोगोत्रायेत्यादि दद्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

आज्यदानसंकल्पः ।

षट्चत्वारिंशत्पलमितं, द्वादशपलमितं वा आज्यं विप्रञ्च सम्पूज्य घृतपात्रं स्पृष्ट्वा अहं सर्वपापक्षयकाम इदमाज्यं मृत्युञ्जयदेवताकममुकगोत्रायेत्यादि दत्वा कामधेनोः समुद्भूतं सर्वक्रतुषुसंस्थितम् । देवानामाज्यमाहार अतः शान्तिं प्रयच्छ मे इति प्रार्थ्य । माषमितं सुवर्णं (तन्मूल्यं वा) दक्षिणामादाय कृतस्याऽऽज्यदानस्य प्रतिष्ठार्थमिदं सुवर्णमग्निदैवत (तन्मूल्यममुकदैवतं वा) ममुकगोत्रायेत्यादि— मूल्यदानपक्षे वाक्यमूह्यम् ।

वस्त्रदानसंकल्पः ।

अष्टाष्टहस्तामितं बहुमूल्यं वस्त्रद्वयं विप्रञ्च सम्पूज्य वस्त्रं स्पृष्ट्वा अहं सर्वपापक्षयकाम इमे वाससी बृहस्पतिदेवताके अमुकगोत्रायेत्यादि दत्वा, अञ्जलिं बद्ध्वा शीतवातोष्णसंत्राणं लज्जायारक्षणं परम् । देहाऽलङ्करणंवस्त्रमतःशान्तिं प्रयच्छ में इति प्रार्थ्य दानप्रतिष्ठां दद्यात् ।

धान्यदानसंकल्पः ।

पञ्चद्रोणमितं तदर्द्धतदर्द्धंवा धान्यं विप्रञ्च सम्पूज्य धान्यंस्पृष्ट्वा अहं समस्तपापक्षयपूर्वकमैहिकामु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

ष्मिकशिवफलावाप्तये धान्यं प्रजापतिदेवताकममुक गोत्रायेत्यादि दत्वा सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत्। प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे इति प्रार्थ्य दक्षिणां सुवर्णमादाय कृतस्य धान्यदानस्य प्रतिष्ठार्थं सुवर्णवन्हिदैवतममुकगोत्रायेत्यादि दद्यात्।

गुड़दानसंकल्पः।

अशीतिपलमितं चतुर्विंशतिपलमितं वा गुड़ं विप्रञ्च सम्पूज्य अहं सर्वपापक्षयकाम गुड़ं कुवेरदेवताकममुकगोत्रायेत्यादि दत्वा यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः। सामवेदस्तुवेदानां महादेवस्तु योगिनाम्। प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा। तथा रसानांप्रवरः सदैवेक्षुरसोमतः। मम तस्मात्परां लक्ष्मीं ददस्व गुड़ सर्वदा इति प्रार्थ्य। हेममाष. द्वयमादाय कृतस्य गुड़दानस्य प्रतिष्ठार्थं मिदं सुवर्णमित्यादि।

रौप्यदानसंकल्पः।

तोलकचतुष्टयमितं रौप्यं विप्रञ्च सम्पूज्य अहं सर्वपापक्षयशिवविष्णुपितृप्रीतिकाम इदं रजतं चन्द्रदैवतमित्यादि दत्वा प्रीतिर्यतः पितृणां च विष्णुशंकरयोः सदा। शिवनेत्रोद्भवंरूप्यमतः शान्तिं प्रयच्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मे इति प्रार्थ्य रजतचतुर्थांऽशमूल्यं सुवर्णं दानप्रदिष्ठां दद्यात् ।

लवणदानसंकल्पः ।

षष्ठिपलमितं, चत्वारिंशत्पलमितं, द्वादशपलमित वा लवणं विप्रं च सम्पूज्य लवणं स्पृष्ट्वा अहं सर्वपाप-क्षयशिवप्रीतिकाम इदं लवणं समुद्रदेवताकममुक-गोत्रायेत्यादि दत्वा यस्मादन्नरसाः सर्वे नोत्कृष्टालवणं बिना । शम्भोः प्रीतिकरं यस्मादतः शान्तिं प्रयच्छ मे इति प्रार्थ्य दक्षिणां सुवर्णं दद्यात् ।

दानवस्तूनां मूल्यदानपक्षे सर्वत्र वाक्यमूह्यम् । दशदानवस्तुपरिमाणं दानप्रतिष्ठापरिमाणं च बिधान पारिजातदानदिनकराऽऽदिनिबन्धाल्लिखितम् ॥

दशदानोक्तवस्तूनां युगपद्दाने संकल्पः ।

गोभूतिलादीनां दशानां पृथक्पृथग्दानाऽ वसराऽभावे गोभूतिलहिरण्याऽऽज्यवस्त्रधान्यगुड-रौप्यलवणानि संयुक्तानि सम्पूज्य स्पृष्ट्वा अहं सर्व-पापक्षय षष्ठिवर्षसहस्रपर्यन्ताशिवपुरनिवासैहिकामु-ष्मिकशिवफलप्राप्ति लक्ष्मीस्थिरता शिवविष्णुपितृ तृप्तिप्रभृतितत्तद्वस्तुदानकल्पोक्त सकलफलावाप्तये इमानि गोभूतिलहिरण्याऽऽज्यवस्त्रधान्यगुडरौप्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

लवणानि रुद्रविष्णुपूषवन्हिमृत्युञ्जयबृहस्पतिप्रजापतिकुबेरचन्द्रसमुद्रदैवतानि नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे तत्सन्नमम इति कुशाञ्जले प्रक्षिप्य। अञ्जलिंवद्ध्वा यज्ञसाधनभूतेत्याद्यनुपदोक्तैः श्लोकैः प्रार्थ्य दानप्रतिष्ठाद्रव्यभागदशकमादाय कृतस्य गोभूतिल–लवणदानस्य प्रतिष्ठार्थमिमान्दानप्रतिष्ठाभागान्नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे इति जले कुशांस्त्यक्त्वा। गांगोदानप्रतिष्ठाद्रव्यञ्चैकस्मै, भूमेर्मूदं तद्दानप्रतिष्ठा द्रव्यभागंचैकस्मै इतिरीत्यैकैकंवस्त्वैकैकं दानप्रतिष्ठाभागंचैकैकस्मै दद्यात्।

दशदानोक्तवस्तूनामभावे तत्तन्मूल्यानां युगपद्दाने संकल्पः।

तत्तन्मूल्यभागं सम्पूज्य स्पृष्ट्वा अहं सर्वपापक्षयषष्ठिवर्ष०–कल्पोक्तसकलफलावाप्तये इमानिगोभूतिलहिरण्याऽऽज्यवस्त्रधान्यगुडरौप्यलवणमूल्यरजतभागांश्चन्द्रदैवताकान्नानागो०–णेभ्यो यथा भागं विभज्य दातुमहमुत्सृजे तत्सन्नमम इतिकुशाञ्जले प्रक्षिप्य। यज्ञसाधनभूतेत्याद्यनुपदोक्तैः श्लोकैः प्रार्थ्य दानप्रतिष्ठा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

द्रव्यभागान्सङ्कल्प्य कुशाञ्जले प्रक्षिप्य एकैकं गवादि-मूल्यभागं दानप्रतिष्ठाभागंचैकैकस्मै दद्यात् ।

पञ्चधेनुदानानि ।

—: ❀ :—

पापाऽपनोदधेनुदानसङ्कल्पः ।

धेनुं विप्रञ्च सम्पूज्य गोपुच्छं गृहीत्वा अहं मनोवाक्कायकर्मभिराजन्मोपार्जितपापाऽपनोदकाम इमां पापाऽपनोदधेनुं रुद्रदेवताकाममुकगोत्रायेत्यादिदत्वा आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः । तत्सर्वं नाशमायातु पापधेनुप्रदानत इति प्रार्थ्य सुवर्णं (तन्निष्क्रयं वा) दक्षिणामादाय कृतस्य पापाऽपनोदधेनुदानकर्मणः साङ्गफलप्राप्तये इदं सुवर्णमग्निदैवत (तन्निष्क्रयद्रव्य-ममुकदैवतं वा) ममुकगोत्रायेत्यादि ।

ऋणाऽपनोदधेनुदानसंकल्पः ।

धेनुं विप्रञ्च सम्पूज्य गोपुच्छं गृहीत्वा अहं आजन्मोपार्जितैहिकामुष्मिकसमस्तऋणशुद्धिकाम इमां ऋणधेनुं रुद्रदेवताकाममुकगोत्रायेत्यादि दत्वा ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं ऋणम् । तत्सर्वं शुद्धिमायातु गामेतां ददतो मम इति प्रार्थ्य दानप्रतिष्ठां दद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मोक्ष (प्रायश्चित्त) धेनुदान संकल्पः ।

गोपुच्छं गृहीत्वा अहं जन्मप्रभृत्यद्ययावदाचरित-समस्तपातकस्याऽकृतप्रायश्चित्तस्य प्रायश्चित्तसिद्ध्यर्थ-मिमां गां रुद्रदेवताकाममुकगोत्रायेत्यादि दत्वा प्राय-श्चित्ते समुत्पन्ने निष्कृतिर्नकृता कचित् । तस्य पापस्य शुद्ध्यर्थं धेनुमेतां ददामि ते इति प्रार्थ्य दानप्रति-ष्ठान्दद्यात् ॥

ऋणधेन्वादिदानाऽशक्तावेकाऽपि गौर्देया । अत एव मोक्षऋणादिधेनूरुक्त्वा दानदिनकरोद्योते विश्वे-श्वरः एतासां धेनूनामशक्तौव्यासः 'आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् । तदभावेतु गौरेव नर-कोद्धारणायवै । पूर्ववत् गोदानेतिकतव्यताकामित्यर्थः' इत्याह ।

वैतरणीधेनुदानसंकल्पः ।

आसन्नमृत्यू रोगी धेनुं विप्रञ्च संपूज्य गोपुच्छं गृहीत्वा अहं यमद्वार स्थितवैतरण्याऽऽख्यनद्युत्तरणार्थ-मिमां गां रुद्रदेवताकामित्यादि दत्वा यमद्वारे पथे घोरे घोरा वैतरणी नदी । तान्तर्तुकामो यच्छामि कृष्णां वैतरणीन्तु गाम् इति प्रार्थ्य दानप्रतिष्ठान्दत्वा सम्प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

दानं विप्रं, बिष्णुरूप द्विजश्रेष्ठ भूदेवगतिपावन। तर्तुं वैतरणीमेतां कृष्णां गां प्रददाम्यऽहम्। इतिप्रार्थयेत्।

उत्क्रान्तिधेनुदानसंकल्पः।

आसन्नमृत्यू रोगी धेनुं विप्रं च सम्पूज्य गोपुच्छं गृहीत्वा अहं ससुखप्राणोत्क्रमणप्रतिवन्धकोक्तनिष्कृत्यनुक्तनिष्कृति सकलपापक्षयद्वारासुखेनप्राणोत्क्रमणसिद्ध्यर्थमिमां गां रुद्रदेवताकामित्यादि दत्वा असूत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये। तुभ्य मेतां सम्प्रददे धेनुमुत्क्रान्तिसंज्ञिकम् इति प्रार्थ्य दानप्रतिष्ठां दद्यात्।

पंचधेनूनामभावे तन्मूल्यानां युगपद्दाने संकल्पः।

गवां मूल्यभागान्सम्पूज्य स्पृष्ट्वा अहं (१) मनो वाक्कायकर्मभिराजन्मोपार्जितपापापनोदार्थं, (२) आजन्मोपार्जितैहिकामुष्मिकसमस्तऋणपातकच्छेदार्थं, (३) जन्मप्रभृत्यद्ययावदाचरितसमस्तपातकस्याऽकृतप्रायश्चित्तस्य प्रायश्चित्तसिद्ध्यर्थं, (४) यम द्वारस्थित वैतरण्याख्यनद्युत्तरणार्थं (५) ससुखप्राणोत्क्रमणप्रतिवन्धकोक्तनिष्कृत्यनुक्तनिष्कृतिसकलपापक्षयार्थमिमा - न्गोमूल्यरजतखण्ड भागांश्चन्द्रदेवताकान्नानागोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमह मुत्सृजे इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

कुशाञ्जले निक्षिप्य । अञ्जलिंबद्ध्वा आजन्मोपा०-दानतः ॥१॥ ऐहिकामु०-दतोमम ॥२॥ प्रायश्चि०-मिते ॥३॥ यमद्वारप०-न्तुगाम् ॥४॥असूतक्रान्तौ०-संज्ञिकां ॥५॥ इतिप्रार्थ्य दक्षिणाद्रव्यभागपञ्चकमादाय कृतस्य धेनु पञ्चकमूल्यदानकर्मणः साङ्गफलप्राप्तये० ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे इति कुशाञ्जले निक्षिप्य । एककं गोमूल्यभागमेकैकं दानप्रतिष्ठाभागंचैकैकस्मै दद्यात्। भागद्वयं भागत्रयं कृत्स्नंवैकस्मै एव वा यथेच्छं दद्यात्। एकं गोमूल्यभागं विभज्य द्विप्रभृतिभ्यो नदद्यात् ।

एकैकं गोमूल्यभागं पृथक्पृथक् सङ्कल्प्यदानेतु फलं प्रार्थनां च पृथक् कृत्वा पृथक् पृथक् संकल्प वाक्यं रचयित्वा दानं कुर्यात् ।

अष्टदानानि ।

(आसन्नमरणस्थ)

आसन्नमरणस्य पापनाशनायाऽष्टौ दानांन्युक्तानि निर्णयसिन्धौ क्रियानिवन्धधृतगारुडे दानदिनकरोद्योतेच 'तिला लोहं हिरण्यञ्च कार्पासं लवणन्तथा । सप्तधान्यं मही गावः प्रत्येकं पावनं स्मृतम्' इति । दानवाक्यन्तु मम आजन्मोपार्जितपापक्षयपूर्वकं कायशुद्धये तिलान्पूषदेवताकानित्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

तिलपात्रदानसंकल्पः।

(आसन्नमृत्योः)

सिन्धौ ब्राह्मे 'ताम्रपात्रं तिलैः पूर्णं प्रस्थमात्रं द्विजाय तु। सहिरण्यन्तु यो दद्याच्छ्रद्धावित्ताऽनुसारतः। सर्वपापविशुद्धात्मा लभते गतिमुत्तमाम्' इति। यथाशक्ति ताम्रपात्रे तिलान्हिरण्यं च निधाय रोगी देयं ब्राह्मणञ्च सम्पूज्य देशकालकीर्तनान्ते अहं जन्मप्रभृतिमरणपर्यन्तकृतपापानां नाशार्थं सहिरण्यतिल पात्रं हिरण्यमग्निदैवतं तिलान्प्रजापतिदेवताकांस्ताम्रपात्रं विश्वकर्मदेवताकममुकगोत्रायेत्यादिदत्वा। अंजलिं बद्ध्वा तिलाः पुण्याः पवित्राश्च तिलाः सर्वकरा स्मृताः। शुक्ला वा यदि वा कृष्णा ऋषिगोत्रसमुद्भवाः। यानिकानि च पापानि ब्रह्महत्यासमानि च। तिलपात्रप्रदानेन तानि नश्यन्तु सर्वदा। महर्षेर्गोत्रसम्भूताः कश्यपस्य तिलाः स्मृताः। तस्मात्तेषां प्रदानेन मम पापं व्यपोहतु इति प्रार्थ्य। दानप्रतिष्ठाद्रव्यमादाय सहिरण्यतिलपात्रदानकर्मणः प्रतिष्ठार्थं ताम्रखण्डं सूर्यदैवतममुकगोत्रायेत्यादि दद्यात्।

मन्त्रचतुर्थीकरणे आवश्यकता।

उपदेशादिदीक्षायां चतुर्थदिने दिनान्तरे वा सविशेषमिष्टदेवतां सम्पूज्य होमं च कृत्वा गुरुमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

यथाशक्ति गृहक्षेत्राऽलङ्कारवासः सोपकरणशय्यादिभिः सत्कुर्वन्ति तच्चतुर्थीकर्मेति वदन्ति ।

क्रियावद्दीक्षायां गुरुगृहेवस्थितः शिष्यो गुरूणेष्टदेवताऽर्चनं कारयित्वा गुरुं प्रणम्य चतुर्थदिने स्वगृहं प्रतिनिवर्तते । तत्रचतुर्थदिनेक्रियमाणस्य स्वेष्टदेवतापूजा गुरुप्रणामादिकर्मणश्चतुर्थीकर्मत्वं मत्वाऽत्रापीष्टदेवताऽर्चनं गुरुसत्कारादिकर्मणश्चतुर्थीकर्मत्वप्रवाद इति भाति। युक्तंचैतत्गुरोर्यथाशक्ति समर्चनम् । 'सर्वस्वं दक्षिणान्दद्यात्' इति 'भूमिं वृत्तिकरीन्दद्यात्पुत्रपौत्रानुयायिनीम्' इति । 'गुरुसन्तोषमात्रेण दुष्टमन्त्रोऽपि सिद्ध्यति। अन्यथा नैवसिद्धिः स्यादभिचाराय कल्पते। गुरुदेवं वञ्चयित्वा यः कुर्याद्धनसंचयम् । तेन तद्भुज्यते नैव ह्रियते राजतस्करैः' इत्यादि दक्षिणादानाऽदानयोर्विधिनिन्दाश्रवणात् । अतश्चतुर्थीकरणास्याऽवश्यकत्वेन आसन्नमृत्योरपि अकृतचतुर्थीकस्यतत्सिद्धये गोदानमाचरन्ति ।

मन्त्रचतुर्थीसिद्ध्यर्थगोदानसंकल्पः ।

अहं मन्त्रचतुर्थ्यकरणजनितप्रत्यवायपरिहारपूर्वकं गुरुसन्तोषजन्यमन्त्रसिद्ध्यादिसम्पद्यमानशुभफलप्राप्तये इमां गां रुद्रदेवताकां गोमूल्यद्रव्यं रजतं चन्द्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

देवताकं वा ऽमुकगोत्रायेत्यादि दत्वा प्रार्थ्य दान प्रतिष्ठां दद्यात्।

अकृतव्रतोद्यापनस्य तत्सिद्ध्यर्थं गोदानसंकल्पः।

अहं अमुकाऽमुकाऽमुकव्रतानामुद्यापनाऽनुष्ठान-जन्यसमग्रफलावाप्तये इमा गाः रुद्रदेवताकाः (गो-मूल्यद्रव्याणि रजतभागान् चन्द्रदेवताकान् वा) नाना गोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे तत्सन्नमम इत्युत्सृजेत्। ततः प्रार्थ्य दानप्रतिष्ठाद्रव्य मादाय कृतस्य अनेकगवीदानकर्मणः (अनेकगो मूल्यद्रव्यभागदानकर्मणो वा) साङ्गफलप्राप्तये रजत-खण्डांश्चन्द्रदेवताकान्ताम्रखण्डान्सूर्य्यदेवताकान्वाना-नाशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातु महमुत्सृजे तत्सन्नमम इत्युत्सृज्य प्रार्थ्य दानप्रतिष्ठा द्रव्यदानं कुर्यात्।

प्रतिव्रतंभिन्नसङ्कल्पेन गोदानेतुअहं कृतस्या ऽमुकव्रतस्यउद्यापनाऽनुष्ठानजन्यसमग्रफलावाप्तये इमां गां रुद्रदेवताकामित्यादि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

घृतच्छाया (अवलोकिताज्य) दानस्य सप्रयोगः संकल्पः ।

दानचन्द्रिकायां व्रतहेमाद्रिधृतगोपथब्राह्मणे च भविष्ये 'कांस्यपात्रे स्थिताऽऽज्यंच आत्मरूपं निरीक्ष्यतु । ससुवर्णन्तु यो दद्यात्सर्वविघ्नोपशान्तये' इति । दाता विलापिताऽऽज्यपूर्णं सुवर्णकलशसहितं कांस्यपात्रं वामपाणौ निधाय ॐकाण्डात्काण्डात्प्ररोहन्ति परुषः परुषस्परि । एवानोदूर्वे प्रतनु सहस्रेण शतेन च । या क्षीरसागरोत्पन्ना दूर्वा पीयूषसम्भवा । तत्संस्पर्शनमात्रेण आयुर्वृद्धिर्यशोबलम् इति दूर्वामादाय तया घृतमालोडयेदनेनमन्त्रेण । ॐघृतं घृतपावानः पिबतव्वसांव्वसापावानः पिबतान्तरिक्षस्य । हविरसिस्वाहादिशः प्रदिश आदिशो विदिश उद्दिशोदिग्भ्यः स्वाहा । भौमान्तरिक्षं दिव्यं वा यन्मे किल्विषमागतम् । सर्वं तदाज्यसंस्पर्शात्प्रणाशमपगच्छतु इत्याऽऽलोड्य । दूर्वां तत्र प्रान्ते निधाय ॐ ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजयापशुभिर्भूयात् । घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्यछाया । अलक्ष्मीर्यच्चदौस्थं मे सर्वगात्रेष्ववस्थितम् । तत्सर्वंशमयाऽऽज्य त्वं लक्ष्मीं पुष्टिं च वर्धय इति छायां निरीक्षेत् । छायाया अदर्शने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

दर्शनसौकर्यायाग्निमालोकं दक्षिणपाणिनाऽऽवृणुयात् । छायायां दृष्टायां पात्रं भूमौ निधाय विप्रमाज्यञ्च सम्पूज्य सकुशोदकेन पाणिना पात्रं स्पृष्ट्वा देशकालकीर्तनान्ते अहं दुःस्वप्नदुर्निमित्तविघ्नौघपापनाशार्थं तेजः प्रज्ञा शौर्ययशोबलाऽऽरोग्याऽऽयुर्लक्ष्मीपुष्टिवर्द्धनार्थमिदं वीक्षितमुखादिच्छायां घृतपूरितं ससुवर्णं कांस्यपात्रं सुवर्णं वह्निदैवतं घृतं मृत्युञ्जयदैवतं कांस्यपात्रं विश्वकर्मदैवतममुकगोत्रायेत्यादि दत्वा । अञ्जलिं बद्ध्वा आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् । आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ॥ आज्यपात्रप्रदानेन शान्तिरस्तु सदा मम इति प्रार्थ्यदक्षिणामादाय कृतस्याऽवलोकिताज्यदानकर्मणः साङ्गफलप्राप्तये इमां दक्षिणां रजतं चन्द्रदैवत (ताम्रखण्डंसूर्यदैवतं वा) ममुकगोत्रायेत्यादि दद्यात् । तत अच्छिद्रप्रार्थनां कर्मेश्वरार्पणञ्चकृत्वा कर्म समापयेत् । इति घृतच्छायादानप्रयोगः ॥

काष्ठपादुकादानसंकल्पः ।

देयं स्पृष्ट्वा अहं इह भोगोत्तरं दिव्ययानारोहणेन स्वर्गगमनार्थमिमे काष्ठपादुके सोमदैवते अमुकगोत्रायेत्यादि दत्वा कण्टकोच्छिष्टपाषाणवृश्चिकादिनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

वारणे। पादुके सम्प्रदास्यामि विप्र प्रीत्या प्रगृह्य ताम् इति प्रार्थ्य दानप्रतिष्ठां दद्यात्।

यष्टिदान संकल्पः।

देयं स्पृष्ट्वा अहं इह निरोगत्व सदाश्रयत्व निर्भयत्वप्राप्तिपूर्वकं स्वर्गभोगप्राप्तये इमां यष्टिं शिवदैवतममुकगोत्रायेत्यादि दत्वा दुर्बलानां समालम्बः शृङ्गिदंस्ट्रिभयापहृत्। खनित्रसहितः सारदारुजो वक्रवृन्तवान्। विशेषेण तनोस्त्राता पिच्छिले पथि गच्छतः। दण्डस्तद्दानतो मे स्यात्प्रसन्नो भूतभावनः इति प्रार्थ्य दानप्रतिष्ठां दद्यात्।

छत्रदानसंकल्प।

छत्रं ब्राह्मणं च सम्पूज्य सकुशोदकेन करेण छत्रं स्पृष्ट्वा अहं परत्रेहच असिपत्रवनतीक्ष्णाऽऽतपतरणादिछत्रदानकल्पोक्तसकलफलावाप्तये छत्रमुत्तानाङ्गिरोदैवतममुकगोत्रायेत्यादि दत्वा इहामुत्राऽऽतपत्राणं कुरु केशव मे प्रभो। छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया शुभम् इति प्रार्थ्य दानप्रतिष्ठाद्रव्यमादाय कृतस्य छत्रदानस्यप्रतिष्ठार्थमिदं ताम्रखण्डं सूर्यदैवतममुकगोत्रायेत्यादि दद्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

उपानद्दानसंकल्पः ।

उपानहौ विप्रञ्च सम्पूज्य उपानहौ स्पृष्ट्वा अहं परत्रेह च क्षुरधारकण्टकशर्करातीक्ष्णाऽऽतपान्वितमार्ग क्लेशतरणार्थमिमे उपानहावुत्तानाङ्गिरोदैवते अमुक गोत्रायेत्यादि दत्वा उपानहौ प्रदास्यामि कण्टकादि निवारणे । सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छतम् इति प्रार्थ्य दानप्रतिष्ठां दद्यात् ।

सतूलप्रावरणादिदानसंकल्पः ।

देयं ब्राह्मणञ्च सम्पूज्य अहं शीताऽपनोदिवस्तुदानकल्पोक्तसकलफलावाप्तये इमानि सतूलप्रावरणधौतोत्तरीयादीनि बृहस्पतिदैवतानि अमुकगोत्रायेत्यादि दत्वा शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् । सुवेषधारिता यस्मादतः शान्तिं प्रयच्छ मे इति प्रार्थ्य दानप्रतिष्ठान्दद्यात् ।

सेन्धानाऽङ्गारहसन्तिकादानसंकल्पः ।

देयं ब्राह्मणं च सम्पूज्य देयं स्पृष्ट्वा अहं शीतापनोदिवस्तुदानकल्पोक्तसकलफलावाप्तये इमां साङ्गारां सेन्धनां हसन्तिकां विष्णुदैवतामुकगोत्रायेत्यादि दत्वा 'हसन्तिकां प्रदास्यामि ज्वलदङ्गारशोभिताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

विप्रशीतार्तिनाशाय तेन प्रीणातु मे शिवः' इति प्रार्थ्य दानप्रतिष्ठां दद्यात् ।

इन्धनस्य तन्मूल्यस्य वा दाने संकल्पः ।

(प्रातःस्नायिनामग्निसेवार्थम् ।)

अहं शीतापनोदिवस्तुदानकल्पोक्तसकलफलावाप्तये प्रातःस्नायिनामग्निसेवार्थमिन्धनं दारुपलालादि वनस्पतिदेवताकं (तन्मूल्यंरजतं चन्द्रदेवताकं वा) सर्वेषामुपभोगाय समुत्सृजे ।

सहिरण्यतिलताम्रपात्रदानसंकल्पः ।

(सर्वाऽरिष्टशान्त्यर्थम्)

देयं स्पृष्ट्वा अहं सर्वपापक्षयपूर्वकसर्वाऽरिष्टशान्तये सहिरण्यतिलताम्रपात्रं हिरण्यमग्निदैवतं तिलान्प्रजापतिदेवताकांस्ताम्रपात्रं विश्वकर्मदैवतममुकगोत्रायेत्यादि दत्वा 'तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः । ताम्रपात्रस्थिता नित्यमतः शान्तिं प्रयच्छत' इति प्रार्थ्य दानप्रतिष्ठां दद्यात् ।

अपूपदानसंकल्पः ।

(मलमासे)

देयं ब्राह्मणं च सम्पूज्य देयं स्पृष्ट्वा देशकाल कीर्तनान्ते मम सकलमलविशुद्धि विपुललक्ष्मीविवृद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ब्रह्माण्डपृथ्वीदानजन्यफलसमफल पुत्रपौत्रसंपदपूपच्छिद्र-समसंख्यसहस्रवर्षपर्यन्त स्वर्गलोकमहितत्व पुरुषोत्तमव्रत-सादृगुण्यावाप्तये भास्कररूपपुरुषोत्तमप्रीतये च कांस्य-पात्रनिहितान्कांस्यपात्रपिहितान्सप्ततन्त्वाऽऽवृतानपूपा-न्प्रजापतिदेवताकान् घृतं मृत्युञ्जयदेवताकं दधि चन्द्रदेवताकं शर्करां मित्रदेवताकां ताम्बूलं विद्या-धरदेवताकं सुवर्णं वह्निदेवताकां वस्त्रं बृहस्पति-देवताकं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय सम्प्रददे तत्सन्नमम इति दत्वा। अञ्जलिं बद्ध्वा 'विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः अपूपान्नप्रदानेन मम पापं व्यपोहतु। नारायण जगद्बीज भास्करप्रतिरूपक। दानेनाऽनेन पुत्रांश्च सम्पदञ्चाऽभिवर्द्धय॥ यस्य हस्ते गदाचक्रे गरूडो यस्य वाहनम्। शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु। कलाकाष्ठादिरूपेण नि-मेषघटिकादिना। यो वञ्चयति भूतानि तस्मै कालात्मने नमः॥ कुरुक्षेत्रमयं देशः सूर्यपर्वद्विजो हरिः। पृथ्वी-सममिदंदानं गृहाण पुरुषोत्तम॥ मलानां च विशुद्धयर्थं पापप्रशमनाय च। पुत्रपौत्राभिवृद्धयर्थं प्रदत्तं तव भा-स्कर इति प्रार्थयेत्। ततः प्रतिग्रहीता त्वया दत्तमिदं पात्रं परमान्नेन पूरितम्। सघृतं परिगृह्णामि प्रीयतां मे दिवाकरः, इति पठेत्। ततो दाता दानप्रतिष्ठाद्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

व्यमादाय कृतैतत्सोपकरणाऽपूपदान कर्मणो यथोक्तफलप्राप्तिपूर्वकन्यूनातिरिक्तपूर्णित्वार्थमिमां दक्षिणां अमुकद्रव्यममुकदेवताकममुकगोत्रायाऽमुकशर्मणे ब्राह्मणायतुभ्यमहंसम्प्रददे तत्सन्नमम इति दत्वा कर्मेश्वरार्पणं कुर्यात् ।

शय्यादानसंकल्पः ।

सामग्रीसहितां शय्यां सम्यगास्तीर्य सपरिवारः कर्ता देशकालकीर्तनान्ते अहं सुरूपत्वसौभ्याग्यश्रीमत्व दशसहस्रवर्षावच्छिन्नस्वर्गलोकमहितत्वकामसोपकरणशय्यादानं करिष्ये इति सङ्कल्प्य सम्प्रदानं ब्राह्मणं वृत्वा शय्यायां लक्ष्मीनारायणप्रतिमां सम्पूज्य, शिरःप्रदेशे घृतपूर्ण, कुम्भं, पार्श्वतः सप्तधान्यानि निधाय कुशातिलजलान्यादाय शय्यां स्पृष्ट्वा मम सुरुपत्वसौभाग्यश्रीमत्व दशसहस्रवर्षावच्छिन्नस्वर्गलोकमहितत्वप्राप्तये इमां सारदारुमयीं (लोहमयीं वा) सतूलिकामुत्तरच्छदप्रच्छन्नगण्डोपधानयुतां सप्रावरणां ताम्बूलकर्पूर कुङ्कुमाऽगरुचन्दनदीपिकाचामराऽऽसनयुक्तां लक्ष्मीनारायण प्रतिमायुतां घृतकुम्भसप्तधान्यान्वितां शय्यां उत्तानाङ्गिरोदैवतां परिधानीयवस्त्राणि बृहस्पतिदैवतानि सौवर्णराजतादीन्याभरणानि विश्वकर्मदैवतानि पाकभोजनपात्राणि विश्वकर्म दैवतानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

तण्डुलमाषलवणाऽनेकविधफलशाकादिवस्तूनि प्रजापतिदैवतानि सौभाग्यद्रव्याणि विष्णुदैवतानि अमुकगोत्रायाऽमुकशर्मणे सपत्नीकाय ब्राह्मणाय तुभ्यमहं सम्प्रददे तत्सन्नमम इति कुशान्विप्रहस्ते दत्वा अञ्जलिं बद्ध्वा (शय्यायाः) 'यथा नकृष्णशयनं शून्यं सागरजा तया । तद्वन्ममाप्यशून्यास्तु शय्या जन्मनि जन्मनि । (वस्त्राणाम्) शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् । सुवेषधारिता यस्मादतः शान्तिं प्रयच्छतु ॥ धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम् । सर्वपापप्रणाशोस्तु कृष्णवस्त्रप्रदानतः । रक्तवस्त्रं शुभं यस्मादादित्यस्य प्रियं सदा । प्रदानादस्य मे सूर्यः प्रीतः शान्तिं प्रयच्छतु । (आभरणानाम्) नराऽऽभरणदानेन तुष्टिं याति सदा शिवः । योषिदाभरणैर्दत्तैः प्रीयते हिमशैलजा ॥ सौवर्णराजतैरन्यैर्दत्तैराभरणैस्ततः । तयोः प्रीत्या सदाऽस्माकं पूर्णाःसन्तु मनोरथाः । (पाकभोजनादिपात्राणाम्) परापवादपैशून्यादभक्ष्यस्य च भक्षणात् । समुत्पन्नं च यत्पापं ताम्रपात्रात्प्रणश्यतु । यानि कानि च पापानि कामाकामकृतानिच । कांश्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥ पापानि यान्यनेकानि ज्ञानाऽज्ञानकृतानि च । पैत्तलस्य प्रदानेन तानि नश्यन्तु मे सदा ॥ यानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

पापान्यनेकानि मया कामकृतानि तु। लोहपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥ अगम्यागमताज्जातं परदाराभिमर्शजम्। रौप्यपात्रप्रदानेन पापं नश्यतु मे सदा। जन्मान्तरसहस्रेषु यत्कृतं दुरितं मया। स्वर्णपात्रप्रदानेन शान्तिरस्तुसदा मम ॥ (ताण्डुलानाम्) पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि। तस्मात्तण्डुलदानेन प्रीयन्तां विश्वदेवताः॥प्रजापते नत्वदेतान्यन्योविश्वारूपाणिपरितावभूव यत्कामास्ते जुहुमस्तन्नोअस्तुवयꣳस्याम पतयोरयीणाम्। इति प्रार्थ्य दानप्रतिष्ठाद्रव्यमादाय कृतस्य सोपकरणशय्यादानकर्मणः साङ्गफलप्राप्तये इदं सुवर्णनिष्क्रयीभूतं रजतखण्डं चन्द्रदेवताकममुकगोत्रायेत्यादि दद्यात्। प्रतिग्रहीतास्वस्तीत्युका कोदात्कस्माअदात्कामोदात्कामायादात्कामो दाता कामः प्रतिग्रहीता कामैत्तत्ते इति कामस्तुतिं पठेत्। कर्ता विप्रकरे धृत्वा शय्यायामुपवेशयेत्। ततः पूर्वोक्त विधिना छत्रोपानहदानं कृत्वा कर्म समापयेत्।

भूमिदानप्रशंसा।

त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती। हेमाद्रौ भारते नभूमिदानादस्तीह परं किंचिद्युधिष्ठिरः तथा सुवर्णं रजतं वस्त्रं मणिमुक्ताऽऽसनानि च। सर्वमेतन्महीपाल ददाति वसुधां ददत्। पितॄंश्च पितृलो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

कस्थान्देवलोकेथ देवताः सन्तर्पयतिशान्तात्मा यो ददाति वसुन्धराम्। तत्रैव विष्णुधर्मोत्तरे हस्तमात्रन्तु यो दद्याद्भुवः पुरुषसत्तमः। तेनैव ध्रुवमायाति भूमिदानफलं नरः॥ तत्रैव भारते। यत्किञ्चित्कुरुते पापं पुरुषो वृत्तिकर्षितः। अपि गोचर्ममात्रेण भूमिदानेन पूयते तत्रैव विश्वामित्रः। गोचर्ममात्रां यः पृथ्वीं ब्राह्मणाय प्रयच्छति। सर्व्वदः स तु विज्ञेयः शक्रवद्दिवि मोदते॥ तत्रैव बृहस्पतिः। आस्फोटयन्ति पितरः प्रजल्पन्ति पितामहाः। भूमिदोऽस्मत्कुले जातः सो स्माकं तारयिष्यति। तत्रैव विष्णुधर्मोत्तरे यदुत्पन्नमथाऽश्नाति नरः सम्वत्सरं द्विजः। एकं गोचर्ममात्रन्तु भुवः प्रोक्तं विचक्षणैः इति। भूमिदानमाहात्म्यं श्रुतौ स्मृतौ पुराणेषूपपुराणेषु रामायणाऽऽदीतिहासेषु दानानिवन्धेषु कुत्र वा प्रभूततरं नोपलभ्यते। श्रवणविलोकनरसिकास्ततो विदांकुर्वन्तु।

भूमिदानसंकल्पः।

भूमिं मृदं वा ब्राह्मणं च सम्पूज्य सकुशातिल जलेन हस्तेन मृदमादाय देशकालकीर्तनान्ते अहं कायिकवाचिकमानसिकसांसर्गिकज्ञानाऽज्ञानकृताऽनेकजन्मोपार्जितसंभावितसकलपातकनाशार्थमेकविंशतिकुलतरणार्थं भूमिदानकल्पोक्तसकलफलावाप्तये इयद् (रोपनी,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

विगाहा) प्रमाणां भूमिं विष्णुदेवत्यां तुभ्यमहं सम्प्रददे तत्सन्नमम इति कुशातिलोदकं ब्राह्मणहस्ते निक्षिपेत्। ब्राह्मणोपि भूमिं मनसा प्रदक्षिणीकृत्य प्रतिग्रहं कुर्यात्। समीपां भूमिं साक्षात्प्रदक्षिणीकुर्यात्। दाता, 'यथाभूमिप्रदानस्य कलां नार्हन्ति षोडशीम्। दानान्यन्यानि मे शान्तिर्भूमि दानाद्भवत्विह। सर्वभूताश्रयाभूमिर्वराहेण समुद्धृता। अनन्तशस्यफलदा अतः शांतिं प्रयच्छ मे। सदारोहन्ति बीजानि-फालाऽऽकृष्टे महीतले। तव प्रदानात्सकला मम सन्तु मनोरथाः'इति प्रार्थ्य। दानप्रतिष्ठा सुवर्णं तन्मूल्यं वादाय कृतस्येयद्प्रमाण भूमिदानस्य प्रतिष्ठार्थं सुवर्णं वन्हिदैवतममुकगोत्रायेत्यादि दद्यात्।

पञ्चबलिदानस्य सप्रयोगाः संकल्पाः।

पुत्रलाभ दुःसाध्यकार्यसिद्धि महाभयनिवृत्ति कष्टसाध्यरोगनाशादि मनोपिभलतिबृहत्कार्यसिद्धि कामनायां प्रायः पञ्चबलिदानं कुर्वन्ति तत्र।

संकल्पः।

पूजासाम्रग्रीं पञ्चबलींश्च स्पृष्ट्वा अहं कायिकवाचिकमानसिकसांसर्गिक ज्ञनाऽज्ञानकृताऽनेकजन्मोपार्जिताऽमुककार्यप्रतिबन्धकदुरितप्रशमनपूर्वकममुक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

देवताप्रसादेनाऽमुकफलप्राप्तये* महिषच्छाग, मेष, हंस, कुक्कुटरूपपंचबलिसहितयाऽनया सामग्रया श्रीमदमुकदेवतायाः पूजनं करिष्ये इति सङ्कल्प्य देवतां सम्पूज्य नैवेद्यसुगन्धदानपर्यन्तं समाप्य बलिदानं कुर्यात् । ततस्ताम्बूलसिन्दूरमालानीराजन प्रभृतीनुपचारान्समर्प्य पूजां समापयेत् ।

कामनाविशेष विरहेतुआयुर्वृद्धि, रोगनाश, शत्रुजय, धनलाभ, सिद्धि, स्वर्ग, सर्वकर्मसिद्धयादिकं निष्कामस्य मोक्षञ्चपुरश्चर्यार्णवे बलिदानकल्पोक्तं फलमुल्लिख्य सङ्कल्पवाक्यं रचयेत् ।

बलिदानप्रयोगः संकल्पश्च ।

बलीनानीय वाराही यमुना गङ्गा करतोया सरस्वती । कावेरी चन्द्रभागा च सिन्धुसागरभैरवाः । बलिस्नाने महेशानि सान्निध्यमिहकल्पय इत्यभिषिच्य । सिन्दूरचन्दनाऽक्षतपुष्पधूपदीपनैवेद्यैर्बलीन्सम्पूज्य गायत्रीं श्रावयेत् । तद्यथा दक्षकर्णे 'पशुपाशायविद्महे विप्रकर्णायधीमहि तन्नोजीवः प्रचोदयात्' इति पशुपाशविमोचिनीं गायत्रीं श्रावयित्वा, खड्गं पूजयेत् । खड्गायाऽसुरनाशाय शक्तिकार्याय तत्पर । पशुश्छे-

* फलसिद्धयुत्तरपूजायांतु 'उद्ययाचितामुकफलसिद्धे' इति पदं प्रक्षिपेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

व्यस्त्वया शीघ्रं खड्गनाथ नमोऽस्तुते इति सिन्दूरादिभिः खड्गं सम्पूज्य, कुशतिलजलान्यादाय देशकालकीर्तनान्ते अहं अमुकदेवतायाः शतवर्षावच्छिन्नतृप्तिदं यमदैवतं महिषबलिं, पञ्चवर्षाऽवच्छिन्नतृप्तिदं वह्निदैवतं छागबलिं, वर्षत्रयाऽवच्छिन्नतृप्तिदं वायुदैवतं हंसबलिं, मासद्वयाऽवच्छिन्नतृप्तिदं वायुदैवतं कुक्कुटबलिं चाऽमुककार्यसिद्ध्यै[1] श्रीमदमुकदेवताप्रीतये घातयिष्ये इति कुशोदकं सर्वेषां बलीनां शिरसि निक्षिपेत् बलीन्निरीक्ष्यप्रार्थयेत् यथा (महिषस्य) यमस्य वाहनत्वेन ख्यातस्त्वमसि कासर । वसतः शृङ्गयोरग्रे मृत्युकालौ सदा तव । भवानेव परिद्वेष्टि जवनांस्तुरगानपि । तवरूपं समास्थाय रम्भाऽसुरसुतः पुरा । भगवत्यासमंयुद्ध कृतवान्दर्पमोहितः । देव्यास्तं निहतश्चासितया क्रान्त शिरस्तव । वहस्यतश्चण्डिकां त्वं शिरसा भंगुरेण च । त्वत्तोनाऽन्यो बलिः कश्चिद्देव्याः प्रीतिप्रदायकः । अतो ददामि देव्यै त्वां भक्तियुक्तेन चेतसा । मयि कल्याणमाधाय गच्छ कासर सद्गतिम् ॥ (छागस्य) छागस्त्वं बलिरूपेण मम भाग्यादुपस्थितः । प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ चंडिकाप्रीतिदानेन दातुरार्षाद्धनाशन । भवानोबलिरूपाय बले तुभ्यन्नमो

१ कार्यं सिद्धयुत्तर पूजनेतु अमुक कार्यं सिद्धयुत्तरं इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

नमः ॥ यज्ञार्थे पशवः सृष्टा स्वयमेव स्वयम्भुवा। अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधो ऽवधः। इमं देहं परित्यज्य भूत्वा देववपुर्धरः। मोदस्व प्रथमैः सार्द्धं यावदिन्द्राश्चतुर्दश (मेषस्य) यस्मात्त्वं मेष यज्ञानामाहुतित्वे व्यवस्थितः। यानं विभावसार्नित्यमतःशान्तिंप्रयच्छ मे (हंसस्य, कुक्कुटस्य) इतिप्रार्थ्य शरीरकम्पोत्तरं यद्देवताऽऽयतने यत्पशुक्रमेण वलिदानं प्रचलितं तेन क्रमेण वलीन्घातयेत्। तदीयान्रुधिरमांसयुतान्प्रज्वलद्दीपसहितान्मुण्डान्देवाऽभिमुखं निधाय; अमुकदेवतायाः शतवर्षाऽवच्छिन्नतृप्तिदं प्रज्वलद्दीपसहितं सरुधिरं समांसं इमं महिषमुण्डवलिं, पञ्चवर्षाऽवच्छिन्नतृप्तिदं प्रज्वलद्दीप सहितं सरुधिरं समांसं इमं छागमुण्डवलिं, वर्षत्रयावच्छिन्नतृप्तिदं प्रज्वलद्दी० इमं मेषमुण्डवलिं, मासद्वयावच्छिन्नतृप्तिदं प्रज्वलद्दी० इमं हंसमुण्डबलिं, मासद्वयावच्छिन्नतृ० सहितं इमं कुक्कुटमुण्डवलि गृह्ण गृह्ण गृह्णापय गृह्णापय मम शान्ति कुरु कुरु वीरविद्यामाकृष्य त्रुट त्रुट छिन्धि छिन्धि ह्रीं स्वाहा इतिसमर्प्य आचमनीय दत्वा जय देवि जगन्मातर्जय पापौघहारिणी। जय जन्मजराव्याधितृणदावनलाकृते। प्रीता भव महाचण्डे रक्ष मां शरणागतम्। आयुर्देहि धनंदेहि भाग्यकीर्तिंच देहि मे इति स्तुत्वा प्रणम्य ताम्बूलं सिन्दूरमुपायनाद्युपचारशेषान्समर्पयेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

पुरुषदेवतायां स्त्रीदेवतावाचकपदस्थाने पुरुषदेवतावाचकपदान्यावपेत् । एक मात्रबलिसत्वे वल्यन्तरोक्तां सर्वामितिकर्तव्यतां परित्यजेत् इति ॥

पूजासामाग्री संकल्पः ।

पूजासम्भारं स्पृष्ट्वा अहं कायिकवाचिकमानसिकसांसर्गिकज्ञानाऽज्ञानकृताऽनेकजन्मोपार्जितसमस्तपापक्षयपूर्वकं श्रीदक्षिणकालिकाप्रसादसिद्धये चन्दन सिन्दूर पिष्टातकाऽक्षत पुष्प बिल्वपत्राऽनेकपुष्पमाला वस्त्र सौभाग्यद्रव्य धूप दीप कर्पूरनीराजन मिष्टन्नाऽनेकफलनैवेद्य सुगन्ध लवङ्ग पूगीफल ताम्बूलादिमुखवासोपायनद्रव्यप्रमुखैर्यथामिलितोपचारैश्छागबलिसहितैः श्रीदक्षिणाकालिकां पूजयिष्ये इति सङ्कल्प्य पूजामारभेत । नैवेद्यपर्यन्तमुपचारं समर्प्य पूर्वोक्तबलिदानविधिना बलिदान कुर्यात् । ततः ताम्बूलसिन्दूरोपायनद्रव्यनीराजनाद्युपचारशेषान्समर्प्य पूजां समापयेत् ।

एवं स्त्रीदेवतान्तरपूजायामपि सङ्कल्पवाक्ये 'दक्षिणाकालिका' पदस्थाने तत्तद्देवतानाम प्रक्षिप्य पूजासामग्रीसङ्कल्पंविदधीत । गणेशभैरवादिबलिग्रहाहिपुरुषदेवतापूजायां 'दक्षिणकालिका' पदस्थाने तत्तद्देवतानाम प्रक्षिप्य सौभाग्यद्रव्यादिपदं विहाय सङ्कल्पयेत् । बलिदानपद्धतौ देवप्रार्थनायाञ्च स्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

देवतावाचकपदस्थाने पुरुषदेवतावाचकं पदं प्रक्षिपेत् । बलिदानाऽग्राहि विष्णुशिवादिपूजायान्तु 'बलिसहिते' रितिपदं विहाय सङ्कल्पयेत् । बलिविरहाद्बलिदानोक्तं सर्वं लुप्तमेव ।

काम्यपूजायान्तु पापक्षय देवप्रसादवाचकानि पदान्युद्धृत्य अमुकस्याऽऽरोग्यसिद्धये तीव्रज्वरविनाशार्थमित्यादि काम्यवाचकपदावापेनोचितं वाक्यं निर्मिमीत । लिखितेषूपचारेषु कस्मिंश्चिदसति तन्नामनोल्लिखेत् । वस्त्वन्तराऽऽधिक्ये तद्वस्तुनामोल्लिखेत् । वल्याऽभावे वलिरितिपदं त्यजेत् ।

❀उपयाचितपूजासंकल्पः ।

मम पुत्रे उत्पन्ने मम हृदयशूलनाशे वा सति अशोकविनायकस्य छागवलियुतां पूजां करिष्ये इति उपयाचितापरपर्याये पूर्वसङ्कल्पे तु वलिसहितां पूजा सामग्रीं स्पृष्ट्वा अहं छागवलिसहितयाऽनया सामग्र्या श्रीमदशोकविनायकस्य पूर्वोपयाचितां पूजां करिष्ये इति संकल्प्य पूजयेत् । इति ।

लक्षदीपदान सङ्कल्पाः । श्री पशुपतिनाथ प्रीतये

वरणसङ्कल्पः । देशकालकीर्तनान्ते सभर्तृका सपरिवारा' 'देवी अहं इहदारिद्र्यनाश पुत्रपौत्रादि

❀ (भाकल) नेपालीय भाषा ः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

समृद्धि, अखण्डशौभाग्यप्राप्ति विपुलभोगतेजस्वित्व-प्राप्तिपूर्वकं दशपूर्वदशापर कुलसाहित्येन शिवलोक गमन दीपप्रज्वलन निमेषादिकालभागसमयुगसहस्त्र पर्यन्तं शिवलोक महीतत्वादि लक्षदीपदान कल्पोक्त सकलफलावाप्तये, श्री पशुपतिनाथ प्रीतये लक्षदीप-दानं श्रीपशुपतिनाथ पूजनं, लक्षदीपोद्यापनं, तदङ्गतया स्वतिवाचनं, पुण्याहवाचनं, दीपगणेशकलश स्थापन पूजनाऽग्निस्थापनं, ॐ नमः शम्भवायेति मन्त्रेण अष्टोत्तरशतहोमं,* एकादशावृत्ति रुद्राध्याय पाठंच करिष्ये। तत्तत्कर्मकर्तुं नानागोत्रान् नानाशर्मणो ब्रह्मणानेभिश्चन्दनाक्षत पूगीफलैर्युष्मानहं वृणे— इत्यादि।

पूजासामग्रीसङ्कल्पः।

देशकालकीर्तनान्ते····देवीअहं कायिक वाचिक मानसिक सांसर्गिक ज्ञानाऽज्ञानकृत सकलपापक्षय पूर्वकं श्रीपशुपतिनायप्रसादसिद्धये चन्दनसिन्दूर विल्वपत्र नानाविध पुष्पमाला नारिकेल वस्त्रधूपदीप नानाविध फलमिष्टान्नादि नैवेद्य, कर्पूर नीराजन सुगन्धापूगीफल ताम्बूलोपायन द्रव्य प्रमुखैर्यथामिलि-तोपचारै–श्रीपशुपतिनाथं पूजयिष्ये—

---

* महारुद्र (१२१ आवृत्ति) पाठेत्। जलधारया सदाशिवस्याभिषेकं करिष्ये।

T-1
9266

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

लक्षवर्तिकासङ्कल्प ।

दीपंप्रज्वाल्य सम्पूज्य देशकालकोर्तनान्ते सभर्तृका सपरिवारा····देवी अहं इह दारिद्र्यनाश पुत्रपौत्रादिसमृद्धि अखण्डसौभाग्यप्राप्ति विपुलभोग ज्ञानतेजस्वित्व प्राप्तिपूर्वकं, दशपूर्व दशापर कुलसाहित्येन शिवलोक गमन, दीपप्रज्वलन निमेषादिकाल भागसम युगसहस्त्रपर्यन्तं शिवलोक महितत्वादि, लक्षदीपदान कल्पोक्त समस्तफलावाप्तये, एकादशसूत्रं (पंच सूत्रंवा) तिलतैलाक्तं, प्रज्वलितं लक्षदीपं राजतदीपपात्र, सुवर्णवर्तिकासहितं श्रीपशुपतिनाथ प्रीतये समर्पये ।

सुवर्णवर्तिकासहितराजतदीपपात्रदान सङ्कल्पः ।

दीपंप्रज्वाल्य, संपूज्य—देवी अहं दारिद्र्यनाश—अखण्डसौभाग्यप्राप्तिपूर्वक लक्षदीपदानकर्मणः साङ्गफलप्राप्तये, सुवर्णवर्तिका सहितं राजतदीपपात्रं विश्वकर्मदेवताकं, यथानाम गोत्रायेति दत्वा । अञ्जलिं वद्ध्वा, रौप्परुद्रमयंदीपं गोघृतेन (तिलतैलेन वा) समन्वितम् सुवर्णवर्ति संयुक्तं शम्भो प्रीत्यै ददामिते—दानप्रतिष्ठा ।

सुवर्णघृतसहित कांस्यपात्रदान सङ्कल्पः ।

देयं विप्रंच सम्पूज्य, देयंपृष्ट्वा····देवीअहं श्रीपशुपतिनाथ प्रीतये अद्यकृतस्य लक्षदीपदानकर्मणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

साङ्गतासिद्धये अखण्डसौभाग्य प्राप्तयेच घृतपूर्ण सुवर्ण-खण्डयुतं कांस्यपात्रं सुवर्ण वह्निदेवताकं घृतं मृत्युञ्ज-यदेवताकं कांस्यपात्रं विश्वकर्म देवताकं—गोत्रा येति दत्वा अंजलिंबध्वा कांस्यपात्रमिदंदेव गोघृतेन सम-न्वितम् । सुवर्ण सहितं दद्यामतः शान्तिं प्रयच्छमे । महादेव जगन्नाथ भक्तानुग्रहकारक । त्वत्प्रसादादहं याचे शीघ्रं कामप्रदोभव ।

विष्णुलक्षदीपदान सङ्कल्पाः

प्रधानसङ्कल्प—देवी अहं अखण्डसौभाग्य प्राप्ती रजः सम्पर्कादिजनित सकलपापक्षय विपुलभोग ज्ञान-तेजस्वित्व प्राप्तिपूर्वकं दशपूर्वदशापरं कुलसाहित्येन विष्णुलोक गमनार्थं दीप प्रज्वलन निमेषादिकालभाग समयुगसहश्रपर्यन्तं विष्णुलोकमहितत्वादि लक्षदीप-दान कल्पोक्त सकलफलावाप्तये श्री विष्णुप्रीतये लक्ष-दीपदानं तदुद्यापनाग्निस्थापन होमादिच करिष्ये तत्क र्मकर्तुं नानागोत्रा····वृणे इत्यादि ।

लक्षवर्तिकासमर्पणसङ्कल्पाः ।

अहं इहविपुलभोग····वाप्तये पञ्चसूत्रं तिलतैलाक्तं प्रज्वलितं लक्षदीपं राजतदीपपात्रं सौवर्णवर्तिकासहितं श्रीमन्नारायणप्रीतये समर्पये 'ॐ विष्णवे स्वाहा' इति मन्त्रेण होमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

लक्षदीपदानं–देवीप्रीतये ।

.....देवी अहं इहविपुलभोग, ज्ञान, तेजस्वित्व अखण्ड सौभाग्य प्राप्तिपूर्वकं, दशपूर्व दशापर कुल-साहित्येन श्रीमदिष्टदेवता दक्षिणकालिका लोक-गमनार्थं, दीपप्रज्वलननिमेषादिकाल भागसमयुग-सहस्रपर्यन्तं श्रीमदिष्टदेवता लोकमहितत्वादि लक्षदीप-दान❀ कल्पोक्त सकलफलावाप्तये श्रीमदिष्टदेवता-प्रीतये नवसूत्रं तिलतैलप्लुतं पूर्वोपयाचिन्तं प्रज्वलितं लक्षदीपं समर्पये ।

पूजासामग्रीसङ्कल्पः

देवी अहं कायिक.....क्षयपूर्वकं श्रीमदिष्टदेवता दक्षिणकालिकाप्रसाद सिद्धये चन्दनसिन्दूर विल्वपत्र नानाविधपुष्पमाला वस्त्र धूपदीप नानाविध फल-मिष्टान्नादिनैवेद्यकर्पूरनीराजन सुगन्ध पूगीफल ताम्बूलोपायन द्रव्य प्रमुखैर्छागबलिसहितैर्यथामिलितो पचारैः श्रीमदिष्टदेवतां दक्षिणकालिकां पूजयिष्ये ।

देहवर्तिसमर्पण सङ्कल्पः ।

देशकालौसंकीर्त्य–ममइहजन्मनि सङ्कटोद्धारपूर्वकं सर्वकाम समृद्धि विपुलराज्य सुखप्राप्तये परस्मिञ्जन्मनि पुत्रपौत्रादि साहित्येन विपुलराज्य सुखभोगलाभान्तर मिष्टदेवतासायुज्य मोक्षप्राप्तये गोधृतप्लुतां सुप्रज्वलि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

तामात्मदेहसंमितां षष्ट्युत्तर शतत्रयवर्तिमिष्टदेवता प्रीतयेसमर्पये—इति सङ्कल्पनिराजंकृत्वा राजतदीपं प्रज्वाल्य सुवर्णवर्तिकांचनिधाय सङ्कल्प्य दद्यात्।

जलाशयोत्सर्गसङ्कल्पः

देशकालकीर्तनान्ते अहं कायिक वाचिक मानसिक ज्ञानाऽज्ञानकृत सकलपापक्षयपूर्वकं रूद्रालयगमनान्तर बहुकल्पकालावधिक द्युलोकभोगानुभवपूर्वक परार्द्धद्वय कालावच्छिन्नमहस्तपः प्रभृति लोकाङ्गनासहित तत्तल्लोक भोगोत्तरकाल सद्योगवलप्राप्य वैष्णव पद प्राप्तिकाम इमं जलाशयं (जलधारा) वरूणदेवताकं स्नानपानावगाहनाद्यर्थं सर्वभूतेभ्य उत्सृजे इत्युक्त्वा जलाशयं निरीक्ष्य जलं भूमौनिक्षिप्य—सर्वभूतेभ्य उत्सृष्टं मयैतज्जल मूर्जितम्, रमन्तु सर्व भूतानि स्नानपाना वगाहनैः। सामान्यं सर्वभूतानां मयादत्तामिदंजलम्। रमन्तु सर्वभूतानि स्नानपानावगाहनैः। देवर्षिपितृ मनुष्याः प्रीयन्ताम्। जलाशयं स्पृष्ट्वा; कुरूक्षेत्रं गया गङ्गा प्रभासः पुष्कराणि च, एतानि पञ्चतीर्थानि धारायां निवसन्तु मे ॥१॥ वितस्ता कौशिकी सिन्धु रमावन्ता दृषद्वती, एतानि पञ्चतीर्थानि० ॥२॥ दशार्ण मुरजा सिन्धु रमावन्ता दृषद्वती, एतानि पञ्चतीर्थानि० ॥३॥ यमुना नर्मदा चैव चन्द्रभागा च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

वेदिका, एतानि पञ्चतीर्थानि० ॥४॥ गोमती बाङ्मती शोणे गण्डकी सागरस्तथा, एतानि पञ्चतीर्थानि० इति तीर्थानी प्रार्थयेत् ।

धर्मशालोत्सर्गसङ्कल्प

अहं आत्मसहित पितृकुल मातृकुल (भर्तृकुल) गतस्वर्गापवर्गदा क्षय्य पुण्य स्वर्गाधिकरण देवतुल्यानंद लाभात्मगत सर्वकाम समृद्ध्यादि प्रतिश्रय दानकल्पोक्ताऽखिल फलावाप्तये पक्वेष्ट कचिल सतलां इमां धर्मशालां पान्थ प्रभृतिभ्यः सकलेभ्यो भूतेभ्यः प्रतिश्रयार्थमुत्सृजे ।

घट्टोत्सर्ग (घाटदान गर्ने) सङ्कल्पः

अहं इहाखिलसंपदादिष्ट वियोगाननुभवसहित पूर्णापुष्पेच्छुः सोपानसंबद्ध पाषाणस्थितिपर्यन्ता विछिन्न सन्ततिकामः परत्रसकलपातकक्षयपूर्वकानेक कल्पकालावधिकसहजा लोकस्वर्लोक गतानेक निरूपयरूपांगमार्दवाङ्गमनोपभोग मन्दारादिदेवतरु कुसुमसुगन्ध लोकोत्तरानन्दजनक गान महामखफलामृतरसास्वादनपूर्वकमहस्तपःप्रभृति तल्लोकगत भोगोत्तर कैलाशपदप्राप्तये इमं सोपानवन्धं संचारावस्थानावतरणादि यावद्भोगार्थं सर्वेभ्योभूतेस्य उत्सृजे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

घण्टासमर्पणसङ्कल्पः

अहं अभक्षभक्षणादि दारुणपापमुक्ति शोभनरथारोहणपूर्वक शिवलोकगमनोत्तर कल्पकोटि शतावधि तल्लोक भोगोत्तर धराधिकरणक चतुर्वेदीब्राह्मण जन्मलाभोत्तर शोकदुःख विवर्जयित्वा पुरःसर सर्वोत्तममोक्षलाभाय गरुडप्रतिमाङ्किता (सिंह वृषभाङ्कितां वा) मिमां कांस्यघण्टां विश्वकर्म देवताकां श्रीमन्नारायणप्रीयते समर्पये ।

इति कौण्डिन्यमुनिकुलोत्पन्नेन हरिनाथशर्मणा सङ्कलितायां सङ्कल्परत्नावल्यां सङ्कल्पप्रकरणम् ।

❀

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अथ श्राद्धप्रकरणम्

श्राद्धविषये किञ्चिदुच्यते ।

श्राद्धशब्दार्थविचारस्तस्यावश्यकताच ।

चतुर्थ्यन्तपदोपनीतपित्राद्युद्देश्यकस्त्यागः श्राद्धम् । श्राद्धे होम (अग्नौकरणं) पिण्डदान भोजनानि प्रधानमिति हेमाद्रिः । 'होमश्च पिण्डदानञ्च तथा ब्राह्मणभोजनम् । श्राद्धशब्दाभिधेयंस्यादेकस्मिन्नौपचारिकम्' इति श्रीधरः । 'श्राद्धस्याभ्युदयार्थत्वमाह सुमंतुः । 'श्राद्धात्परतरं नान्यच्छ्रेयस्करमुदाहृतम्, इति प्रत्यवायपरिहारार्थत्वमाह आदित्यपुराणे 'नसन्ति पितरश्चेति कृत्वा मनसि यो नरः । श्राद्धं नकुरुते तत्र तस्य रक्तं पिवन्ति ते' इति । अतः पित्राद्युद्देशेन पुत्रादिभिः श्राद्धमवश्यंकर्तव्यम् ।

श्राद्धभेदाः ।

श्राद्धभेदास्तु पार्वणैकोद्दिष्टवृद्धिसपिण्डीकरणभेदाच्चत्वारः । तेषामेव प्रपञ्चो नित्यश्राद्ध, काम्यश्राद्ध, क्षयाहश्राद्ध, *गोष्ठीश्राद्ध, शुद्धिश्राद्ध, यात्रार्थश्राद्ध, गयाश्राद्ध, तीर्थश्राद्ध, प्रवेशश्राद्ध, मासि-

* गोष्ठ्यां श्राद्धकर्तृसमुदाये सम्भूय सामग्रीसम्पादनेन श्राद्धमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

कश्राद्धादीनि षण्णवति श्राद्धानि च। तानितु अमा युगमनुक्रान्ति धृतिपात महालयाः। अष्टकाऽन्वष्टका पूर्वेद्युः श्राद्धैर्नवतिश्च षट् इति संगृहीतानि अमावास्याश्राद्धानि द्वादश, युगादिश्राद्धानि चत्वारि, मन्वादिश्राद्धानि चतुर्दश, संक्रान्ति श्राद्धानि द्वादश, वैधृतिश्राद्धानि द्वादश, व्यतीपातश्राद्धानि द्वादश, महालयश्राद्धानि पञ्चदश, अष्टका श्राद्धानि पञ्च, अन्वष्टकाश्राद्धानि पञ्च, पूर्वेद्युः श्राद्धानि पञ्च, शुद्धि श्राद्धं प्रायश्चित्ताङ्गमिति मैथिलाः।

श्राद्धोद्देश्यता जनकादीनामेव।

श्राद्धे पित्रादिशब्दैर्जनकादीनामेव देवतात्वमुच्यते न वस्त्रादीनाम्। 'अशावेतत्त इति यजमानस्य पित्रे' इति शतपथश्रुतेः। 'यस्य पिता प्रेतः स्याच्चत्पित्रे पिण्डं निधाय' इति विष्ण्वादिस्मृतेश्च वसुरुद्रादित्यैस्तु पितृपितामह प्रपितामहानामभेदबुद्धिः कर्तव्या। प्रयोगोऽपिअमुकगोत्रो अस्मत्पिताऽमुकशर्मा वसुस्वरूपः, अमुकगोत्रो अस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपः, अमुकगोत्रो अस्मत्प्रपितामहोऽमुकशर्माऽऽदित्यस्वरूपः इत्यादिरीत्या कर्तव्यः। 'वसवः पितरोज्ञेया रुद्राज्ञेयाः पितामहाः। प्रपिता महास्तथाऽऽदित्याः श्रुतिरेषा सनातनी' इति मनु देवलोक्तेः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

'वसुरुद्रादितिसुताः पितरः श्राद्धदेवत इति याज्ञवल्क्योक्तेश्च।

पित्राद्युद्देशेन दत्तं पिण्डादि कथं तेषामुपतिष्ठते इति विचारः।

मृतानां विविधपुण्यपापवशान्नानाजातावुत्पन्नानां स्वर्गादिभिन्नभिन्नदेशवर्तिनां पित्रादीनां भूमिस्थैः पुत्रादिभिर्दत्तं पिण्डजलादिकं कथमुपतिष्ठते? तत्रोच्यते। मृतानां च पित्रादीनां ब्राह्मणजाते रग्निष्वात्तानाम देवताः, क्षत्रियजातेर्वर्हिषदो नाम देवताः, वैश्यजातेः काव्या नाम देवताः, शूद्रजातेः सुकालिनो नाम देवताः अधिपतयस्तत्तत्सुतादिभिर्दत्तानां पिंडादीनां वस्तूनां नाम गोत्र सम्बन्धैर्यथायथं प्रापकाः। मृताः पित्रादयो देवजातौ जाताश्चेत् तत्सुतादिभिर्दत्तं पिण्डादिवस्त्वमृतं कृत्वा प्रापयन्ति। गन्धर्वाश्चेद्भोग्यं वस्तु, पशवश्चेत्तृणानि, नागाश्चेद्वायुं, यक्षाश्चेत्पानं, राक्षसाश्चेन्मासं, दानवाश्चेन्मद्यं, प्रेताश्चेद्रुधिरोदकं, मनुष्याश्चेदन्नपानादि नानाभोगकरम्। यज्जातिरूपेणोत्पन्नाः पित्रादयस्तज्जातिभोग्यं कृत्वा श्राद्धीयं वस्तु प्रापयन्ति। 'अग्निष्वात्ता ब्राह्मणानां पितरः परिकीर्तिताः। राज्ञां वर्हिषदो नाम विशांकाव्याः प्रकीर्तिताः। सुकालिनस्तु शूद्राणां व्यामा म्लेच्छान्त्यजातिषु' इति नन्दिपु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

राणात्। पितरः पितृणामधिपतयः। 'नाम गोत्रं पितृणान्तु प्रापकं हव्यकव्ययोः। अग्निष्वात्तादयस्तेषा माधिपत्ये व्यवस्थिताः। नाम मन्त्रास्तदा देशा भवान्तरगतानपि। प्राणिनः प्रीणयन्त्येव तदाहारत्वमागतान्। देवो यदि पिता जातः शुभकर्मानुयोगतः। तस्यान्नममृतं भूत्वा देवत्वेप्यनुगच्छति। गान्धर्वे भोगरूपेण पशुत्वे च तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेप्युपतिष्ठति। पानं भवति यक्षत्वे राक्षसत्वे तथाऽऽमिषम्। दनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकम्। मनुष्यत्वे ऽन्नपानादि नानाभोगकरं भवेत् इति हेमाद्रौ मात्स्यदेवलोक्तेः। एतच्च सर्वं निर्णयसिन्धौ स्पष्टम्।

काश्यादिमरणादिना मुक्तानां श्राद्धं कर्तव्यंनवेति विचारः।

काशीप्रयागमरणादिनामुक्तानां क्षयाहादिश्राद्धं गयाश्राद्धंच कर्तव्यंनवा? कर्तव्यमिति ब्रूमः,। यतः श्राद्धानां नरकादुद्धारः स्वर्गादिलोकभोगोऽक्षय्यतृप्तिश्चेत्येकविधं पितृगतं फलम्। धनाऽऽयुःसन्तानादि नरकानवपातः सकामानां, प्रत्यवायपरिहारो निष्कामानामपीति कर्तृगतंद्विविधमिति त्रिविधं फलम्। तत्र मुक्तानां देहाऽभावेन तद्गतफलभोगाऽसम्भवेपि कर्तृषु सकामानां धनाऽऽयुरादिफलार्थं, निष्कामानामपि प्रत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

वायपरिहारार्थं श्राद्धाऽनुष्ठानस्याऽऽवश्यकत्वात्। एतेन ब्रह्मकपालीतीर्थे कृतपिण्डानां केषाञ्चित् क्षयाहमहालयादिश्राद्धाऽननुष्ठानमशास्त्रीयमेव। तत्तीर्थमाहात्म्य प्रदर्शनाय पुनःश्राद्धाऽनुष्ठाननिषेधे सत्यपि प्रत्यवायाऽऽवेदकशास्त्रस्य जागरूकतया प्रत्यवायपरिहारार्थं मवश्यमनुष्ठेयत्वात्। त्रिविधफलबोधकानि च वचनानि श्राद्धप्रकरणे स्मृतिपुराणाऽखिलनिबन्धेषु प्रचुरतराणि समुपलभ्यन्ते। कतिचित्तु प्रदर्श्यन्ते। क्षयाहश्राद्धस्य नित्यत्वे वचनम् 'भोजको❀ यस्तु वै श्राद्धं नकरोति खगाधिप। मातापितृभ्यां सततं वर्षे वर्षे मृतेऽहनि। स याति नरकं घोरं तामिस्रनाम नामतः' इति महालयश्राद्धस्य नित्यत्वे काम्यत्वे च वचनानि 'पुत्रानायुस्तथाऽऽरोग्यमैश्वर्यमतुलन्तथा। प्राप्नोति पञ्चमे दत्वा श्राद्धं कामञ्च पुष्कलम्' इति जाबालिः। वृश्चिके समतिक्रान्ते पितरोदैवतैः सह। निःश्वस्य प्रतिगच्छन्ति शापं दत्वा सुदारुणम् इति काष्णाजिनिः। तदतिक्रमे प्रायश्चित्तमुक्तमृग्विधाने। 'दुरोअश्वस्य मंत्रञ्च दशवारं द्विमासयोः महालयं यदा हीनं तदा सम्पूर्णमेतितत्' इति द्विमासयोः कन्यातुलयोर्महालयश्राद्धं यदाहीनमित्यर्थः। मुक्ते पितरि

❀ भोजको धनभोक्ता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सतिकामे कर्तृगतंफलं पुत्रादिप्रत्यवायनिराकरणं च सर्वेषां गयाश्राद्धप्रयोजनम्। ननु कथं प्रत्यवायाभावार्थता। सर्ववचनेषु फलश्रवणादितिचेत्। उच्यते यतः पितृणाऽपाकरणस्याऽऽवश्यकता जीवतो वाक्यकरणात्क्षयाहे भूरिभोजनात्। गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता' इति वचने पितृणाऽपाकरणाख्यपुत्रकार्यकारिता पुत्रताशब्दलक्षिता प्रयोजनं गम्यते 'गयां गत्वाऽन्नदाता यः पितरस्तेन पुत्रिण' इत्यत्राप्येवमेव। तस्माद् ब्राह्मणस्यतुसोमविद्याप्रजमृणवाक्येन संयोगादिति षाष्ठन्यायेनाऽऽवश्यककर्माऽनुष्ठानार्थार्थज्ञानाख्यप्रयोजनद्वारेणाऽध्ययनस्येव गयाश्राद्धस्यापि प्रयोजनद्वारेण नित्यता अतएव कौर्मे 'तस्मात्सर्वप्रयत्नेन ब्राह्मणस्तु विशेषतः। प्रदद्याद्विधिवत्पिण्डान् गयां गत्वा समाहित' इत्याऽऽवश्यकतोक्ता। अकरणे निन्दाऽपि तत्रैव। 'गयाभिगमनं कर्तुं यः शक्तो नाभिगच्छति। शोचन्ति पितरस्तं वै वृथा तस्य परिश्रम' इति। तस्माद्गयाकृत्यं पुत्रस्य नित्यमिति अमुक्ते पुत्रादौ नरकोद्धारस्वर्गब्रह्मलोकाऽवाप्त्यादि यथायथं फलम्। मुक्तेतु पित्रादौ प्रत्यवायाऽभावः। सत्यां कामनायां पुत्रादिच वक्ष्यमाणं कर्तृगतं फलं भवतीति सिद्धम्। इतिच त्रिस्थलीसेतौ नारायणभट्टचरणाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पार्वणश्राद्धेति कर्तव्यता सङ्ग्राहका श्लोकाः ।

भूदेवस्य निमन्त्रणं द्विजवरस्यार्घस्ततः स्वागत प्रश्नश्चेति तदुत्तरं कुरु तथा सेकं प्रतिज्ञाजपः । दिक्बन्धासनकं पितृनथपुनश्चावाहयेद्दैवतो हस्तार्घस्तमधोमुखं कुरु पुनः पूजान्ततो मण्डलम् । प्राग्ग्नौकरणं धरापतिदातिः पात्रेऽवशेषं हविस्त्वन्नानां परिवेषणं मधुजपो मध्वाज्यदानादनु । पात्रालम्भन मन्नदानमखिलं कृत्वाऽन्नहीनं जपेदापोविप्रकरे कुशोपरिविशन् मध्वादिकं संपठेत् । दानं वौकरिकं द्विराचमनता सावित्रिमन्त्रो मधुस्त्वापो विप्र करेषु पिण्डकरणे प्रश्नस्तथैवोत्तरम् । वेद्याऽङ्गारक शोधिता खलु तथा रेखाऽवसेकस्ततो दर्भाणां प्रकरं प्रसार्यच तथा सव्येन देवं यजेत् । पिण्डस्याऽऽसनतोथ पिण्डवपनं हस्तस्य संप्रोञ्छनं प्राग्वच्चाचमनं विचिन्त्य च पितॄन् पिण्डावऽनेज्याजलैः । नीव्यामोचनतोथ सव्यभवनं कुर्याद्धरेः संस्मृतिं सूत्रार्चाक्षत तोथ चान्नवपनादक्षय्यदानं ततः । सव्येघोरदातिर्वरार्थिभवनं कुर्यात्स्वधावाचनं चोर्ज पिण्ड कुशोल्मुका नलकृतिः पात्रोत्थितिर्दक्षिणा । विप्राणां च विसर्जनं सुरजपो दीपं कराच्छादितं कुर्यादाचमनं प्रमादपठनं श्राद्धस्य पूर्णः क्रमः ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

एतेषांश्लोकानां व्याख्यारूपाः श्राद्धकर्मप्रतीकाः ।

सव्येन देवब्राह्मण निमन्त्रणम् ।
अ० स० पितृब्राह्मणनि० ।
अ० स० अक्रोधनत्वादिप्रार्थना ।
सव्ये० देवब्राह्मणपादप्रक्षालनम् ।
अ० स० पितृब्राह्मण पा० प्र० ।
मातमह ब्रा० पा० प्र० ।
सव्ये० देवब्राह्मणासनम् ।
अ० स० पि० ब्राह्मणासनउपवेशनम् ।
सव्येन कर्मपात्रनिर्माणं ।
अ० स० कर्म० निर्माणं ।
स० पवित्रापादनम् ।
,, प्रतिज्ञासंकल्पः ।
,, देवताभ्यः ।
,, पितृयाग गया प्रशंसा ।
अ० स० दिग्वन्धनम् ।
,, नीवीवन्धनम् ।
सव्येन विष्णुस्मरणम् ।
,, विश्वेदेवासनम् ।
अ० स० पित्रासनम् ।
सव्ये० विश्वेदेवाऽऽवाहनम् ।
अ० स० पित्रावाहनम् ।
सव्ये० विश्वेदेवाहस्तार्घः ।
अ० स० पितृहस्तार्घः ।
सव्ये० देवार्चनम् ।
अ० स० पित्रर्चनन् ।
सव्ये० देवमण्डलकरणम् ।
अ० स० पितृमण्ड० ।
,, अग्नौकरणम् ।
,, भूस्वामिनेऽन्नदा० ।
सव्ये० विश्वेदेवान्नदा० ।
अ० स० पित्रन्नदा० ।
,, अपोशानदा० ।
सव्ये० अच्छिद्र प्रार्थना ।
,, पितृसूक्तादि जपः ।
अपस० विकरः ।
,, कुशपरित्यागादि ।
सव्ये० द्विरार्चमनम् ।
,, गायत्री, मधुव्वाताजपः ।
,, गन्डूषदानम् ।
अ० स० गण्डूषदानम् ।
,, तृप्तिप्रश्नः ।
,, पिण्डदान प्रश्नः ।
,, वेदिनिर्माणादि ।
सव्ये० देवताभ्यः ।
अप स० पिण्डासनम् ।
,, पिण्डदानम् ।
अप० स० करप्रोछनम् ।
सव्ये० द्विराचम्य हरिस्मरणम्
सव्ये० उत्तरामुखत्वादि ।
अ० स० दक्षिणामुखेन पिण्डोपरि पुष्पादिक्षेपः ।
,, प्रत्यवनेजनम् ।

CC-0. Nepal Sanskrit University. Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

,, नीवी विस्रंसः ।
सव्येन हरिस्मणम् ।
अ० स० सूत्रदानम् ।
,, पिण्डपूजा ।
,, गन्धाद्युत्सर्गः ।
सव्ये० शिवा आपइत्यादिक्रिया ।
अ० स० शिवा आपइ० ।
सव्ये० अपांमध्ये पाठः ।
,, शिरोभिषेकः ।
अ० स० पिण्डसेषान्न प्रक्षेपः ।
,, अक्षय्योदकदानम् ।
सव्ये० अघोरप्रार्थना ।
,, जलधारादानम् ।
,, आशीः प्रार्थना ।
,, तिलककरणम् ।
अ० स० हस्तार्घपात्र पवित्रकुशयोः पिण्डोपरि निक्षेपः ः
अ० स० स्वधावाचनम् ।
,, दुग्धदानम् ।
,, पिण्डसम्पत्तिप्रश्नः ।
,, पिण्डोत्थापनादि ।
सव्ये० वेद्यां शंखादिलेखनादि ।
अ० स० पिण्डसहितपात्रस्य वेद्यां निधानं ।
सव्ये० वसन्तादि पूजा ।
,, विश्वेदेवार्घपात्रचालनम् ।
अ० स० पित्रर्घपात्रोत्तानीकरणम् ।
सव्ये० दक्षिणादानम् ।
,, पितृब्राह्मण विसर्जनं, विश्वे देव वि० ।
,, देवताभ्यजपः ।
अ० स० दीपाच्छादनम् ।
सव्ये० करचरणप्रक्षालनाचमने ।
,, सुकृतप्रार्थना ।
,, प्रमादादित्यादिपाठः ।
,, चतुर्भिश्चेतिपाठः ।
,, कायेनवाचा० कर्मेश्वरार्पणम् ।

इति

पार्वणश्राद्धसामग्री संग्राहक श्लोकः ।

दीपो गन्धप्रसूनाऽऽसनकुशपुटकक्षीरदध्याज्य सूत्रं नैवेद्यक्षौद्रभूमीविबुधतिलयवाऽग्न्यऽम्बुपूगीफलानि । ताम्बूलं वर्तिकाऽर्घद्वयमथ पिठरी तण्डुलाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

कर्मपात्रं वस्त्रं धूपोपवीतेन्धनमथसिकता शर्करा दक्षिणां च ॥

सुवर्णश्राद्धप्रयोगः ।

आमश्राद्धेऽप्यसमर्थः प्रवासपुत्रजन्मतीर्थग्रहणादिषु च सुवर्णश्राद्धं कुर्यात् ।

कर्ता आचम्य कर्मपात्रं कृत्वा कुशोदकेन पुण्डरीकाक्षः पुनातु इत्याऽऽत्मानं श्राद्धीयं वस्तु च सित्का तत्कुशादिकमादाय देशकालकीर्तनान्ते अहं अमुकाऽमुकाऽमुकशर्मणां पितृपितामहप्रपितामहानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकाऽमुकाऽमुकशर्मणां मातामहप्रमातामहवृद्धप्रमातामहानां वसुरुद्रादित्यस्वरूपाणां सुवर्णश्राद्धङ्करिष्ये इति प्रतिज्ञाय, देवताभ्यः इति त्रिः पठित्वा कुशवटुमेकमग्रे निधाय अपसव्येन दक्षिणाऽभिमुखः मोटकमादाय अमुकगोत्राणां पितृपितामहप्रपितामहानां अमुकाऽमुकाऽमुकशर्मणां तथा अमुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अमुकाऽमुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणां सुवर्णश्राद्धे इदमासनं ते स्वधा । इत्याऽऽसनं दत्वा । अपहता इति तिलान्विकीर्य । आयन्तुनः० इति जपित्वा । गन्धादिभिः वटुं सम्पूज्य । मोटकमादाय अमुकगोत्राः पितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणः वसुरु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

द्रादित्यस्वरूपाः तथा अमुकगोत्राः मातामहप्रमाता-महवृद्धप्रमातामहाः अमुकाऽमुकाऽमुकशर्माणः वसु-रुद्रादित्यस्वरूपाः एतानि गन्धपुष्पाऽक्षतधूपदीप नैवेद्यानि वः स्वधा इत्युत्सृजेत् । ततः *सुवर्णमादाय अमुकगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः अमुका-मुकामुकशर्मभ्यः वसुरुद्रादित्यस्वरूपेभ्यः तथा ऽमुक-गोत्रेभ्यः मातामहप्रमातामह वृद्धप्रमतामहेभ्यः अमुकामुकामुकशर्मभ्यः वसुरुद्रादित्यस्वरूपेभ्यः इदं सुवर्णमक्षय्यतृप्तिहेतोर्वः स्वधा । इत्युत्सृज्य । सव्येन दक्षिणाद्रव्यमादाय अमु० गोत्राणांपितृ०-हानां अमुका०-शर्मणांवसु०णां, तथा अमुकगोत्रा० मा-तामहप्र०-नां अमुकामुकाऽमुकशर्मणां वसुरुद्रादित्य-स्वरूपाणां कृतैतत्सुवर्णश्राद्धप्रतिष्ठार्थमिदं रजतंचन्द्र-देवताकं (ताम्रखण्डं सूर्यदेवताकं वा) यथानामगो-त्राय ब्राह्मणाय सम्प्रददे तत्सन्नमम इति दत्वा देवताभ्यः इतित्रिः पठित्वा, प्रमादात्कु०, आयुःप्रजां, इति पठित्वा; चतुर्भिश्च०, यस्यस्मृत्या०, कायेनवाचा० इति पठेत् ॥

सुवर्णश्राद्धेतिकर्तव्यताऽपि कर्तुं नशक्यते चेत् वृद्धिश्राद्धादिषु सव्येन सकुशोदकेन हस्तेन सुवर्ण

* आमान्नमूल्यादष्टगुणमूल्यं चतुर्गुणमूल्यं सममूल्यं वा सुवर्णम् ।

Nepal Sanskrit University. Balmeeki Campus. Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

(तन्मूल्यं रजतं ताम्रखण्डं वा) आदाय अमुकगोत्राभ्यः अस्मन्मातृपितामहीप्रपितामहीभ्यः अमुकामुकाऽमुकदेवीभ्योवसुरुद्रादित्यस्वरूपाभ्यो नान्दीमुखीभ्यः, तथा अमुकगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः अमुकाऽमुकाऽमुकशर्मभ्यः वसुरुद्रादित्यस्वरूपेभ्यो नांदीमुखेभ्यः, तथा अमुकगोत्रभ्यो ऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यो वसुरुद्रादित्यस्वरूपेभ्यो नान्दीमुखेभ्यः अमुककर्माऽङ्गवृद्धिश्राद्धे इदं सुवर्णमक्षय्यतृप्तिहेतोर्वो नमः इत्युत्सृजेत्। ३त्रु० विधवायाः कर्तृत्वे मातृका भर्तृवर्गं पितृवर्गं माताहमवर्गं चोक्तां संकल्पं कुर्यात्।

अपुत्रविधवाकर्त्रीकाऽऽमान्न दानसंकल्पः।

(अन्वष्टकादिने)

कर्त्री आचम्य कर्मपात्रं कृत्वा कुशोदकेन पुण्डरीकाक्षः पुनातु इत्याऽऽत्मानमन्नादिकंच सिक्त्वा तत्कुशादिकमादाय देशकालकीर्तनान्ते अहं अमुकगोत्राणामस्मद्भर्तृ श्वशुरप्रश्वशुराणा ममुकाऽमुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणां, तथा अमुकगो० णांअस्मत्पितृपितामहप्रपितामहानामुकामु० —र्मणां वसुरु०—पाणां, तथा अमुकगो०—णामस्मन्मातृपितामहीप्रपितामहीनाममुकाऽमुकाऽमुकदेवीनां वसु० पाणां,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

तथा ऽमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकाऽमु० णांसपत्नीकानां वसुरू० णामन्नसङ्कल्पश्राद्धमहंकरिष्ये हति प्रतिज्ञाय देवताभ्यः पितृभ्यश्चेति त्रिःपठित्वा । अपसव्येन दक्षिणामुखा कुशवटुमेकमग्रेनिधाय मोटकमादाय अमुकगोत्राणामस्मद्भर्तृ श्वशुरप्रश्वशुराणाममुका०णांवसुरु०—पाणां, तथा ऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममु० णांवसुरु०—णां, तथा ऽमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकादेवीनांवसु० पाणां, तथा ऽमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानाममुका०मणां वसुरुद्रादित्य०—णामन्नसङ्कल्पश्राद्धे इद मासनं ते स्वधा इत्याऽऽसनं दत्वा, अपहता असुरा रक्षाꣳसि वेदिषदः इति तिलान्विकीर्य आयन्तुनः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन्यज्ञे स्वधयामदन्तो धिब्रुवन्तुतेऽवन्त्वस्मान् इति जपेत् ।

ततोगन्धादिभिः सम्पूज्य मोटकमादाय अमुकगोत्रा अस्मद्भर्तृ श्वशुरप्रश्वशुराअमुका०—शर्माणोवसुरुद्रा०—पाः, तथाऽमुकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुक०शर्माणोवसु०पाः, तथाऽमुकगोत्रा अस्मन्मातृपितामही प्रपितामह्योऽमुकाऽमुकाऽमुकदेव्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

वसु०–पाः, तथा ऽमुकगोत्रा अस्मन्मातामहप्रमाता महवृद्धप्रमातामहामुका०–शर्माणः सपत्नीकाः स्व सुरू०–पाःएतानिगंधपुष्पाक्षतधूपदीपनैवेद्यानि वः स्वधा इति उत्सृजेत् । ततः सजलं सोपकरणमन्नमानी य वामांगुष्ठकनिष्ठाभ्यामन्नं जलञ्च स्पृष्ट्वा, मोटकमा दाय अमुकगोत्रेभ्योऽस्मद्भर्तृश्वशुरप्रश्वशुरेभ्योऽमुकां शर्मभ्योवसु०भ्यः, तथाऽमुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकाऽमुकाऽमुकशर्मभ्योवसुरू० भ्यः, तथा ऽमुकगोत्राभ्योऽस्मन्मातृपितामहीप्रपितामहीभ्यो-ऽमुका०देवीभ्यो वसुरू०पाभ्यः, तथा ऽमुकगोत्रे भ्यो-ऽस्मन्मातामह प्रमातामह वृद्धप्रमातामहेभ्योऽमु का०–शर्मभ्यःसपत्नीकेभ्यो वसु रू० भ्यो ऽन्नसङ्कल्प श्राद्धे इदमामान्नं सजलं सोपस्करमक्षय्यतृप्तिहेतोर्वः स्वधा इत्युत्सृज्य सव्येन दक्षिणाद्रव्यं सम्पूज्याऽऽदाय, अमुक-गोत्राणामस्मद्भर्तृश्वशु० पाणां, तथा ऽमुकगोत्राणा-मस्मत्पितृपितामः० पाणां, तथा ऽमुकगोत्राणामस्म-न्मातृपितामही प्रपितामहीनाममुका०–देवीनांवसुरू०-णां, तथाऽमुकगोत्राणामस्मन्मातामहप्रमातामह वृद्ध-प्रमातामहानाममुकाऽमुकाऽमुकशर्मणां सपत्नीकानां वसुरु० पाणां कृतैतदन्नसङ्कल्पश्राद्ध प्रतिष्ठार्थमिदं रजतं चन्द्रदेवताकं (ताम्रखण्डं सूर्यदेवताकं वा) यथा नामगोत्राय ब्राह्मणायसम्प्रददे तत्सन्नमम इतिदद्यात् ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच। नमः स्वाहायै स्वधायै नित्यमेव नमोनम इति त्रिः। प्रमादात्कुर्वतां कर्म प्रच्यवेताद्ध्वरेषुयत्। स्मरणा देवतद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः। आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिता इति पठेत्। ततः कर्मेश्वरार्पणंकुर्यात्।

अपुत्रविधवाकर्तृकः संक्षिप्तः आमान्नदानसंकल्पः (अन्वष्टकादिने)

कर्त्री सोपकरणाऽन्नसमीपे पुटके जलंनिधाय दक्षिणामुखा ऽपसव्येन विप्रमन्नं च सम्पूज्य वामांगुष्ठकनिष्ठाभ्यामन्नजलं च स्पृष्ट्वा मोटक मादाय देशकालकीर्तनान्ते अमुकगोत्रेभ्यो ऽस्मद्भर्तृ श्वशुरप्रश्वशुरेभ्यो ऽमुकाऽमुकाऽमुकशर्मभ्यो वसुरुद्रादित्यस्वरूपेभ्यः, तथा ऽमुकगोत्रेभ्योऽस्मत्पितृपितामह प्रपितामहेभ्योऽमुकाऽमुकाऽमुकशर्मभ्यो वसुरुद्रादित्यस्वरूपेभ्यः, तथा ऽमुकगोत्राभ्योऽस्मन्मातृपितामही प्रपितामहीभ्योऽमुकाऽमु०—देवीभ्योवसुरू०—पाभ्यः, तथा ऽमुकगोत्रेभ्योऽस्मन्मातामहप्र०—हेभ्योसपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्य इदमामान्नं सजलंसोपस्करमक्षय्यतृप्तिहेतोर्वः स्वधा इत्युत्सृजेत्। ततः सव्येन दक्षिणाद्रव्य सम्पूज्याऽऽदाय अमुकगोत्राणामस्मद्भर्तृ श्वशुरप्रश्वशुराणाममुका० मर्णांवसुरू०—णां,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

तथा ऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुका०—र्मणांवसुरु०—णां, तथाऽस्मन्मातृपितामहीप्रपितामहीनाममु०—देवीनां वसुरुद्रादित्यस्वरूपाणां, तथाऽमुकगोत्राणामस्मन्मातामहप्रमातामह० नाममुका०—णांसपत्नीकानांवसुरू०—पाणां कृतैतदन्नसङ्कल्पप्रतिष्ठार्थमिदं रजतं चन्द्रदेवताकं (ताम्र खण्डं सूर्यदेवताकं वा) अमुकगोत्राय० ब्राह्मणाय सम्प्रददे तत्सन्नमम इति दद्यात्। ततः देवताभ्यः ३, प्रमादात्कुर्वता०, आयुःप्रजांध० इत्यादि पठेत्।

मातृनवम्यां पुरुषकर्तृकेऽन्नसंकल्पे भर्त्रादि वाक्यं त्यक्त्वा सर्वं समानम्।

महालये ऽपुत्रविधवाकर्त्रीकेऽन्नसंकल्पे मात्रादि वाक्यं विहाय सर्वं समानम्।

महालये पुरुषकर्तृकेऽन्नसंकल्पे भर्त्रादिवाक्यं मात्रादिवाक्यं च त्यक्त्वा सर्वं समानम्।

विधवाकर्त्रीकैकपार्वणेऽन्नसंकल्पः।

कर्त्री आचम्य कर्मपात्रं कृत्वा कुशोदकेन पुण्डरीकाक्षःपुनातु इत्यात्मानमन्नादिकंच प्रोक्ष्य पुटके जलं निधाय दक्षिणामुखी अपसव्येन विप्रमन्नंच सम्पूज्य वामांगुष्ठकनिष्ठिकाभ्यामन्नमपश्चस्पृष्ट्वा देशकालकीर्तनान्ते अमुकगोत्रेभ्योऽस्मद्भर्तृश्वशुरप्रश्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

शुरेभ्योऽमुका०भ्यो वसुरू०भ्य इदमामान्नं सजलं सोपकरणमक्षय्यतृप्तिहेतोर्वः स्वधा इत्युत्सृज्य । सव्येन दक्षिणां सम्पूज्याऽऽदाय कृतैतत्सोपकरणाऽऽमान्नदानप्रतिष्ठार्थामिदं रजतं चन्द्रदैवत (ताम्रखण्डं सूर्यदैवतं वा) ममुकगोत्रायेत्यादि दत्वा देवताभ्यः ३, प्रमादात्कु०, आयुःप्रजां० इत्यादिपठित्वा कर्मेश्वरार्पणां कृत्वा समापयेत् ।

पुरुषकर्तृकैकापार्वणेऽन्नसंकल्पे भर्तृश्वशुरप्रश्वशुरपदस्थाने पितृपितामहप्रपितामहपदप्रक्षेपेण संकल्पयेत् । अन्यत्सर्वं समानम् ।

एकोद्दिष्टश्राद्धेऽन्नसंकल्पः ।

विधवाकर्तृकैकोद्दिष्टेऽन्नसंकल्पे पूर्वकृत्यं सर्वं विधाय अपसव्येन सोपस्करमन्नं स्पृष्ट्वा अमुकगोत्रायाऽस्मद्भर्तोऽमुकशर्मणे वसुस्वरूपायेदमामान्नं सजलं सोपस्करमक्षय्यतृप्तिहेतोस्ते स्वधा इत्युत्सृज्य सव्येन दक्षिणान्दद्यात् ।

पुरुषकर्तृकैकोद्दिष्टेऽन्नसंकल्पे 'अस्मद्भर्ता' इति पदस्थान अस्मत्पिता इति पदं प्रक्षिप्य सर्वं कृत्यं पूर्ववत्कुर्यात् ।

मातृभ्रातृभगिनीमातामहमातुलाद्युद्देश्यकेऽन्न सङ्कल्पे उद्देश्यसमर्पकपदमुचितविभक्त्यन्तं कृत्वा वाक्यं विरच्य संकल्पवाक्यं रचयेत् ।

Nepal Sanskrit University. Balmeeki Campus. Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

क्षयाहश्राद्धे शय्यादानम् ।

क्षयाहश्राद्धे गन्धाद्युत्सर्गात्पश्चात् अर्चनविधेः सम्पूर्णताप्रार्थनात्पूर्वं पितॄनुद्दिश्य परिधानीयवस्त्राणि धौतोत्तरीयशाटीकञ्चुकादीनि मञ्जूषामञ्चकादियुतानि, अलङ्कारान् केयूराङ्गुलीयककण्ठभूषण हंसकाद्यान्सपिटकान्, प्रसाधनसाधनानि सुरभितैलकङ्कतिकाप्रवेणीदोरकसिन्दूरकज्जलाऽलक्तककाचकंकणमुखानि, शय्यां खट्वामशहरीकम्बलकशिपूपवर्हणादिसामग्रीसमेतां, पाकसाधनभाण्डानि लोहत्रिपदिकाचुल्लीकलश कुम्भिकाभृङ्गाराद्युपकरणसनाथानि, भोजनभाजनानि स्थालीकरकादीनिपतद्ग्रहशौचपात्रादीनि तंडुलमासमुद्गाद्यानि सव्यञ्जनानि, दधिदुग्धकन्दफलमूलकरीरादियुतानि, यानानि गजरथतुरगशिविका दोलाप्रमुखानि, छत्रोपानहपादुकागृहक्षेत्रदासी दासादोन्यनुक्तान्यन्यानि च यथायोग्यं स्त्रियाः पुरुषस्य च योग्यानि यथाविभवं सम्पादितानि वस्तूनि सङ्कल्प्य विप्रकरे कुशवटौ वा समर्पयेत् । दिवोदासीये वायुपुराणे । 'आच्छादानं तु यो दद्यादहतं श्राद्धकर्मणि । आयुः प्राकाम्यमैश्वर्यं रूपं च लभते यशः । यज्ञोपवीतं यो दद्याच्छ्राद्धकाले तु धर्मवित् । पावनं सर्वविप्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ब्रह्मदानस्य तत्फलम् । [1]क्षौमकौशेय [2]कार्पासंदुकूल-महतन्तथा । श्राद्धेप्येतानि यो दद्यात्कामानाप्नोत्य-नुत्तमान् । तथा [3]वर्णपट्टोर्णकौशेयं तथा [4]प्रावरकम्ब-लम् । [5]अजिनं क्षौमजं पट्टै [6]प्रवेणीं मृगलोमिकाम्-दत्वा चैतानि बिप्रेभ्यो भोजयित्वा यथाविधि । प्राप्नोति श्रद्दधानस्तु बाजपेयक्रतोः फलम्' । 'वासोहिसर्वदै-वत्यं सर्वदेवेष्वाभिष्टुतम् । वस्त्राऽभावे क्रिया नास्ति-यज्ञा वेदास्तपीसि च । तस्माद्वस्त्राणि देयानि श्राद्ध-काले विशेषतः । मातापित्रोः क्षयश्राद्धे नदद्याद्वा ससी सुतः । सप्तजन्मसु [7]नग्नः स्यात्पितृवस्त्रापहारतः । अभावे तन्मूल्यम् । दरिद्रस्तूत्तरीयमात्रमावश्यकं दद्यात् । उपवीतन्तु फलार्थमावश्यकम् इतिश्रीदतः । तथा । ताम्बूलं जलपूर्णकमण्डलुं पादुके उपानहौ व्यजनं छत्रं शय्यां तूलिकां रत्नानि वाहनानि गां तिलान् इक्षून् ग्रीष्मे शीतलंजलं शिशिरे वन्हिं अभयञ्च

१. क्षुमा अतसी तस्याइदं क्षौमं अतिसूक्ष्मपठः खर्पेतिप्रसिद्धम् ।

२. कौशेयं कोशप्रभवं तसरीपटादि (१) दुकूलं पट्टनिर्मितं ।

३. वर्णपट्टोर्णकौशेयमिति वर्णाढ्यं यत्पट्टनिर्मितं ऊर्णामयञ्च कौशेयं च वर्णशब्देनात्र पीतसितौग्राह्यौ रक्तकृष्णवर्णस्य तु निषेधात् ।

४. प्रावरकम्बलः आच्छादनयोग्यः सूक्ष्मकम्बल इत्यर्थः ।

५. अजिनं कृष्णाजिनम् । कृष्णाजिनस्य सान्निध्यं दर्शनं दानमेवच । रक्षोघ्यं ब्रह्मवर्चस्नं पशून्पुत्राश्चदापये दिति वायूक्तेः ।

६. प्रवेणी गजास्तरणकम्बलः ।

७. नग्नः पिशाचः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सर्वभूतेभ्यः पिथृनुद्दिश्य दत्त्वा स्वर्गे देववत्क्रीडते। पितृणामतितरां प्रीतिश्च भवतीति किं बहुना। 'लोके श्रेष्ठतमं किंचिदात्मनश्चापि यत्प्रियम् सर्वं पितृणां दातव्यं तेषामेवाऽक्षयोर्थिने' इति वायूक्तेरत्रावसरे दद्यात्। ततो अर्चनविधेःसम्पूर्णताप्रार्थनामित्युक्तेः।

क्षयाहश्राद्धे शय्यादानसंकल्पः।

अहं यथायोग्यकर्तृभोक्तृगताऽक्षय्यतृप्ति महाप्रीत्यायुः प्राकाम्यैश्वर्यरूपोत्तमकामावाप्ति बाजपेयक्रतुफलस्वर्गाधिकरणक देवसदृशक्रीडादितत्तत्कल्पोक्त सकलफलावाप्तये परिधानीयवस्त्राऽलङ्कारप्रसाधन सामग्री पाकभाण्ड भोजनभाजन पतद्ग्रहादिसोपकरणाऽन्नादियुतां शय्यामुत्तानाङ्गिरोदैवतांयथानाम गोत्रायब्राह्मणाय दातुमहमुत्सृजे तत्सन्नमम इति (यद्यद्वस्तुसम्पादितं तस्य तस्यनामोल्लेखेन संकल्प वाक्यं रचयित्वा) दद्यात्। यान दासदासीगृह क्षेत्रछत्रोपानहादिदाने पृथक्-पृथक् संकल्पं कर्तुमुचितम्।

गण्डकमांसमाहात्म्य (पित्र्यकर्मणि)

'खड्गामिषं महाशल्कं मधु मुन्यन्नमेवच। लोहामिषं महाशाकं मांसं वार्ध्रीनसस्य च। यद्दाति गया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

स्थश्च सर्वमानन्त्यमश्नुते' इति याज्ञवल्क्यवचनम्। 'कालशाकं महाशल्काः खड्गलोहामिषं मधु। आनन्त्यायैवकल्पन्ते मुन्यन्नानि च सर्वशः' इति मनुवचनम्। 'अथाऽक्षय्यतृप्तिः खड्गमाꣳसंकालशाको लोहमाꣳसं मधु महाशल्क' इत्यादि कातीयश्राद्धसूत्रम्। एवमादीनि वचनानि श्राद्धे खड्गमांसभोजनस्य प्राशस्त्यसमर्पकाणि पर्यालोच्य ब्राह्मणानां भोजनेपि पितृणामक्षय्यातृप्तिश्चेत्साक्षात्पितृभ्यएव समर्पणे सुतरामक्षय्यातृप्तिःस्यादिति मत्वा मृगयारसिकाः क्षत्रिया गण्डकमारणे कृते तस्य रुधिरेण तर्पणं, तन्मांसेन पिण्डं च कुर्वन्ति। तत्र साक्षाद्वचनाऽभावेऽप्येवमनुष्ठानं नविरुद्धयते इति भाति। येपि गण्डकरुधिरेण तर्पयन्ति तेपि स्वापितृभ्यएव तर्पयन्ति।

श्राद्धे मांसदानं तु क्षत्रियवैश्ययोरेव। 'मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः' इति मिताक्षरायां लघुपुलस्त्योक्तेः॥ इति॥

मलमाससृतस्य मासिकादि।

पूर्वाऽमावास्याया अंतिमपलादुत्तरत्राऽधिकमासारम्भप्रतिपदाद्यपलादारभ्याऽधिकमासियाऽमावास्याया अन्तिमपलपर्यन्तं मृतो मलमाससृतः तस्यैकादशेऽहनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

अधिकाद्यमासिकमाद्याब्दिकंच पृथक् कृत्वोनमासिकाऽऽद्यमासिक द्वितीयमासिकादीनां द्वादशमासिकपर्यन्तानां तन्त्रेणाऽनुष्ठानम् द्वादशेऽहनि सपिण्डीकरणार्थम् ।

त्रिपुष्करादियोगरहिते शुद्धे दिने ऊनमासिकं विधाय द्वितीयमासाऽऽदिमे तत्तिथौ आद्यमासिकं कृत्वा तृतीयेपक्षे तास्मन्नेव तिथौ त्रैपक्षिकं कृत्वा तृतीयमासाऽऽदिमे तत्तिथौ द्वितीयमासिकं कुर्यात् ।

द्वितीयादिमासिकं मलमासे पततिचेद्यन्मासिकं मलमासे पतति तद् द्वितीयादिमासिकमधिकमासेऽधिकद्वितीयं शुद्धमासेद्वितीयमित्यादिरीत्याऽऽवर्तयेत् । 'मासादौ मासिकं कार्यमाब्दिकं वत्सरागते । आद्यमेकादशे कार्यमधिकेत्वधिकं भवेत्' इति निर्णयसिन्धौ लौगाक्ष्युक्तेः । 'असंक्रान्तेऽपिकर्तव्यमाब्दिकं प्रथमं द्विजैः । तथैव मासिकं श्राद्धं सपिण्डीकरणं तथा' इति तत्रैव हारीतोक्तेः । यति मरणदिनादारभ्य द्वादशमासमध्येऽधिकमासस्तदा तन्मासिकं द्विवारं कार्यमिति रामोपाध्यायविरचिताऽन्त्य पद्धत्युक्तेश्च । माधवीये कौथुमिः 'अब्दमंबुघटं दद्यादन्नंचापि सुसंचितम् । संवत्सरे विवृद्धेपि प्रति मासंच मासिकम्' इति ॥ मरीचिः 'प्रतिमासं मृताहे यच्छ्राद्धं च प्रतिवत्सरम् । मन्वादौच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

युगादौच मासयो रुभयोरपि' इति। एवं त्रयोदशमासाऽऽदिमेतत्तिथौ द्वादशमासिकं कृत्वा चतुर्दशमासाऽऽदिमे तत्तिथौ प्रथमाऽऽब्दिकं कार्यम्।

उदाहरणानि।

(मलमासाऽभावे।

ज्येष्ठकृष्णचतुर्थ्यां मृतौ

एकादशाहे आद्यमासिकम्

आषाढ़ कृ० चतुर्थ्यो द्वि० मासिकम्
श्रावण ,, ,, तृतीय मा०
भाद्र ,, ,, चतुर्थ मा०
आश्विन ,, ,, पञ्चम मा०
कार्तिक कृ० चतुथ्यां षष्ठ मासिकं
मार्ग ,, ,, सप्तम मा०
पौष ,, ,, अष्टम मा०
माघ ,, ,, नवम मा०
फाल्गुन ,, ,, दशम मा०
चैत्र ,, ,, एकादश मा०
वैशाख ,, ,, द्वादश मा०
ज्येष्ठ ,, ,, प्रथमाऽऽब्दिकं

(त्रयोदशमासाऽऽदिमेदिने)

(मलमाससत्वे)

अधिकाऽऽषाढ़शुक्लसप्तम्यांमृतो

एकादशाहे अधिकाद्यमासिकं

शुद्धाषाढ़ शुक्ल स० आद्य मा०
श्रावण शुक्ल सप्तम्यां द्वि० मा०
भा० ,, ,, तृतीय मा०
आश्विन ,, ,, चतुर्थ मा०
कार्तिक ,, ,, पञ्चम मा०
मार्ग ,, ,, षष्ठ मा०
पौष ,, ,, सप्तम मा०
माघ ,, ,, अष्टम मा०
फाल्गुन ,, ,, नवम मा०
चैत्र ,, ,, दशम मा०
वैशाख ,, ,, एकादश मा०
ज्येष्ठ ,, ,, द्वादश मा०
आषाढ़ ,, ,, प्रथमाऽऽब्दिकं

(चतुर्दशमासाऽऽदिमेदिने)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

अधिकाऽऽषाढाऽमावस्यायांमृतौ ।

एकादशाहे		अधिकाद्यमासिकम्		फा०	कृ०	अमावास्या०	अष्टम मा०
श्रावण	कृष्ण	अमावास्या आद्य मा०		चैत्र	,,	,,	नवम मा०
भाद्र	,,	,,	द्वितीय मा०	वैशाख	,,	,	दशम मा०
आश्विन	,,	,,	तृतीय मा०	ज्येष्ठ	,,	,,	एकादश मा०
कार्तिक	,,	,,	चतुर्थ मा०	आषाढ़	,,	,,	द्वादश मा०
मार्ग	,,	,,	पंचम मा०	श्रावण	,,	,,	प्रथमाऽब्दिकं
पौष	,,	,,	षष्ठ मा०			(चतुर्दशमासाऽऽदिमेदिने)	
माघ	,,	,,	सप्तम मा०				

अत्रेदमवधेयम् । मलमासाऽभावे यस्मिन्मासे यस्मिन्पक्षे यस्यां तिथौ मृतस्तस्मिन्मासे तस्मिन्पक्षे तस्यां तिथौ आगामिनिवर्षे आब्दिकम् । यथा ज्येष्ठ कृष्णचतुर्थ्यां मृतस्याऽऽगामिनि ज्येष्ठकृष्णचतुर्थ्यामाब्दिकम् । मलमासेपि शुक्लपक्षे मृतस्याऽऽगामिनिवर्षेऽपि तस्मिन्नेव मासे शुक्लपक्षे आब्दिकम् । यथा अधिकाषाढ़शुक्लसप्तम्यां मृतस्याऽऽगामिनिवर्षेऽपि आषाढ़शुक्लसप्तम्यामाब्दिकम् । कृष्णपक्षे मृतस्यतु कथमेकमासमतिक्रम्याऽऽब्दिकम् ? यथा लिखिते उदाहरणे ऽधिकाऽऽषाढ़कृष्णाऽमावास्यायां मृतस्याऽऽगामिनिवर्षे श्रावणकृष्णाऽमावास्यायामाब्दिकं लिखितम् । सत्यं बोधस्यैव भेदो नश्राद्धदिनस्य । चैत्रशुक्लप्रतिपदो वत्सराऽऽरम्भदिनतया शुक्लः पक्षः प्रथमः, अनन्तरः पक्षः कृष्णः । स च कस्य मासस्य ? चैत्रस्यैव;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

चान्द्रमासस्य पक्षद्वयात्मकत्वात्। इति चैत्रमासस्य पक्षः, प्रथमः शुक्लो द्वितीयः कृष्णः। एवं सर्वेषां मासानामिति। आषाढ़ शुक्लपक्षादुत्तरः आषाढ़स्यैव कृष्णः पक्षः इति। अधिकाषाढ़कृष्णाऽमावास्यायां मृतस्याऽऽगामिवर्षाऽऽषाढ़शुक्लपक्षाऽनन्तरऽऽषाढ़ कृष्णपक्षीयाऽमावास्यायामाब्दिकं श्राद्धमिति क्वैकमासमतिक्रम्याऽऽब्दिकम् ? इदन्तु विवेक्तव्यम्। येषां सम्प्रदायेऽमान्तंमानं प्रचलति पञ्चाङ्गपत्रेऽपि प्रथमं शुक्लपक्ष द्वितीयं तस्यैव मासस्य कृष्णपक्षं लिखन्ति तेषां नकोऽपि सन्देहाऽवसरः। येषान्तु पूर्णिमान्तंमानं प्रचलति पञ्चाङ्गपत्रेपि प्रथमं चैत्रस्य शुक्लंपक्षं लिखित्वा पश्चाद्वैशाखकृष्ण इति लिख्यते तेषां भवति सन्देहः—

मुख्यन्तु अमान्तंमानमेव। अत एवं निर्णयसिन्धौ 'शुक्लादिर्मुख्यः कृष्णादिर्गौणः। शास्त्रेषु-चैत्रशुक्लप्रतिपद्येव चान्द्रसम्वत्सराऽऽरम्भोक्तेः'। तदुक्तं दीपिकायाम्। 'चान्द्रोऽब्दो मधुशुक्लगप्रतिपदाऽऽरम्भः' इति। नहि ये कृष्णादिं मन्यन्ते तेषांवत्सरारम्भो भिद्यते। अतः शुक्लादिर्मुख्यः।* कृष्णदिना मलमासाऽसम्भवाच्च इत्युक्तम्। अमान्तमानस्य मुख्य-

* यतः सम्वत्सराऽऽरम्भदिनं चैत्रशुक्लप्रतिपदित्यस्मिन्नर्थे ब्रह्मसिद्धान्तप्रभृतीनां ज्योतिषसिद्धान्ताना सिद्धान्त शिरोमणिप्रमुखानां गणितनिबन्धानां, सर्वेषां, धर्मशास्त्राणां फलितग्रन्थानां चैकमत्यम् ततश्च सौरचान्द्रमासयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

त्वादेव प्रायः श्रुतिस्मृतिपुराणेषु तदेव मानमाश्रित्य व्यवहरन्ति महर्षयः। यतोजन्माऽष्टमीं श्रावणकृष्णाऽष्टमीं, शिवरात्रिं माघकृष्णचतुर्दशीं मन्यन्ते। आहुश्च 'श्रावणे बहुलेपक्षे कृष्णजन्माष्टमीव्रतम्। नकरोति नरो यस्तु भवति क्रूरराक्षस' इति निर्णयसिन्धौ भविष्यपुराणम्। 'अर्द्ध रात्रयुता यत्र माघकृष्णचतुर्दशी। शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत्' इति नारदसंहिता। माघकृष्णचतुर्दश्यामादिदेवो महानिशि। शिवलिङ्गमभूत्तत्र कोटिसूर्यसमप्रभम्' इति ईशान संहिताचेत्यादिद्रष्टव्यम्।

रप्याऽऽरम्भादिनं सैव प्रतिपत्। एवंसति चान्द्रमासपूर्तिदिनादमावास्या रूपादग्रतः सूर्यसंक्रान्तिकालात्प्राग् यावन्ति दिनान्यन्तरा पतन्ति तानि मिलित्वा द्वात्रिंशद्भिर्मासैः सार्द्धैकोनत्रिंशद्दिनानि भवन्ति। स एवाऽधिकमास इति। क्व पूर्णिमान्तमानेनाधिक माससम्भवः? तथाच प्रदर्शितं कालमाधवीये विष्णुधर्मोत्तरे 'सौरसम्वत्सरस्यान्ते मानेन शशिजेन तु। एकादशाऽति रिच्यन्ते दिनानि भृगुनन्दन। समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते। क्ष चाऽधिमासकः प्रोक्तः काम्यकर्मसु गर्हित' इति। एतच्च स्पष्ठं व्याख्यातं तत्रैव माधवाचार्येण, प्रतिपदोक्तं पद्यद्वयमुद्धृत्य 'अयमर्थः। सौरसम्वत्सरः षड्भिर्दिनैः सावनादतिरिच्यते। एकादशभिर्दिनैश्चांद्रादतिरिच्यते। तथाच चान्द्रसम्वत्सरद्वयात्सौरसम्वत्सरद्वयं द्वात्रिंशत्या दिनैरधिकै भवति। तत उर्द्धं सौर मासाष्टकं चान्द्रमासाष्टकात्साद्धैः सप्तभिर्दिनैरतिरिच्यते। तथाच मिलित्वादिनाऽर्ध न्यूनो मासोभवति। सोयमधिकोमास इति। अवशिष्टदिनार्द्धं पूरणं च यथोक्तकालादूर्द्धं षोडशभिर्दिनैः सम्पद्यते। अतएव सिद्धान्तेऽभिहितम् 'द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा। घटिकानां चतुष्कोण पतति ह्यधिमासिकः' इति। सिद्धान्त शिरोमणौ भास्कराचार्यश्च 'दर्शावधिश्चान्द्रमसोहि मासः सौरस्तु संक्रान्त्यवधिर्यतोऽतः। दर्शाऽग्रतः संक्रमकालतः प्राक् सदैव तिष्ठत्यऽधिमासशेषम्' इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

शुद्धमासमृतस्य मलमासेप्रथमाऽब्दिकम्।

शुद्धमासे मृतस्य मलमासे प्रथमाऽब्दिकपाते तु मलमासे एव प्रथमाऽब्दिकम्। द्वितीयाद्याब्दिकन्तु शुद्धे एव मासे विधेयम्। निर्णयसिन्धौ मलमासे कर्तव्यान्युक्तानि कालादर्शे इत्युपक्रम्य 'मलिम्लुचान्यमासेषु मृतानां श्राद्धमादिकम्' इत्युक्तेः। तत्रैव। यद्यपि कालादर्शे सर्वं वार्षिकं मासद्वये कार्यमित्युक्तन्तथापि हेमाद्रिमाधवापरार्कादिमतात्प्रथमं वार्षिकं मलमासे द्वितीयाऽब्दिकन्तु शुद्ध मासएव कार्यम्। 'असंक्रान्तेपि कर्तव्यमाब्दिकंप्रथमं द्विजैः। तथैव मासिकं श्राद्धं सपिण्डी करणं तथा' इति हारीतोक्तेः। 'आब्दिकं प्रथमंयत्स्यात्तत्कुर्वीत मलिम्लुचे। चतुर्दशेतु सम्प्राप्ते कुर्वीत पुनराब्दिकम्' इति स्मृत्यन्तरोक्तेश्च। पुनराब्दिकं द्वितीयादिवार्षिकं त्रयोदशेमासेऽतीते चतुर्दशाद्यदिने कुर्यादित्यर्थ इत्यादिना सन्दर्भेण प्रथमाब्दिकस्य मलमासे एव द्वितीयाद्याऽब्दिकानान्तु शुद्धे मासे एवाऽनुष्ठेयत्वेव सिद्धान्ततत्वात्। शुद्धमासमृतानां स्यान्मलिने प्रथमाब्दिकम्' इति माधवोक्तेश्च॥

मलमासे मृतस्य कदाचित्तस्मिन्नेव मासे मलमासेसति मलमासे एव क्षयाहश्राद्धम् 'मलमासमृतानान्तु मलेस्यादाब्दिकान्तरम्' इतिमाधवोक्तेः। तत्रैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सत्यतपाः। 'वर्षेवर्षे तु यच्छ्राद्धं मृताऽहनि मलिम्लुचे। कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्रतु' इति। पैठीनसिश्च 'मलमासमृतानान्तु श्राद्धं यत्प्रतिवत्सरम्। मलमासे तु कर्तव्यं नान्येषान्तु कदाचन इति।

इति कौण्डिन्यमुनिकुलोत्पन्नेन हरिनाथ शर्मणा सङ्कलितायां सङ्कल्परत्नावल्यां श्राद्धप्रकरणम्।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अथविविधाविषयप्रकरणम् ।

स्वस्तिवाचन

प्रयोगरत्ने व्यासः । 'सम्पूज्य गन्धमाल्याद्यै ब्राह्मणान्स्वस्तिवाचयेत् । धर्मकर्मणि माङ्गल्ये संग्रामेऽद्भुतदर्शने' । गृह्यपरिशिष्टे । 'अथस्वस्तिवाचनमृद्धिपूर्तेषु ऋद्धिर्विवाहान्ताःसंस्काराः । प्रतिष्ठोद्यापने पूर्तं तत्कर्मणश्चाद्यन्तयो. कुर्यात् इति । आश्वलायनस्मृतौ । 'वैदिके तान्त्रिके चाऽऽदौ ततः पुण्याह इष्यते'। तच्च । प्रयोगान्तर्गतमिति केचित् । वहवस्तु प्रयोगवहिर्भूतमिति । आद्यपक्षे कर्मप्रयोगसङ्कल्पं कृत्वा कार्यम् । द्वितीये तु तत्कर्म कृत्वा कर्मसङ्कल्प इति । प्रयोगरत्नकर्त्रा भट्टनारायणेनापि स्वस्तिपुण्याहवाचनयोः प्रयोगान्तर्गतत्वमङ्गीकृत्य पूर्वाङ्गसङ्कल्पवाक्ये अमुककर्म-करिष्ये तदङ्गस्वस्तिपुण्या हवाचनं मातृकापूजनमित्यादि संकल्पवाक्यं लिखितम् । ततश्च वैदिके तान्त्रिके च कर्तव्यपूर्वाङ्गके कर्मणि प्रधानसङ्कल्पः, स्वस्तिवाचनं, पुण्याहवाचनं, आचारप्राप्तं दीपपूजनं, गणेशपूजनं, मातृकापूजनं, वसोर्धारापूजनं, आयुष्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मन्त्रजपः नान्दीश्राद्धं चेति पूर्वाऽङ्गान्यनुष्ठाय प्रधानं कर्माऽऽरभेत ।

यजुर्वेदीयम्

स्वस्तिवाचनम् ।

हरिः ॐ आनोभद्राः क्रतवो यन्तुव्विश्वतो दब्धासोऽअपरीतास उद्भिदः । देवानो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे १४ देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानाꣳरातिरभिनो निवर्तताम् । देवानां ꣳ सख्यमुपसेदिमाव्वयन्देवानऽआयुः प्रतिरन्तु जीवसे १५ तान्पूर्वया निविदा हूमहे व्वयंभगं मित्रमदितिन्दक्षमस्रिधम् । अर्यमणं व्वरूणꣳसोममश्विना सरस्वतीनः सुभगामयस्करत् १६ तन्नो व्वातोमयोभुव्वातु भेषजन्तन्माता पृथिवी तत्पिताद्यौः । तद्ग्रावणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् १७ तमीशानञ्जगतस्तस्थुषस्पतिन् धियञ्जिन्व मवसे हूमहे व्वयम् । पूषानो यषा व्वेदसामसद्वृधे रक्षितापायुरदब्धः स्वस्तये १८ स्वस्तिनऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषा व्विश्व वेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु १९ पृषदश्वा मरुतः पृश्निमातरःशुभं य्यावानो व्विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो व्विश्वेनो देवाऽअवसागमन्निह २० भद्रङ्कर्णेभिः शृणु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

यामदेवा भद्रम्पश्येमा क्षभिर्यजत्रा । स्थिरै रङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २१ ॥

ऋग्वेदीयम्

स्वस्तिवाचनम् ।

स्वस्तिनोमिमीतामश्विनाभगः स्वस्तिदेव्यदितिरनर्वणः । स्वस्तिपूषा असुरोदधातुनः स्वस्तिद्यावापृथिवी सुचेतुना ११ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणंस्वस्तये स्वस्तय आदित्यासो भवन्तुनः १२ विश्वे देवानो अद्यास्वस्तये वैश्वानरोवसुरग्निः स्वस्तये । देवाअवन्त्वृभवः स्वस्तये स्वस्तिनो रुद्रः पात्वं हंसः १३ स्वस्ति मित्रावरुणा स्वस्ति पथ्येरेवात । स्वस्तिन इन्द्रश्चाग्निश्च स्वस्तिनो अदिते कृधि १४ स्वस्ति पन्थामनुचरेम सूर्या चन्द्रमसाविव । पुनर्ददताघ्नता जानता सङ्गमेमहि १५ स्वस्त्ययनन्तार्क्यमरिष्टनेमिम्महद्भूतं वायसं देवतानाम् । असुरघ्नमिन्द्रसखंसमत्सु बृहद्यशो नावमिवारुहेम १६ अहोमुचमांगिरसंगयच स्वस्त्यात्रेयं मनसाचतार्क्यम् । प्रयतपाणिः शरणंप्रपद्ये स्वस्तिसंवाधेष्वइति भयन्नो अस्तु १७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

पुण्याहवाचनम्

पुण्याहवाचनं च गर्भाऽऽधानादिषु जातकर्मादि विवाहान्तेषु संस्कारेषु प्रतिष्ठायामुद्यापने गृहारम्भे तीर्थयात्राऽऽरम्भे नवग्रहमखेऽद्भुतशान्तौ गृहप्रवेशे गजतुरगादिसंग्रहे दीक्षादितान्त्रिककर्मसु आधानादिवैदिककर्मसु सम्पत्कर्मसु मांगल्यकर्मसु संग्रामे यज्ञेषु यज्ञसंशब्दिततुलापुरुषादिषु सहोमकधान्य पर्वतादिदानेषु अन्येषु च निमित्ततयोपात्तेषु कर्मसु कुर्यात् ।

यजमानः निहितदक्षिणापूंगीफलसिन्दूरदूर्वाङ्कुरादिकं वस्त्रं प्रत्येकं ददत् । 'भोब्रह्मन् पुण्याह वाचनार्थं त्वामहं बृणे' इति युग्मान् ब्राह्मणान्बृत्वा । अमुकगोत्रस्याऽमुकशर्मणो ममाऽमुक कर्मणि पुण्याहं भवन्तो ब्रुवन्तु' इति त्रिर्ब्रूयात् । ब्राह्मणाश्च ॐ पुण्याहं, ॐ पुण्याहं, ॐ पुण्याहमस्तु इति मन्द्रमभ्यतारस्वरेणोत्का ॐ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः । पुनन्तुविश्वाभूतानि जातवेदः पुनीहिमा इति ब्रूयुः । यजमानः अमुकगोत्रस्याऽमुकशर्मणो ममाऽमुककर्मणि स्वस्ति भवन्तो ब्रुवन्तु इति त्रिर्ब्रूयात्—ब्राह्मणाः ॐ स्वति, ॐ स्वस्ति, ॐ स्वस्ति अस्तु' इति मन्द्रमध्यतारस्वरेणोत्का । ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

स्वस्तिनो बृहस्पतिर्दधातु इति ब्रूयुः। यजमानः अमुकगोत्रस्याऽमुककर्मणि ऋद्धिं भवन्तो ब्रुवन्तु इतित्रिब्रूयात्। ब्राह्मणाः ॐ ऋद्धयतां ॐ ऋद्धयतां, ॐ ऋद्धयतां इति पूर्ववदुक्का। ॐ सत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृताऽअभूम। दिवम्पृथिव्याऽअद्धयारुहामाविदाम देवान्त्स्वर्ज्योतिः इति ब्रूयुः। यजमा० अमुकगो० र्मणि कल्याणं भवन्तो ब्रुवन्तु इति त्रिब्रूयात्। ब्राह्मणाः 'ॐ कल्याणं, ॐ कल्याणं ॐ कल्याणमस्तु, इति पूर्ववदुक्का ॐ यथेमांवाचङ्कल्याणी मावदानिजनेभ्यः। ब्राह्मराजन्याभ्या ँ शूद्रायचार्यायच स्वायचारणायच प्रियोदेवानान्दक्षिणायै दांतुरिहभूयासमयम्मेकामः समृद्धयताम् इति ब्रूयुः। यज० अमुकगोत्रा० र्मणि शान्ति भवन्तो ब्रुवन्तु इति त्रिब्रूयात्। ब्राह्म० ॐ शान्तिः ॐ शान्तिः ॐ शान्ति रस्तु' इति पूर्ववदुक्का ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयःशान्तिः व्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व ँ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि इत्युक्त्वा दूर्वांकुरान्पूगीफलं च यजमानाय दद्युः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मधुपर्कः

गृह्यगदाधरभाष्यम् । 'षडर्घ्याभवन्ति अर्हपूजयामितिधातोर्भावे घञ्प्रत्ययः । न्यक्वादित्वाकुत्वम् । ततोदण्डादिभ्योयदिति यत्प्रत्ययः । अर्घमर्हन्तीत्यर्घ्याः षट्पुरुषा अर्घार्हा भवन्तीत्यर्थः । तानाह । आचार्य, ऋत्विग्वैवाह्यो, राजा, प्रियः, स्नातक इति । उपनयनपूर्वकं कृत्स्नवेदाध्यापयिता आचार्यः । ऋत्विक् यो दक्षिणापरिक्रीतः कर्माणि करोति । वेवाह्यो जामाता । राजा दण्डपूर्वकं परिपालनकर्ता । प्रियो य इष्ट उत्कृष्टजातिः समानजातिर्वा । स्नातको ब्रह्मचर्यात्समावृत्तस्तस्य चार्हणमाचार्यकर्तृकंस्मृतम् । तम्प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । सग्विणं तल्प आसीनमर्चयेत्प्रथमङ्गवेति । पूर्वसूत्रे षट्ग्रहणं प्रियस्नातकयोः पृथक्कज्ञापनार्थम् । प्रतिसम्वत्सरानर्हयेयुः प्रतिसम्वत्सरं गृहे आगतानाचार्यादीनर्घेणार्चयेयुः न सम्वत्सरादर्वाक् । प्रातसम्वत्सरानर्हयेयुरित्यविशेषेणोक्तत्वादृत्विजोऽपि सम्वत्सरान्तेऽर्हयितव्या इति प्राप्ते आह । यज्यमाणास्त्वृत्विजः । ऋत्विजस्तु यज्यमाणा यागकाल एव पूजनीयाः न ततो न्यत्र; इति ।

यजमानः प्राङ्मुखमर्चनीयम् ॐ साधुभवानास्तामर्चयिष्यामो भवन्तं इति ब्रूयात् । अर्चय इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रत्युक्ते। अर्चनीयोपवेशनार्थं शुद्धमासनं दत्वाविष्टरमादाय ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते। यज० ॐ विष्टरः प्रतिह्यगृतां इति वदेत्। अर्चनीयः ॐ विष्टरं प्रतिगृह्णामि इत्यभिधाय विष्टरं गृहीत्व··· ॐ वष्मोंस्मीत्याथवणऋषिरनुष्टुप्छन्दो विष्टरोदेवताऽऽत्मस्तुतिपूर्वकोपवेशने विनियोगः। ॐ वष्मोंस्मिसमानानामुद्यतामिवसूर्यः इमंतमभितिष्ठामि योमाकश्चाभिधासति इत्यनेनाऽऽसने उत्तराग्रं कृत्वा विष्टरोपरि उपविशेत्। ततः पाद्यं३ इत्यन्येनोक्ते। यजमानः ॐ पाद्यं प्रतिगृह्यतां इति वदेत्। अचनीयः। पाद्यं प्रतिगृह्णामि इत्यभिधाय। ॐ विराजो दोहोसीति प्रजापतिर्ऋषि रापोदेवता यजुः पादप्रक्षालने विनियोगः। ॐ विराजो दोहोसि विराजोदोहमसीय मयि पाद्यायै विराजो दोहः इति दक्षिणंपादं प्रक्षाल्यानेनैव क्रमेण वामं प्रक्षालयेत ततः। ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते। यजमान ॐ विष्टरः प्रतिगृह्यताम् इति वदेत्। आर्चनीयः ॐ विष्टरं प्रतिगृह्णामि इत्यभिधाय। प्रक्षालितयोः पादयोरधस्तादुत्तराऽग्निदध्यात्। ततः ॐ अर्घोऽर्घोऽर्घः इत्यन्येनोक्ते यजमानः दूर्वाऽऽक्षतफलचन्दनजलयुतमर्घपात्रं गृहीत्वा ॐ अर्घः प्रतिगृह्यतां इति वदेत्। अर्चनीयः ॐ अर्घं प्रतिगृह्णामि इत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मिधाय यजमानहस्तादर्घपात्रं गृहीत्वा ॐ आपस्थेति-प्रजापतिर्ऋषिरापोदेवता यजुरर्घ ग्रहणेवि० ॐ आप-स्थयुष्माभिः सर्वान्कामानवाप्नवानि इति शिरस्यऽ-क्षतादिकं किञ्चिद्दत्वा। ॐ समुद्रंव इत्याथर्वणऋषिर नुष्टुप्छन्द आपोदेवताऽर्घाऽभिमन्त्रणे विनियोगः। ॐ समुद्रंवः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टा अस्माकं वीरामापरासेचिमत्पयः इत्यर्घपात्रमैशान्यां त्यजन्पठेत्। ततः आचमनीयम् ३ इत्यन्येनोक्ते यज-मानः आचमनीय मादाय ॐ आचमनीयं प्रतिगृह्यताम् इति वदेत्। अचनीयः। यजमानहस्तादाचमनीय-मादाय ॐ आमागन्निति परमेष्ठीऋषिर्बृहतीछन्द आपोदेवताऽऽचमने विनियोगः। ॐ आमागन्यश-सासꣳसृजवर्चसा तम्माकुरुप्रियं प्रजानामधिपतिं पशू-नामरिष्टितनूनाम् इति सकृदाचम्य द्विस्तूष्णीमाचामेत। ततः मधुपर्को मधुपर्को मधुपर्कः इत्यन्येनोक्ते यजमानः कांस्यपात्रस्थितानि दधिमधुघृतानि कांस्यपात्रेण पिहितान्यादाय ॐ मधुपर्कः प्रतिगृह्यताम् इति वदेत्। ततः आर्चनीयः मधुपर्कं प्रतिगृह्णामि इत्यभि-धाय दातृकरस्थमेव ॐ मित्रस्यत्वेतिबृहस्पतिर्ऋषि र्मधुपर्को देवता यजुर्मधुपर्काऽवेक्षणे विनियोगः। ॐ मित्रस्यत्वा चक्षुषा प्रतीक्षे इति निरीक्ष्य ॐ देवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

त्वेतिबृहस्पतिराङ्गिरसऋषिः सवितादेवतायजुर्मधुपर्क ग्रहणे विनियोगः। ॐ देवस्यत्वा सवितुः प्रसवेश्विनो बाहूभ्यांपूष्णो हस्ताभ्यां प्रतिगृह्णामि इति मधुपर्क पात्रं गृहीत्वा वामहस्ते कृत्वा ॐ नमः श्यावास्याया-येति प्रजापतिर्ऋषिः सवितादेवता यजुर्मधुपर्काऽऽ लोडने विनियोगः। ॐ नमः श्यावास्यायान्नशने यत्रआविद्धन्तत्ते निष्कृन्तामि इत्यऽनामिकया प्रद-क्षिणमालोड्य अनामिकाऽङ्गुष्ठाभ्यां किञ्चिद्भूमौ निक्षिप्य पुनर्द्वि निक्षिपेत्। ततः ॐ यन्मधुन इति कुत्सऋषि-र्जगतीच्छन्दो मधुपर्को देवता मधुपकप्राशने वियियोगः। ॐ यन्मधुनोमधव्यं परम ५ रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमोमधव्योन्नादोऽ-सानि इति मधुपर्कं प्राश्नीयात्। पुनः समन्त्रं द्विः। ततः मधुपकपात्रमसञ्चरेदेशे धृत्वाऽऽचम्य ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठीऋषिर्देवीगायत्रीच्छन्दः पर-मात्मादेवता प्राणस्पर्शने विनियोगः। ॐ वाङ्म आस्येऽस्तु। ॐ नसोर्मे प्राणोऽस्तु। ॐ अक्ष्णोर्मे चक्षुरस्तु। ॐ कर्णयोर्मे श्रोत्रमस्तु। ॐ बाह्वोर्मे बलमस्तु। ॐ ऊर्वोर्मे ओजोऽस्तु ॐ अरिष्टा-निमेऽङ्गानितनूस्तन्वामेसहसन्तु इति आस्यादि प्रतिलिंगंस्पृशेत्। यजमानेन गौगार्गौः इत्यभिहिते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

अर्चनीयः ॐ मातारुद्राणामिति ब्रह्मऋषिस्त्रिष्टुप्छन्दो गौर्देवता गोरभिमंत्रणे विनियोगः ॐ मातारुद्राणान्दुहितावसूनाॐस्वसादित्यानामसृतस्यनाभिः प्रनुवोचं-चिकितुषे जनाय मागामनागामदितिं वधिष्ठ ममच अमुकशर्मणो यजमास्य च पाप्मा हतः ॐ उत्सृजत तृणान्युत्तु इति वदेत्। तत्र ममच अमुकशर्मणो यजमानस्य च पाप्माहतः इति वाक्यं उपांशु पठित्वा ॐ उत्सृजततृणान्यत्तु इति उच्चैर्वदेत्। इति मधुपर्कः।

दीपगणेशादिपूजा

दीपपूजा।

प्रायः पूजादिकर्मसु [1]आचारादीपं पूजयन्ति। कर्ता पूर्वाभिमुखः प्रज्वलितं दीपं नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे। सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः इति सम्पूज्य। अञ्जलिं बद्ध्वा। भो दीप त्वं ब्रह्मरूप अन्धकारनिवारक। इमां मयाकृतां पूजां गृह्ण स्तेजः प्रवर्धय इति प्रार्थयेत्। ततः

---

१. यद्यपिस्यात्स्वयंब्रह्मा त्रैलोक्याऽऽकर्षणक्षमः। तथापि लौकिकाचारं मनसापि नलंघयेत् इति त्रिस्थली सेतौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

गणेशपूजा

दीपस्योत्तरेण गणेश प्रतिमायां पूगीफले वा ॐ गणानान्त्वा गणपति ꣳ हवामहे प्रियणान्त्वा प्रियपति ꣳ हवामहे निधीनान्त्वा निधिपति ꣳ हवामहे व्वसोमम । आहमजानिगर्भधमात्वमजासिगर्भधम् । श्रीमन्महागणाधिपते सिद्धिबुद्धिसहित सायुध सवाहन सपरिवार इहागच्छेहतिष्ठेत्यावाह्य पाद्यार्घ्यादिभिरभ्यर्च्य दूर्वाः फलं चाऽऽदाय अञ्जलिं बद्ध्वा । वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा । त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फल प्रदेति । विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव इति प्रार्थयेत् । ततः—

कलशस्थापनम्

गणेशस्योत्तरेण कलशं स्थापयेत् । ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीदꣳह पृथिवींमाꣳसीः १३।१८ इति भूमिं जलेन प्रोक्ष्य । ॐ धान्यमसि धिनुहि देवान्प्राणायत्वोदानायत्वाव्यानायत्वा दीर्घा मनुप्रसितिमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

युषेधान्देवोवः सविताः हिरण्यपाणिः प्रतिगृभ्णा त्वच्छिद्रेपाणिना चक्षुषेत्वा महीनाम्पयोसि १।२० इति धान्यं संस्थाप्य। ॐ अाजिघ्रकलशं मह्यात्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सानः सहस्र न्धुच्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ८।४२ इति। कलशं निधाय। वरुण स्योत्तम्भनमसि वरुणस्य-स्कम्भसर्जनीस्थो वरुणस्य ऽऋतसदन्यसि वरुणस्य ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ४।३६ इति जलमापूर्य। ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषि-णिम्। ईश्वरीं सवभूतानातामिहोपह्वये श्रियम इति चन्दनम्। ॐ या ओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं-पुरा। मनैनुवभ्रूणामहꣳ शत धामानि सप्तच इति सर्वौषधीः। ॐ ओषधयः समवदन्त सोमेनसह राज्ञा। यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि १२।८६ इति यवान्। ॐ वाण्डात्काण्डात्प्ररोहन्ती परुषः परुष-स्परि। एवानो दूर्वे प्रतनु सहस्रेण शतेन च १३।२० इति दूर्वाः। ॐ अश्वत्थेवोनिषदनं पर्णेवोवसतिष्कृता। गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् १२ ७८ इति

● अष्टांगुलाव्यासमुखं द्वादशांगुलव्यासमूलं पञ्चाशदंगुलपरिधिजठर षोडशाऽङ्गुलोत्सेधं धातुजं मृण्मयंचेदश्यामलाञ्छन कलशम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पञ्चपल्लवान् । ॐ स्योनापृथिविनो भवानृक्षरानिवेशनी यच्छानः शर्म सप्रथाः ३६।१३ इति [1]सप्तमृदः । ॐ याः फलीनिर्या ऽअफला ऽअपुष्पायाश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानोमुञ्चत्वꣳ हसः १२।८८ इति फलम् । ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्यजातः पतिरेक ऽआसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मैदेवाय हविषा विधेम १३।४ इति [2]पञ्चरत्नं कलशे निक्षिप्य । ॐ बृहस्पते ऽअतियदर्यो ऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऽऋतप्रजात तदस्मासुद्रविणं धेहि चित्रम् २६।३ इति वस्त्रयुग्मेन कलशं वेष्टयेत् । ततः चन्दना ऽक्षतपुष्पाणि गृहीत्वा कलशमुखं स्पृष्ट्वा तत्वायामिब्रह्मणावन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहवोध्युरुशꣳ समान आयुः प्रमोषीः १८।४८ भो वरुण इहा ऽऽगच्छ इहतिष्ठ सुप्रसन्नो भव, वरदो भव इत्या ऽऽवाह्य । पाद्या ऽर्घ्यधूपदीपादिभिः वरुणं सम्पूज्य । कलशं स्पृष्ट्वा, सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः । आयान्तु यजमानस्यदुरित

---

१. गजाऽश्वरथवल्मीकसङ्गमाद्धदगोकुलादित्युक्ताःसप्तमृद ।

२. सुवर्णरजतमुक्तारांजावर्तप्रवालरूपं पञ्चरत्नम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

क्षयकारकाः इति तीर्थान्यावाह्य पूजयेत्। ततः कलशं स्पृष्ट्वा। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणास्मृताः। कुक्षौ तु सागराः सप्त सप्तद्वीप वसुन्धरा। ऋग्वेदोथ यजुर्वेद-स्सामवेदोप्यथर्वणः। अंगैश्चसहिताः सर्वे कलशन्तु समाश्रिताः। देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्चप्रजापतिः। आदित्यावसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठन्ति सर्वेपि यतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव। सान्निध्यं कुरु देवश प्रसन्नो भव सर्वदा इति प्रार्थयेत्। इति कलश-स्थापनम्।

कर्तुरुत्तराखिमुखत्वे दीपात्पूर्वत्र गणेशं, गणेशा-त्पूर्वत्र कलशमितिरीत्या स्थापयित्वा पूजयेत्। कर्तव्यं कर्म यथा प्राक्संस्थमुदक्संस्थं वा भवति सर्वत्र तथैव कर्तव्यम्। 'प्राञ्च्युदञ्चिवाकर्माणि' इत्युक्तेः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अर्घस्थापनम्

तत्प्रकारो द्विविधः। स्मार्त आगमोक्तश्च। स्मार्त पूजायां प्रथमः। आगोमोक्तपूजायां द्वितीयः। स्मार्तः प्रकारो यथा। प्रक्षालितं साधारमर्घपात्रं स्वाग्रे वामतः स्थापयित्वा तत्र, 'आपः क्षीरं कुशाऽग्राणि दध्यऽक्षतः तिलास्तथा। यवाः सिद्धार्थकाश्चेति ह्यष्टाङ्गोऽर्घः प्रकीर्तिताः इति व्रतग्रन्थोक्तानि; 'गन्धपुष्पाऽक्षत यव कुशाग्रतिलसर्षपैः। सदूर्वैः सर्व देवानामेतदर्घमुदीरितम्' इति शारदातिलकोक्तानि। 'सिद्धार्थमक्षतञ्चैव दूर्वा च तिलमेव च। यमं गन्धं फलं पुष्पमष्टाङ्गत्वर्घमुच्यते' इति पदार्थादर्शधृत महाकपिलपञ्चरात्रोक्तानि वाऽष्टौ वस्तूनि जलं च प्रक्षिपेत् इति। अर्घ्यादिप्रोक्ततत्तद्रव्या[1]ऽलाभे केवल तण्डुलानेव निक्षिपेत्। तदुक्तं पदार्थादर्शे मन्त्र तन्त्रप्रकाशे। 'द्रव्याऽभावे प्रदातव्याः क्षालितास्तण्डुलाः शुभा' इति, अन्यत्रापि तण्डुलान्प्रक्षिपेत्तेषु द्रव्याऽलाभें तु तत्स्मरन्' इति। आगमोक्तस्तु मन्त्रदेवताभेदेनभिन्नः स्वस्वगुरो स्वगन्तव्यः। अघ पात्रं। 'सर्वत्रैव प्रशस्तोऽब्जः शिवसूर्याऽर्चनं बिना' इत्युक्तं ग्राह्यम् अब्जः शंख इति॥

---

१ एतच्च नार्घेएव। प्रोक्तद्रव्याऽभावे सर्वत्र पूजादौ द्रष्टव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

उपचारभेदाः

पंचोपचाराः ।

१ गन्धः
२ पुष्पम्
३ धूपः
४ दीप.
५ नैवेद्यम्

षडोपचाराः ।

१ अर्घ्यम्
२ गन्धः
३ पुष्पम्
४ अक्षताः
५ धूपः
६ दीपः
७ नैवेद्यम्

दशोपचाराः ।

१ अर्घ्यं
२ पाद्यम्
३ आचमनीयं
४ मधुपर्कः
५ आचमनीयम्
६ गन्धः
७ पुष्पम्
८ धूपः
९ दीपः
१० नैवेद्यम्

द्वादशोपचाराः ।

१ पाद्यम्
२ अर्घ्यम्
३ आचमनीयम्
४ मधुपर्कः
५ आचमनीयम्
६ स्नानम्
७ गन्धः
८ पुष्पम्
९ धूपः
१० दीपः
११ नैवेद्यम्
१२ स्तुतिः

षोडशोपचाराः ।

१ आसनम्
२ स्वागतम्
३ पाद्यम्
४ अर्घ्यः
५ आचमनीयम्
६ मधुपर्कः
७ आचमनीयम्
८ स्नानम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

९ वस्त्रम्
१९ आभरणम्
११ गन्धः
१२ पुष्पम्
१३ धूपः
१४ दीपः
१५ नैवेद्यम्
१६ स्तुतिः

अष्टत्रिंशदुपचाराः ।

१ आवाहनम्
२ आसनम्
३ उपस्थितिः
४ सान्निध्यम्
५ अभिमुख्यम्
६ स्थिरीकृतिः
७ प्रसाधनम्
८ अर्घ्यम्
९ पाद्यम्
१० आचमनीयम्
११ मधुपर्कः
१२ आचमनीयम्
१३ स्नानम्
१४ नीराजनम्
१५ वस्त्रम्
१६ आचमनीयं
१७ उपवीतम्
१८ आचमनी०
१९ भूषा
२० दर्पणालोकः
२१ गन्धः
२२ पुष्पम्
२३ धूपः
२४ दीपः
२५ नैवेद्यम्
२६ पानीयंजलम्
२७ आचमनीयम्
२८ हस्तवासः
२९ ताम्बूलम्
३० अनुलेपनम्
३१ पुष्पदानम्
३२ गीतम्
३३ वाद्यम्
३४ नृत्यम्
३५ स्तुतिः
३६ प्रदक्षिणा
३७ पुष्पाञ्जलिः
३८ नमस्कारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding. M

[1]उपचारसमर्पणे सर्वदेवसाधारणा मन्त्राः

वैदिकमन्त्राः ।

पुरुषसूक्तेन षोडशोपचारपूजोक्ता अनुष्ठान प्रकाशे बृहत्पाराशरसंहितायाम् 'आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम् । द्वितीययाऽऽसनं दद्यात्पाद्यं चैव तृतीयया । अर्घ्यश्चतुर्थ्यादातव्यः पञ्चम्याऽऽचमनं तथा । षष्ठ्या स्नानं प्रकुर्वीत सप्तम्यं वस्त्रधौतकम् । यज्ञोपवीतं चाष्टम्या नवम्या गन्धमेव च । पुष्पं देयं दशम्यातु एकादश्या च धूपकम् । द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदनम् । चतुर्दश्या नमस्कारं पञ्चदश्या प्रदक्षिणा । षोडश्योद्वासनं कुर्याच्छेषकर्मणि पूर्ववत्' इति । तत्रैव योगियाज्ञवल्क्यः 'दद्यात्पुरुषसूक्तेन यः पुष्पाण्यऽप एव वा । अर्चितं स्याज्जगदिदं तेन सर्वं चराऽचरम्, इति ।

---

१. उपचारोनाम उपचर्यते सेव्यते देवताऽनेनेति करणव्युत्पत्या द्रव्यक्रियासाधारणः सेवासाधन पदार्थः । तेनाऽऽवाहन सन्निधापन नति स्तुति प्रदक्षिणा क्षमापणादिषु क्रियासु पाद्याऽर्घ्यादिषु द्रव्येषु चोपचारत्वं संगच्छते । पदार्थादर्शे ज्ञानमालायान्तूपचारशब्दः कर्तृसाधन उक्तः । 'भक्त्याचैतेकृतादेवे साधकं देवसन्निधिम् । चारयन्ति यतस्तस्मादुच्यन्ते ह्युपचारकाः । समीपे चारणाद्वापि फलानां ते तथोदिता, इति । साधकं देवसन्निधौ चारयन्ति गमयन्ति प्रापयन्तीति यावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

आवाहने। ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्। सभूमिꣳसर्व्वतस्पृत्वा त्यतिष्ठद्दशांगुलम् ॥१॥ आसने। ॐ पुरुषऽएवेदꣳसर्व्वंय्यद्भूतंय्यच्च-भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥२॥ पाद्ये। ॐएतावानस्य महिमातो ज्यायांश्चपूरुषः। पादोस्यविश्वाभूतानि त्रिपादत्यामृतन्दिवि ॥ ३ ॥ अर्घ्ये। ॐ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभव-त्पुनः। ततोविष्वङ्व्यक्रामत्साशना नशनेऽअभि॥४॥ आचमने। ॐ ततो व्विराडजायत व्विराजोऽअ-धिपूरुषः। सजातो ऽअत्यपरिच्च्यत पश्चात्भूमिमथो-पुरः॥५॥ स्नाने। ॐतस्माद्यज्ञात्सर्वहुतः सम्भृत-पृषदाज्यम्। पशूस्तांश्चक्रे वायव्यानारण्याग्राम्याश्चये ॥ ६ ॥ वस्त्रे। ॐ तस्माद्यज्ञात्सर्वहुतऋचः सामा-निजज्ञिरे। छन्दाꣳसिजज्ञिरे तस्माद्यजुस्तस्मादजा-यत ॥ ७ ॥ यज्ञोपवीते। ॐ तस्मादश्वाऽअजा-यन्त येकेचोभयादतः। गावोह जज्ञिरे तस्मात्तस्माज्जा-ताऽअजावयः॥ ८ ॥ चन्दने। ॐ तंयज्ञम्बर्हिषि-प्रौक्षन्पुरुषञ्जातमग्रतः तेनदेशाऽअय जन्तसाद्ध्याऽऋ-षयश्चये ॥ ९ ॥ पुष्पेष। ॐ यत्पुरुषंव्यदधुःक-तिधाव्यकल्पयन्। मुखङ्किमस्यासीत्किम्बाहूकिमूरू पादाऽउच्च्येते॥१०॥ धूपे। ॐ ब्राह्मणोऽस्यमुख-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मासीद्बाहूराजन्यः कृतः ऊरूतदस्यद्वैश्य पद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥। दीप ॐ चन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत। श्रोत्राद्वायुश्चप्राणश्च मुखादग्निरजायत ॥ १२ ॥ नवेद्य। ॐ नाभ्याऽऽआसीदरिक्षꣳशीर्ष्णोद्यौः समवतत । पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ२ ऽअकल्पयन् ॥ १३ ॥ नमस्कारं । ॐ यत्पुरुषेणहविषा देवायज्ञमतन्वत । बसन्तोऽस्यासीदाज्यंग्रीष्मइध्मः शरद्धविः ॥ १४ ॥ प्रदक्षिणाय्याम्। ॐसप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः। देवायद्यज्ञन्तन्वानाऽअवध्नन्पुरुषं पशुम् ॥१५॥ विसर्जनं । ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्यासन् । तेहनाकंमहिमानः सचन्त यत्रपूर्वेसाध्याःसन्तिदेवाः ।

पञ्चामृतस्नाने ।

वैदिकमन्त्राः

पयसि–ॐ पयःपृथिव्यांपयऽओषधीषु पयोदिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम् ॥१॥ दधि–ॐदधिक्राव्णोअकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखा करत्प्रणऽआयूꣳषितारिषत् ॥ २ ॥ घृते–ॐ घृतंमिमिक्षे घृतमस्ययोनिर्घृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

श्रितोघृतम्बस्यधाम। अनुष्वधमावह मादयस्वस्वाहा कृतं वृषभन्वक्षिहव्यम्॥ ३॥ मधूनि—ॐ मधुव्वाताऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः॥४॥ शर्करायाम्—ॐ अपाꣳरसमुद्वयसꣳ सूर्येसन्तꣳ समाहितम्। अपाꣳरसस्य योरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायवाजुष्टङ्गृह्णाम्येषते योनिरिन्द्रायत्वाजुष्टतमम्॥ ६॥

स्मार्त्तामन्त्राः

व्रतग्रन्थेभ्यः पदार्थादर्शाच्च।

आवाहने। आगच्छाऽऽगच्छ देवेश तेजोराशे जगत्पते। क्रियमाणां मया पूजां गृहाण सुर सत्तम॥ **आसने**। [1]नानारत्नसमायुक्तं कार्तस्वर विभूषितम्। आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यताम्। **पाद्य**[2]। यद्भक्तिलेशसम्पर्कात्परमानन्दसम्भवः। तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये। [3]**अर्घो**। तापत्रयहरं दिव्यं परमानन्दलक्षणम्। तापत्रयविनर्मुक्त तवार्घ्यं

---

१ उपचारे असम्भवन्ति विशेषणानि आसने रत्नमयत्वादि, स्नानीयेऽनेकनदीसमाहृतत्वादिच भावनाकृतानि देवितव्यानि।

२ पदार्थादर्शे। आगते स्नानकालेव नैवेद्योपक्रमे यथा। पाद्यस्यापि समुद्दिष्टः समयस्त्रिविधो बुधैरिति।

३ आगताय पथार्दायां स्नातुमासनगाय च। पूजातोगन्तुकामाय दद्यादर्घ्यं विचक्षण इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

कल्पयाम्यहम् ॥ [1]आचमनीये। कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम्। आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥ मधुपर्के। सर्वकालुष्यहीनाय परिपूर्णसुखात्मने। मधुपर्कमिमं देव कल्पयामि प्रसीद मे ॥ पंचामृतेषु पयसि। कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्। पावनं यज्ञ हेतुश्च पयः स्नानार्थमर्पितम् ॥ शुद्धोदके। स्नानं शुद्धोदकैर्देव कुरुष्व करुणाकर। अनाथनाथ सर्वज्ञ गीर्वाणगणपूजित ॥ दधिन। पयसस्तु समुद्भूतं मधुराम्ल शशिप्रभम्। दध्याऽऽनीतं मया देव स्नानार्थप्रतिगृह्यताम्। (ततः शुद्धोदकम्)। घृते। नवनीतसमुत्पन्नं सर्वसंतोषकारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ (शुद्धोदकम्)। शर्करायाम्। इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् (शुद्धोदकम्)। गंधतैले। स्नेहं गृहाण स्नेहेन लोकनाथ महाशय। सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम् ॥ उद्वर्तने। गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम्। अङ्गोद्वर्तनकं देव गृहाण परमेश्वर। स्नानीये। परमानंदबोधाब्धि

---

१ पदार्थादर्शे ज्ञानमालायाम्। पाद्ये च मधुपर्के च स्नाने वस्त्रोपवीतयोः भोजने चाऽऽचमं देयमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

निमग्ननिजमूर्तये। साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यऽहमीश ते॥ **वस्त्रे**। मायाचित्रपटच्छन्न निजगूढोरुतेजसे। निरावरणविज्ञान वाससे ते कल्पयाम्यहम्। सर्वभूषाऽधिकं देव लोकलज्जानिवारणम्। मयोपपादितं तुभ्यमिदं वासः प्रगृह्यताम्। **उत्तरीये**। यमाश्रित्य महामाया जगन्मोहयते सदा। तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम्। **उपवीते**। नवभिस्तन्तुभिर्युक्त त्रिगुणं देवतामयम्। उपवीतं मया दत्तं गृहाण परमेश्वर। **सौभाग्यद्रव्ये**। (स्त्रीदेवतायाम्)। कज्जलाऽऽदर्शतिलक काचनिर्मितकङ्कणम्। केशप्रसाधनीं रम्यां काचग्रीवा विभूषणम्। सीमन्तकान्तं सिन्दूर वेणीसूत्रं च लोहितम्। सौभाग्यभूषणं सर्वं गृहाण सुरवन्दिते। **चन्दने**। श्रीखण्डचंदनं दिव्यं केशरादिसमन्वितम्। विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम्। **सिंदूरे**। उद्यदादित्यसंकासं स्त्रीणां सीमन्तभूषणम्। वीराऽलङ्करणं देव सिन्दूरं प्रतिगृह्यताम्। **अक्षतेषु**। अक्षतांश्च सुरश्रेष्ठ कुंकुमाक्तान्सुशोभनान्। मया निवेदितान्भक्त्या गृहाण परमेश्वर। **यवतिलेषु**। विष्णुप्रिया धान्यराजा माङ्गल्याः सतिला यवाः। तस्मात्तेषां प्रदानेन ममाऽस्त्वविकलं फलम्। **पुष्पेषु**। तुरीयवनसम्भूतं नाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

गुणमनोहरम् । अमन्दसौरभं पुष्पं गृह्यतामिद मुत्तमम् । बिल्वपत्रेषु । श्रीफलस्तु सदा योनिर्देवानां प्रीतिकृत्सदा । तत्पत्राणि प्रयच्छामि पवित्राणि सुरेश्वर । दूर्वासु । दूर्वाङ्कुरान्सुहरिता नमृतान्मङ्गल प्रदान् । आनीतांस्तवपूजार्थं गृहाण गणनायक । मालासु । माल्यानि च सुगन्धीनि ग्रथितानि प्रयत्नतः । मयाऽऽहृतानि पूजार्थं गृहाण पुरुषोत्तम । धूपे । वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् । दीपे । सुप्रकाशो महान्दीप स्त्रैलोक्यतिमिरापहः । सबाह्याभ्यन्तरंजोतिर्दीपोऽयं प्रतिगृह्यताम् । नैवेद्ये । सत्पात्रशुद्धं सुहविर्विविधानेकभक्षणम् । निवेदयामि देवेश ह्यनुगाय गृहाण तत् । कर्पोद्वर्तने । गन्धकर्पूरसंयुक्तं कस्तूर्यादिसुवासितम् । करोद्वर्तनकं देव गृहाण परमेश्वर । फलेषु । फलानीमानि देवेश स्थापितानि पुरस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि । (छागादिबलिश्चेदत्रावसरे तद्विधिना दद्यात्) ताम्बूले । पूगीफलसमायुक्तं सुधाखदिरसंयुतम् । भक्त्यादत्तं मया देव ताम्बूल प्रतिगृह्यताम् । उपानद्द्वय्ये । हिरण्य गर्भगर्भस्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

हेमबीजं विभावसोः। अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे। सुगन्धौ। नानापुष्परसोद्भूतं प्रसरच्चा रुसौरभम्। मानसा मोदितं गन्धं गृहाण परमेश्वर। चामरे। शणाङ्कशरसंकाश हिम डिण्डीरपाण्डुर। प्रोत्सारयाऽऽशु दुरितं चामराऽमर वल्लभ। (व्यजने)। आदर्शे। दर्शनेन त्वमादर्श नूनं मङ्गलदायक। शौर्यसौभाग्यसत्कीर्तिनिमल ज्ञानदो भव। नीराजने। पञ्चवर्तिसमायुक्तं घृतेन ज्वलितं मया। आरार्तिकं प्रदत्तेन तेन तुष्टः सदा भव। कर्पूरनीराजने। सूर्येन्दुतारकावह्नितेजः पुञ्जविराजितम्। कर्पूरदीपं देवेश गृहाण सुरनायक। प्रदक्षिणायाम्। यानि कानि च पापानि ब्रह्महत्यासमानि च। तानि तानि प्रणश्यन्तु प्रदक्षिणि पदेपदे। पुष्पाञ्जलौ। नानासुगन्धि पुष्पाणां यथाकालोद्भुवाभयम्। तवाञ्जलिर्मया दत्तो गृहाण तमधीश्वर। नमस्कारे। नमः सवहितार्थाय जगदाधारहेतवे। साष्टाङ्गोऽयं प्रणामोऽस्तु प्रणयेन मया कृतः। प्रार्थनायाम्। वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद। भक्तानामभयं कर्ता त्राताभव भवार्णवात्। मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वर। यत्पूजितं मया देव परि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding. M

पूर्णं तदस्तु मे। क्षमापणे। आवाहनं नजानामि नजानामि विसर्जनम्। मन्त्रं पूजां नजानामि क्षमस्व परमेश्वर। साधुवाऽसाधुवाकिंचित् यद्यदाऽऽचरितं मया। तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर। विसर्जने। इमां पूजां मया देवं यथाशक्तिनिवेदिताम्। रक्षार्थं तु समादाय व्रज स्वस्थान मुत्तमम्। यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम्। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च इति।

कर्मेश्वरार्पणं अच्छिद्रप्रार्थनाच

कर्म समाप्य अञ्जलिं बद्ध्वा। चतुर्भिश्च[1] चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच। हूयते च पुनर्द्वाभ्यां समे विष्णुः प्रसीदतु। यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्। ॐ अच्युतायनमः १ ॐ अच्युतायनमः २ ॐ अच्युतायनमः ३ इति अच्छिद्र प्रार्थनां कृत्वा। करे जलमादाय कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्या-

---

१, चतुर्भिरिति पद्यस्य व्याख्याकुच्चिका ॐ ३ श्रावय ४ अन्तुश्री ३ षट् ४ यज २ ये ३ यजामहे ५ वौ ३ षट् इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

त्मना वाऽनुसृतः स्वभावात्। करोमि यद्यत्सकलं परस्मै [1]नारायणायेति समर्पये तत् इतीश्वरार्पणं कुर्यात्।

नीराहारव्रते जलेन पारणस्यप्रकारोऽ-च्छिद्रप्रार्थनासहितो यथा--

यजमानः देवानुरूपेण विल्वतुलसीदलादि युतं सफल दक्षिणां चरणोदकं ताम्रादि पात्रे गृहीत्वा (क) (व्रतानां व्रतराजेन्द्र व्रतानां व्रतमुत्तमम्) व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि। सर्वं भवतु मेऽच्छिद्रं यदि चेच्छन्ति ब्राह्मणाः। ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः॥ सर्वदेवमयो विप्रो नतद्वचनमन्यथा। उपवासो व्रतं चैव स्नानं तीर्थं फलं तपः। विप्रैः सम्भाषितं यच्च तत्पूर्णं भवति व्रतम्। [2](अन्नव्यञ्जन पानेषु शय्यायां ताम्रभाजने। यच्च भुक्तमभुक्तं वा स्वप्नान्तरमथापि वा। दन्तान्तरविलग्नं वा क्षम्यतां मधुसूदन। सर्वं भवतु मेऽच्छिद्रं ब्राह्मणा भवतां गिरा)। ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम्। तेषां वाक्योदकेनैव शुद्ध्यन्ति

---

१. अत्र नारायणपदेन सकलजगदाधारईश्वरो विवक्षितः। शाक्तसौर-शैवैर्विष्णुमात्रपरोऽयं श्लोक इति न विचिकित्सितव्यम्।

२. धनुषचिन्हाऽन्तर्गतानि पद्यानि बहुषु पुस्तकेषु दृष्टतयाऽर्थाननुगमेपि लिखितानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मलिना जनाः । व्यासवाल्मीकिवचनात्पराशरवशिष्ठयोः । गर्गगौतम धौम्याऽत्रिकश्यपाऽङ्गिरसां तथा । वचनान्नारदादीनां सम्पूर्णं भवतु व्रतम् । अच्छिद्रं भक्ष्यभोज्येषु पर्यंकेष्वासनेषु च । नियमेषु च सर्वेषु भवति द्विजवाक्यतः । कृतैतद्धरितालिकानिराहारव्रतं विधिहीनं, श्रद्धाहीनं, द्रव्यहीनं, देशहीनं, कालहीनं, क्रियाहीनं, दक्षिणाहीनं, यत्कृतं तत्सुकृतमस्तु यन्नकृतं तद् गौरीशंकरयोः प्रसादाद्ब्राह्मणवचनाच्च सर्वं परिपूर्णमस्तु । आचार्यः यजमानहस्तात्पात्रमादाय 'अस्तु-परिपूर्णम्' । व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धयासत्यमाप्यते । अज्ञानतिमिरान्धस्य ज्ञानेनाऽनेनशङ्कर । प्रसादसुमुखो भूत्वा ज्ञानदृष्टिप्रदो भव इत्यऽभिमन्त्र्यं यजमानहस्ते दद्यात् । यजमानाश्च फलं दक्षिणां चाऽऽचार्याय दत्वा, विल्वपत्रयुतं जले—अकाल मृत्युहरणं सर्वव्याधिविनाशनम् । शम्भोः पादोदकं पीत्वा शिरसा धारयाम्यहम् इति पिबेत् शिरसि क्षिपेच्च ।

व्रतान्तरे हरितालिकापदस्थाने व्रतान्तरनाम निक्षिपेत् । विष्णुव्रते विष्णोः, केशवः, देवीव्रते देव्याः शाम्भविः, सूर्यव्रते सूर्यस्य, भास्करस्य, रवेः इति यथौचित्यमूह्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

व्रतोद्यापनम्

प्रायश्चित्तगोदानसङ्कल्पः—

पूर्वदिन कृत्यम्

अहं करिष्यमाणतत्तद्व्रतोद्यापनकर्मणि अधिकार सिद्धये प्राक्कर्तव्य यथोक्त नियमाऽकरणजन्य सकल-दोष निवृत्तिपूर्वकं सद्योदेहविशुद्धये प्राजापत्य प्रति-निधि गोदानानुकल्पं इदं रजतखण्डं चन्द्रदेवताक-मित्यादि।

प्रधानसङ्कल्पः। अहं कृतानां हरितालिका, ऋषि-पञ्चमी, एकादशी, शिवरात्रि, कृष्णाष्टमी, पूर्णिमा, रामनवमी, स्वस्थानी, सोमवती इत्यादि व्रतानां साङ्गपरिपूर्ण फलप्रदोद्यापनकर्म प्रारम्भमद्य करिष्ये। तदङ्गतया स्वस्तिपुण्याहवाचनं गणेशपूजनं मातृका-पूजनं वसोर्द्धारापूजनमायुष्यमन्त्रजपं नान्दीश्राद्धं चाहं करिष्ये। तत्तत्कर्म कर्तुन्नानानामगोत्रान्नानानाशर्मणो ब्राह्मणानेभिश्चन्दनाक्षत पुष्पपूगीफल धौतोत्तरीय कर-कासनादिभिर्वृणे—

सन्ध्यायां तत्तद्देवतानां पूजां कृत्वा अपरदिने-प्रभाते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding. M

कार्य-क्रमः

१. दम्पती पूजनम्
२. शय्यादानम्
३. प्रतिमादानम्
४. गोदानम्
५. वायनदानम्
६. देवप्रार्थना

हरितालिकाव्रतम्

शय्यादान सङ्कल्पः-(पृ० ६०)

प्रतिमादान सङ्कल्पः—

देशकालकीर्तनान्ते अहं कायिकवाचिकमानसिकसांसर्गिकज्ञाना ऽज्ञानकृतसकलपातकनिवृत्तिपूर्वकं दीर्घायुरारोग्यैश्वर्य फलप्राप्त्यर्थं गौरीलोक महितत्व कामनयोमामहेश्वर प्रीतये एतावत्कालपर्यन्तं कृत हरितालिका व्रतोद्यापन कर्मणः साङ्गतासिद्ध्यर्थमिमां सुपूजितां सोपस्करां सौवर्णीं श्रीउमाहेश्वरप्रतिमां विष्णुदेवताकाममुक गोत्रायेति दत्वा। प्रार्थना—नमस्ते देवदेवेश चन्द्र सूर्याग्निलोचना। महादारिद्र्य भग्नं मां समुद्धर दयानिधे। दान प्र०—ॐ अद्यकृतैतत् सुपूजित सोपस्कर सौवर्णीमाहेश्वर प्रतिमा दानकर्मणः साङ्गतासिद्धयर्थमिमां दक्षिणां रौप्यद्रव्यं चन्द्रदैवतं अमुकगोत्रायेति। गोदान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

सङ्कल्पः—अद्येह ममैतत्जन्मनि सर्वपापक्षयपूर्वक दीर्घायुरारोग्यैश्वर्यफलप्राप्त्यर्थं गौरीलोक महितत्व कामनयोमामहेश्वर प्रीतये एतावत्कालपर्यन्तं कृत हरितालिका व्रतोद्यापन कर्मणः साङ्गतासिद्धयर्थं न्यूनातिरिक्तपरिपूर्णार्थमिदं गोप्रत्याम्नायीभूतं रौप्यद्रव्यं चन्द्रदैवतं अमुकगोत्रायेत्यादि—प्रार्थना दानप्र० । वायनदानम् । अन्नं सुवंशपात्रस्थं फलपक्वान्नसंयुतम् । वायनं देव विप्राय ददामि प्रीतये तव । इति प्रार्थ्य—सङ्कल्पः—देशकाल कीर्तनान्ते अहं तत्तत्कल्पोक्तफलावाप्त्यर्थं कृतस्य हरितालिका व्रतोद्यापन कर्मणोऽपूर्णत्वपूर्तये इदं समफलपक्वान्नद्रव्यं तण्डुलपूण वंशपात्रं प्रजापति देवताकमुकगोत्राय सम्प्रददे । इत्क्युत्वा । अञ्जलिबध्वा—सौभाग्यरोग्यकामाय सर्वसम्पत्समृद्धये ॥ देवदेवी प्रमोदार्थंवामनं ते ददाम्यहम् । इति विप्रप्रार्थ्य दत्वा देवं प्राथयेत् । मया ह्यस्मिन् व्रतेदेवयदपूर्ण कृतं विभो । सर्वं भवतु सम्पूर्ण त्वत्प्रसदाद्दयानिधे ॥ त्वयि भक्ति सदैवास्तु मम विश्वेश्वर प्रभो । पुण्येबुद्धिः सतां सेवा सर्व धर्म फलं च मे । जपच्छिद्रं तपच्छिद्रं यच्छिद्रं व्रत कर्मणि । सर्वं सम्पूर्णतां यान्तु त्वत् प्रसादात्जगत्पते इति देवं प्रार्थयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

ऋषिपञ्चमीव्रतम्

ॐ अद्येह मम ऋतुदर्शनादारभ्यावसानपर्यन्तं ज्ञानाज्ञान कृत करिष्यमाण भाण्डादि स्पर्शजनित दुष्कृत निवृत्ति कामनया एतावत्कालपर्यन्तं कृत-र्षिपञ्चमी व्रतोद्यापनकर्मणः साङ्गतासिद्धयर्थं यिमां सुपूजितां सोपस्करां सौवर्णीं सारून्धतीकां सप्तर्षि प्रतिमां विष्णुदेवताकाममुकगोत्रायेत्यादि दत्वा । प्रार्थना–इमे सप्तर्षयः शान्ता सर्वपाप प्रणाशनाः । अरून्धत्या युता पूज्याः सर्व कामार्थ सिद्धये । दानप्रतिष्ठा, गोदानम्, वायनदानम्, देवप्रार्थना ।

स्वस्थानीव्रतम्

देशकालकीर्तनान्ते अहं कायिक० सकलपाप निवृत्तिपूर्वक शत्रुचौर्यादि भयनिवारण ब्रह्मराक्षसवेताल कूष्माण्ड-भूतप्रेत क्षेत्रपाल-शाकिन्यादि कीलन सान्न-पात राजयक्ष्मादि नानारोग निवारण दुर्ग्रह दुर्योगिनी दुःस्वप्नपीडानिवृत्ति यावत्जन्मनि पतिपत्नी पुत्रमित्र भृत्य गजादिश्वक्षेत्रधान्यरत्नादिसम्पद्भोगोत्तर गन्धर्वा-प्सरोगण संगीत पारिजात मञ्जरी मालादिशोभित विमानारोहणादि पारलौकिक भोगोत्तर गन्धर्वाप्सरोगण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

संगीत ज्योतिरूप सदाशिव परमसायुज्य प्राप्त्यर्थं तावत्काल पर्यन्त कृत स्वस्थानी व्रतोद्यापन कर्मणः साङ्गफलप्राप्तये इमां सुपूजितां सोपस्करां सौवर्णीं सदाशिव प्रतिमां अमुकगोत्रायेत्यादि···ततः प्रार्थना, गोदानम्, वायनदानम्, देव प्रार्थना ।

नवरात्रव्रतम्

देशकाल कीर्तनान्ते अहं यावत्जन्म यशोराज्य-सौभाग्य-पुत्र-धन-सम्पत्महासिद्धि सर्वशत्रु निबर्हण फलप्राप्त्यर्थं कृत नवरात्र व्रतोद्यापन कर्मणः साङ्ग-फलप्राप्तये इमां सुपूजितां सोपस्करां सौवर्णीं दुर्गा प्रतिमां अमुकगोत्रयिति दत्वा प्रार्थयेत् । नमस्ते देवि-देवेभ्यो वरदायि शिवप्रिये । यागतिस्त्वत्प्रपन्नां मां सामे भूयात्वदर्चनात् । ततः गोदान, वायनदानादि सर्वम् ।

सत्यनारायणव्रतम्

देशकाल कीर्तनान्ते अहं अनेकजन्मोपार्जित कायिकवाचिक मानसिक सांसर्गिक ज्ञाताऽज्ञात कृत सकलपापक्षयपूर्वक मनोभिलषितं निखिलफलावाप्त्यर्थं कृत सत्यनारायण प्रतिमां अमुकगोत्रायेति दत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

प्रार्थयेत्—नमस्तुभ्य जगन्नाथ सत्यनारायण प्रभो' त्वत्प्रसादेन मे देव पूर्णाः सन्तु मनोरथाः। इति प्रार्थ्य गोदानादि कृत्वा लक्ष्मीसहित सत्यनारायणं प्रार्थयेत्। मया ह्यस्मिन् व्रते देव व्रतपूर्णं कृतं विभो। सर्वं भवतु सम्पूर्णं त्वत्प्रसादाद्दयानिधे। त्वयि भक्तिः सदैवास्तु मम विश्वेश्वर प्रभो। पुण्ये बुद्धि सतां सेवा सर्वं धर्मफलं-च मे। जपच्छिद्रं तपच्छिद्रं यच्छिद्रं व्रत कर्मणि। सर्वं सम्पूर्णतां यातु त्वत्प्रसादज्जगत्पते इति।

इष्टदेवताव्रतम्

देशका० अद्येह मम सकलपापक्षयपूर्वकं धर्मार्थका-ममोक्षसिद्धये श्रीष्टदेवताप्रीतये एतावत्काल पर्यन्तं कृतेष्टदेवताव्रतोद्यापनकर्मणः साङ्गतासिद्धयर्थमिमां सुपूजितां सोपस्करां सौवर्णीमिष्टदेवताप्रतिमां विष्णु-देवताकाममुकगोत्रायेत्यादि।

कोजागरपूर्णिमाव्रतम्

अहं सकलजन्मार्जित पापक्षयपूर्वक परमैश्वर्यप्राप्ति कामनया श्रीमहालक्ष्मी प्रीतयेऽद्यपर्यन्तकृत कोजा-गरव्र तोद्यापनकर्मणा साङ्गतासिद्ध्यार्थमिमां सुपूजितां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सोपस्करां सौवर्णीं लक्ष्मीप्रतिमां विष्णुदेवताकाममुकेति इत्यादि ।

सोमवतीअमावास्याव्रतम्

अद्येह ममेहजन्मनिजन्मान्तरेवोपार्जित समस्त-पापक्षयपूर्वकं श्रुतिस्मृति पुराणोक्तसकलफलप्राप्तये श्री-परमेश्वरप्रीतये एतावत्कालपर्यन्त कृत सोमवत्यमा-वास्या व्रतोद्यापनकर्मणः साङ्गतासिद्ध्यर्थमिमां सुपू-जितां सोपस्करां सुवर्णनिर्मितां श्रीपरमेश्वरप्रतिमां विष्णुदेवताकामिति । प्रार्थना गोदानमित्यादि ।

अनन्तनारायणव्रतम्

ॐ अद्येह मम सर्वपापक्षयपूर्वकं चतुर्विध पुरुषार्थ सिद्ध्यर्थं श्रीअनन्तनारायण प्रीतये एतावत्कालपर्यन्त कृतानन्तव्रतोद्यापनकर्मणः साङ्गतासिद्ध्यर्थमिमां सुपू-जितां सोपस्करां सौवर्णीमनन्त-नारायणप्रतिमां विष्णु-देवताकाममुकगोत्रायेति । प्रार्थना—अनन्तःसर्वकामा-नामधिपः सर्वकामदः । व्रतेनानेन सुप्रीतो भवत्विह सदा मम । इत्यादि ।

प्रदोषव्रतम्

ॐ अद्येह मम धर्मार्थकाममोक्षकामनयैतत्काल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

पर्यन्त कृत प्रदोषव्रतोद्यापन कर्मणः सांगतासिद्ध्यर्थं इमां सुपूजितां सौवर्णीं शिवप्रतिमां विष्णुदेवताकाम-मुकगोत्रायेति । प्रार्थना, प्रसीद देवदेवेश प्रसीद परमेश्वर । प्रसीद सोम सर्वज्ञ प्रसीद करुणाकर इत्यादि ।

शिवरात्रिव्रतम्

ॐ अद्येह मम समस्त जन्मोपार्जित सकलपापक्षय-पूर्वक चतुवर्ग सिद्ध्यर्थं श्रीगौरीमहेश्वरप्रीतये एतावत्कालपर्यन्तकृत शिवरात्रिव्रतोद्यापन कर्मणः साङ्गतासिद्ध्यर्थमिमां सुपूजितां सोपस्करां सौवर्णीं गौरीमहेश्वर प्रतिमां विष्णुदेवताकाममुक गोत्रायेति—प्रार्थना शम्भोप्रसीददेवेश सर्वलोकेश्वरप्रभो । तवरूपप्रदानेन-मम सन्तु मनोरथाः । जयनाथकृपासिन्धो जयभक्तार्ति-भञ्जन । जयदुस्तर संसारसागरोत्तारण प्रभो । प्रसीद मे महाभाग संसारार्त्तस्य उद्धर । सर्वपापक्षयंकृत्वा रक्ष मां परमेश्वर । इत्यादि ।

पूर्णिमाव्रतम्

ॐ अद्येह ममेहजन्मनिजन्मान्तरे वा भर्त्रासह धर्मार्थकाममोक्ष प्राप्तिद्वारा श्रीचन्द्रप्रीतये एतावत्काल-पर्यन्तकृत पूर्णिमाव्रतोद्यापनकर्मणः साङ्गतासिद्ध्यर्थ-मिमां सुपूजितां सोपस्करां सौवर्णीं चन्द्रप्रतिमाममु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

केति–प्रार्थना, श्रीनिशाबन्धुरूपस्त्वं वसुदेवजगत्पते। मनोभिलषितं देव पूरयस्व नमो नमः। इत्यादि।

कृष्णाष्टमीव्रतम्

ॐ अद्येह मम समस्तजन्मोपार्जित सकलपाप क्षयपूर्वकानेकविधलक्ष्मीप्राप्त्यैहि भोगानन्तराक्षय विष्णु-लोकवासकामनया श्रीगोविन्दप्रीतये एतावत्कालपर्यन्त-कृत कृष्णाष्टमी व्रतोद्यापन कर्मणः साङ्गतासिद्धयर्थमिमां सुपूजितां सोपस्करां सौवर्णीं श्रीगोविन्दप्रतिमां विष्णु-देवताका अमुकगोत्रायेत्यादि दत्वा। प्रार्थना, नमस्तुभ्यं जगन्नाथ देवकीतनय प्रभो। वासुदेवात्मजानन्त यशोदा-नन्दवर्धन। गोविन्द गोकुलाधार गोपीकान्त-नमोऽस्तु ते। इत्यादि।

रामनवमीव्रतम्

ॐ अद्येह मम सकलपापक्षयपूर्वकार्थ-धर्मकाम-मोक्षसिद्धये श्रीरामप्रीतये एतावत्कालपर्यन्त कृत राम-नवमीव्रतोद्यापनकर्मणः साङ्गतासिद्धयर्थं इमां सुपूजितां सोपस्करां सौवर्णीं श्रीरामप्रतिमां विष्णुदेवताकाममुक-गोत्रायेति–दत्वा। प्रार्थना इमां स्वर्णमयीं रामप्रतिमा च प्रयत्नतः। श्रीरामप्रीतयेदास्ये रामभक्ताय धीमते। प्रीतो रामोहरत्वाशु पापानि सुबहूनि च। इत्यादि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

एकादशीव्रतम्

ॐ अद्येह ममानेकजन्मोपार्जित कायिकवाचिक मानसिक सांसर्गिक ज्ञाताज्ञातकृत समस्तपापक्षय-पूर्वक परमपदप्राप्त्यर्थं श्रीनारायणप्रीतये एतावत्काल-पर्यन्त कृतैकादशी व्रतोद्यापनकर्मणः साङ्गतासिद्ध्यर्थ-मिमां सुपूजितां सोपस्करां सौवर्णीं श्रीनारायणप्रतिमां विष्णुदेवताकामकगोत्रायेति—प्रार्थना, त्वयिभक्तिः सदै-वास्तु मम दामोदरप्रभो। पुण्ये बुद्धिः प्रदा सर्व धर्मकर्म फलञ्च मे। जपच्छिद्रं तपच्छिद्रं यच्छिद्रं व्रतकर्मणि। सर्व भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः॥ इत्यादि—देवप्रार्थना, मया ह्यस्मिन् व्रते देव यदपूर्णं कृतं विभो! सर्व भवतु सम्पूर्णं त्वत्प्रसादाद्दयानिधे। त्वयिभक्ति-सदैवास्तु ममविश्वेश्वर प्रभो। पुण्येबुद्धिः सतां सेवा सर्वधर्मफलं च मे। जपच्छिद्रं तपच्छिद्रं यच्छिद्रं व्रतकर्मणि। सर्वं सम्पूर्णतां यातु त्वत्प्रसाज्जगत्पते। इत्यादि।

श्रीपञ्चमीव्रतम्

ॐ अहं श्रीसरस्वतीप्रसादपूर्वकं सकलविद्यो-पस्थिति नानाविध गीतवाद्य कौशलसिद्धिप्राप्त्यर्थं श्रीसरस्वती प्रीतये एतावत्कालपर्यन्त कृत श्रीपञ्चमी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

व्रतोद्यापन कर्मणः साङ्गतासिद्धयर्थं इमां सुपूजितां-सोपस्करां सौवर्णीं श्रीसरस्वती प्रतिमां···।

व्रतस्योद्यापनानुष्ठानजन्यफल प्राप्तिनिमित्तक गोदान संकल्पाः—

श्रीपञ्चमीव्रतस्य

ॐ अहं श्रीसरस्वती प्रसादपूर्वकं सकलविद्योपस्थिति नानाविध गीतवाद्य कौशलसिद्धये कृतस्य श्रीसरस्वती व्रतस्योद्यापनानुष्ठानजन्य समग्रफलसिद्धये इदं गोमूल्यद्रव्यं रजतं चन्द्रदैवतममुकगोत्रायेति। प्रार्थना, नमोगोभ्यः० दानप्रतिष्ठा द्रव्यमादाय, कृतस्य श्रीपञ्चमी व्रतोद्यापन सिद्धिफल गोमूल्य रजतदानकर्मः सांगफल प्राप्तये इदं ताम्रखण्डं सूर्यदैवतममुक गोत्रायेति—

वैकुण्ठचतुर्दशीव्रतस्य

देय ब्राह्मणं च सम्पूज्य अहं श्रीवैकुण्ठाधिनाथ प्रसादपुरःसर कायिक-वाचिक-मानसिक-सांसर्गिक ज्ञानाज्ञानकृत सकलपाप निरसनपूर्वकं कैवल्यमोक्षौपयिकानुभव पर्यवसायि अध्यात्मज्ञानसिद्धये कृतस्य वैकुण्ठ चतुदशी व्रतोस्योद्यापनानुष्ठानजन्य फलसिद्धये इदं गोमूल्य द्रव्यं रजतं चन्द्रदेवेतममुकगोत्रायेति-प्रार्थ० ॐ नमो गो०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

कोजागरव्रतस्य

अहं श्रीमहालक्ष्मी प्रसाद सिद्धिद्वारा इहलोके धनधान्य समृद्धि विपुलैश्वर्यस्थिरताऽऽजन्म नैरूज्य मनाभिलषित निखिलकामना सिद्धये कृतस्य कोजागर व्रतस्योद्यापनानुष्ठानजनित सकलफलावाप्तये इदं गोमूल्य द्रव्यं रजतं चन्द्रदैवतममुक० । इत्यादि ।

व्रत	मन्त्र	होमसामग्री
हरितालिका	ॐ नमः शम्भवायच देवीद्वार	तिल, जव, घृत
पञ्चमी	सहस्तोमाः	तिल, घृत
एकादशी	इदं विष्णु	पायस, तिल, घृत
रामनवमी	नाममन्त्रेण	पायस, घृत
कृष्णाष्टमी	इदं विष्णु	पायस, तिल, घृत
सत्यनारायण	इदं विष्णु	,, ,, ,,
अष्टमी	इष्टदेवता मन्त्रः	,, ,, ,,
पूर्णिमा	इमन्देवा	,, ,, ,,
स्वस्थानी	ॐ नमः शम्भवायच०	,, ,, ,,
नवरात्र	दुर्गानाम मन्त्र वा०	,, ,, ,,
	ॐ अम्बेऽअम्बालिके०	,, ,, ,,
कोजाग्रत	श्रीश्चते	,, ,, ,,
शिवरात्रि	त्र्यम्बकम्	[1]तिल, धान्य, यव, पायस
	ॐ नमः शम्भवायच गौरीर्मिमा०	बिल्वपत्र होमो नाम मन्त्रेण
सोमवती श्रीपञ्चमी वैकुण्ठचतुर्दशी	इदं विष्णु	पायस, तिल, पिप्पलसमिधा

१ शिवनाम मन्त्राः—अज, एकपाद, अहिर्बुध्न्य, भव, शर्व, उमापति, रुद्र, पशुपति, शम्भु, वरद., शिव, महादेव, हर, त्रीक ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

[1]अभिषेकः

उत्तरैशान्यऽभिमुखा ऋत्विजः पूर्वैशान्यभिमुखस्य, पूर्वैशान्यभिमुखा ऋत्विजः उत्तरैशान्यभिमुखस्य यजमानस्य सपरिवारस्य वाद्यमंगलगीतकैः सह ईशानकलशोदकेनाऽभिषेकं कुर्युः। महार्णवधृत मत्स्यपुराणे "अथाभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः। पूर्णकुम्भेन तेनैवहोमान्ते प्रागुदङ्मुखैः। यजमानस्य कर्तव्यश्चतुर्भिस्नपनं बुधैः इति। कुम्भेन तेनैव इति तेन पूर्वमीशानदिग्भागस्थापितेन। एवकारेण कलशान्तरेणतदुदकं नीत्वाऽभिषेको निषिध्यते। चतुर्भिरिति कृतवरणानामृत्विजामुपलक्षणम्" इति।

अभिषेकमन्त्राः

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥ १॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा॥ २॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्राह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा॥ ३॥ कीर्तिर्लक्ष्मी-

---

१. अभिषेक देशो मण्डपेज्ञानभागे। 'अथयजमानो ग्रहवेद्या प्रागुदीच्यां शुचौ देशे' इत्याश्वलायन वचनात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥४॥ एतास्त्वा मभिषिञ्चन्तु देवपत्न्यः समागताः। आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ५ ॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः। देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मनवो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाऽप्सरसांगणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि राजानो बाहनानि च। ओषधानि च रत्नानि कालस्याऽवसवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदानदाः। एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ९ ॥

हरिः ॐ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्। आश्विनोर्भैषज्येनतेजसे ब्रह्मवर्चसाया भिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलायश्रियै यशसे भिषिञ्चामि ॥३॥ कोसि कतमोसि कस्मैत्वा कायत्वा सुश्लोक सुमंगल सत्यराजन् ॥४॥ शिरोमे श्रीर्यशोमुखन्त्विषिःकेशाश्च श्मश्रूणि। राजामे प्राणोऽअमृतंसम्राट्चक्षुर्विराट् श्रोत्रम् ॥५॥ जिह्वामेभद्रंवाङ्महोमनोमन्युः स्वराड्भामः मोदाः। प्रमोदाऽअंगुलिरंगानि मित्रं मे सहः। बाहूमे बलमिन्द्रियꣳ हस्तौमे कर्मवीर्यम्। आत्माक्षत्रमुरो मम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

।७। पृष्टीर्मे राष्ट्रमुदरमꣳ सौग्रीवाश्च श्रोणी ऊरूऽ-अरत्नी जानूनी व्विशोमेङ्गानि सर्वतः ।८। नाभिर्मे चित्तंविज्ञानम्पायुर्मेपचितिर्भसत्। आनन्दनन्दावाण्डौमे भगः सौभाग्यम्पसः। जङ्घाभ्याम्पद्भ्यान्धर्मोस्मिव्विशिराजा प्रतिष्ठितः ।९। प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे-प्रत्यश्चेषु प्रतितिष्ठामि गोषु प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रतिप्राणेषु प्रतिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञे ॥१०॥ त्रयादेवाऽएकादशत्त्रयस्त्रिꣳशाः सुराधसः। बृहस्पति-पुरोहिता देवस्यसवितुः सवे देवादेवैरवन्तुमा ।११। प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः। सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूꣳषिसामभिः सामान्यृग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्काराऽऽआहुतिभिराहुतयो मे कामान्समर्द्धयन्तु भूः स्वाहा १२।२०।

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके। घण्टास्वनेन नः पाहि चपज्यानिःस्वनेन च ॥ १ ॥ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे। भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते। यानि चात्यर्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

घोराणि तैरक्षास्मांस्तथा भुवम् ॥ ३ ॥ खड्गशूल गदादीनि यानि चास्त्राणि तेम्बिके । करपल्लव सङ्गीनि तै रस्मान् रक्षसर्वतः ॥४॥

ॐ द्यौःशान्ति रन्तरिक्ष ९ शान्तिः पृथिवीशान्ति रापःशान्ति रोषधयःशान्तिः । वनस्पतयःशान्तिर्व्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिः सर्व ९ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि । तच्चक्षुर्देव हितंपुरस्ताच्छुक्रमुच्चरत् । पश्येमशरदः शतञ्जीवेमशरदः शतञ्शृणुयामशरदः शतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतभूयश्चशरदः शतात् । स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु । विश्वानिदेवसवितर्दुरितानि परासुव । यद्भद्रंतन्नआसुव । शुभंकल्याणं भवतु इति ।

दैवकर्मणि तिलकपुष्पादि प्रसाददाने आचारादागता [1]आशीर्वादमन्त्राः

ॐ [2]आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रे रा-

(१) 'यांवैकाञ्चनयज्ञऋत्विजआशिषमाशासते यजमानस्यैव सा' इति गृह्यगदाधरभाष्योश्रुतिः ।

(२) मन्त्रपाठकर्तृगतंशुभाशंसनं स्पष्टम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

जन्यः शूरइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामेनः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योग क्षेमो नः कल्पताम् २२।२२ [1]दीर्घायुस्तओषधे खनिता यस्मैचत्वा खनाम्यहम्। अथोत्वन्दीर्घायुर्भूत्वाशतवल्शा विरोहतात्। १२।१००। [2]पुनस्त्वादित्यारुद्रावसवः समिन्धताम्पुनर्ब्रह्माणो वसुनीथ यज्ञै धृतेनत्वं तन्वं वर्धयस्वसत्याः सन्तु यजमानस्य कामाः १३।४४ [3]मनसः कामनाकूतिं वाचः सत्यमशीय। पशूनाꣳ रूपमन्नस्य रसो यशःश्रीः श्रयताम्मयि ३९।४ [4]आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम्। इदꣳहिरण्यं वर्चस्वज्जैत्राया विशतादुमाम्। [5]नतद्रक्षाꣳसि नपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳह्येतम्। यो विभर्ति

(१) यया खनितू रोगिण ओषधेश्च दीर्घमायुः प्रार्थ्य ओषधेः शाखाभिवृद्धिं प्रार्थयते याज्ञिकस्तथा तवाप्यं दीर्घमायुः प्रार्थ्य सन्तानाभिवृद्धिं प्रार्थये इत्युपमाविधया यजमानस्य शुभाशिषं प्रार्थयते मन्त्र- पाठकर्ता।

(२) होमेन तृप्तमग्निप्रार्थ्य यजमानस्यशुभाशियं प्रार्थयते मन्त्रपाठकर्ता।

(३) मन्त्रपाठकर्तृगतं शुभाशंसनं स्पष्टम्।

(४) मन्त्रपाठकर्तृगतं सुवर्णोपलक्षितधनाशंसनं स्पष्टम्।

(५) हिरण्यधारणस्य दीर्घायुर्लाभफलोक्त्या पूर्वमन्त्राशंसित हिरण्यधारणावश्यंभावसम्भावसम्भावनया मन्त्रपाठकर्तुर्यजमानस्य दीर्घायुर्लाभाशंसनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

दाक्षायणꣳ हिरण्यꣳ सदेवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घमायुः। [1]श्रीर्वचस्र्यमायुष्यमारोग्यमाविधात्पवमानं महीयते । धान्यं धनंपशून्वहु पुत्रलाभं शतसंवत्सरं दीर्घमायुः। शतञ्जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमुवसन्तान् । शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ८।८ ।

पित्र्यकर्मणि तिलकपुष्पादिप्रसाददाने [2]आचारादागता आशीर्वादमन्त्राः

ॐ [3]शतमिन्नुशरदो अन्तिदेवा यत्रानश्चक्रा जरसन्तनूनाम्। पुत्रासो यत्रपितरो भवन्तिमानो मध्यारीरिषतायुगन्तोः २५।२२ [4]आदितिद्यारदितिरन्तरिक्षमदितिर्माता सपिता सपुत्रः। विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् २५।२३ [5]स्वा-

(१) श्रीसूक्ते।

(२) यद्यपिस्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः। तथापि लौकिकाचारं-मनसापि नलङ्घयेत्।

(३) शतवर्षपर्यन्तं देवानां स्वसमीपावस्थितिप्रार्थनया पौत्रदर्शनपर्यन्तमध्ये आयुषो हिंसाभावप्रार्थनया च स्पष्टं शतायुःप्रार्थनम् ।२२।

(४) स्वर्गादीनामदीनत्वप्रार्थनेन तेषां स्वस्मिन्दयालुता तात्पर्येण प्रार्थिताभवति ।२३।

(५) तादृशविशेषणशालिनां नराणां स्ववाहनरक्षितृत्वमस्त्विति पितृभ्य प्रार्थनम् ।४६।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

दुषछं सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो-गभीराः चित्रसेना इषुबला अमृध्राः सतोवीराऽउरवो व्रातसाहाः २८।४६ [1]ब्राह्मणा सः पितरः सोम्यासः शिवेनोद्यावापृथिवी अनेहसा। पूषानः पातु दुरितादृतावृधो रक्षामाकिर्नो अघशऽंसईशत २८।४७ [2]पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्नपितरे मीमदन्तपितरो तीतृपन्तपितरः पितरः शुन्धद्ध्वम् १८।३६। [3]पुनन्तु मा पितरः सोम्यासः पुनन्तुमा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा। पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै १८।३७।

पञ्चरत्नादीनां स्वरूपम्

पञ्चरत्नानि। 'सुवर्णं रजतं मुक्ता लाजावर्तं प्रवालकम्। रत्न पञ्चकमाख्यातम्' इति आदित्यपुराणे।

पञ्चपल्लवाः। 'अश्वत्थोदुम्बरप्लक्ष चूतन्यग्रोध पल्लवाः। पञ्चभङ्गा इति ख्याता सर्वकर्मसु शोभना' इति हेमाद्रौ ब्रह्माण्डपुराणे। भङ्गाः पल्लवाः।

---

(१) रक्षाप्रार्थनं स्पष्टम् ४७।
(२) पितृभ्यस्तात्पर्यवृत्मा स्वगततृप्ति प्रार्थनम् ३६।
(३) आयुः प्रार्थनं स्पष्टम् ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

पञ्चाऽमृतम्। 'गव्यमाज्यं दधि क्षीरं माक्षिकं शर्करान्वितम् । एकत्रमिलितं ज्ञेयं दिव्यं पञ्चामृतं परम्' इति अनुष्ठानप्रकाशे।

पञ्चगव्यम्। 'गोमूत्रं गोमयं क्षीरं दधि सर्पिर्यथाक्रमम्' इति व्रतराजंधृतहेमाद्रौ स्कान्दे।

सर्वौषधयः। कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेय चन्दनम्। वचाचम्पक 'मुस्तं च सर्वौषध्यो दशस्मृताः' इति छन्दोगपरिशिष्टे।

सप्तमृदः 'गजाश्वरथवल्मीक संगमाद्ध्रदगो कुलात्। मृदमानीय कुम्भेषु प्रक्षिपेच्चत्वरात्तथा'। गोकुलावधि सप्त चत्वरेणसहाऽष्टौ मृदो भवन्ति।

सप्तधान्यानि। यव गोधूम धान्वानि तिलाः कङ्गस्तथैवच। श्यामाकं चीनकं चैव सप्तधान्यमुदा हृतम्' इति षट्त्रिंशन्मते।

मधुपर्कः। 'दधिमधुघृतानि मिलितानि।'

सौभाग्यद्रव्याणि। 'हरिद्रा कुङ्कमंचैव सिन्दूरादिसमन्वितम् कज्जलं कण्ठसूत्रादि सौभाग्य द्रव्य मुच्यते' इति अनुष्ठानप्रकाशे विष्णुधर्मे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ताम्बूलम् । 'महापिप्पलपत्राणि क्रमुकस्य फलानिच । शुक्तिक्षारेण संयुक्तं ताम्बूलमितिसंज्ञितम्' इति हेमाद्रौ रत्नकोशे ।

मुखवासम् । 'श्वेतपत्रं च चूर्णंच क्रमुकस्य फलानिच । नारिकेलफलोपेतं मातुलाङ्गसमायुतम् । एला कंकोल कर्पूरैर्मुखवासं प्रचक्षते' इति ब्र० हेमाद्रौ रत्नकोशे ।

यक्षकर्दमः । 'कस्तूरीह्यगुरुश्चैव कर्पूरश्चन्दनं तथा । कंकोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः' इति अनु० ।

उद्वर्तनद्रव्याणि । 'रजनी सहदेवीच शिरीषं लक्ष्मणापिच । सहभद्रा कुशाग्राणि उद्वर्तनमिहोच्यते' । इति अनुष्ठानप्रकाशे विष्णुधर्मे ।

अर्घेनिक्षेप्यवस्तु । 'आपः क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा । यवाः सिद्धार्थकश्चेति ह्यर्घ्योऽष्टाङ्गः प्रकीर्तितः' ।

पाद्येनिक्षेप्यंवस्तु । दूर्वा च विष्णुक्रान्ता च श्यामाकं पद्ममेव च । पाद्याङ्गानिच चत्वारि कथितानि समासतः इति व्रतराजे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

आचमनीये निक्षेप्यंवस्तु। कर्पूरमगरुं पुष्पं द्रव्याण्याचमनीयके। अथवा–तथाऽऽचमनपात्रेपि दद्याज्जातीफलं मुने। लवङ्गमपि कंकोलं शस्तमा चमनीयके'। इति व्रतराजे

शस्यधान्यादयः। 'शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं स्विन्नमन्न मुदाहृतम्' इतिरघुनन्दनीये तिथि तत्वे वशिष्ठः।

साष्टाङ्गनमस्कारः। 'उरसा शिरसा दृष्ट्या मन सा वचसा तथा। पद्भ्यां कराभ्यां जानुभ्यां प्रणामो ऽष्टाङ्ग उच्यते।

अश्वत्थतुलस्यादीनां नमस्कारमन्त्राः

अश्वत्थस्य। अश्वत्थ हुतभुग्वास गोविन्दस्य सदाश्रय। अशेषं हर मे पापं वृक्षराज नमोस्तुते।

तुलस्याः। देवैस्त्वं निर्मिता पूर्व मर्चिताऽसि मुनीश्वरैः। नमोनमस्ते तुलसि पापं हर हरिप्रिये। मनः प्रसादजननी सुखसौभाग्य वर्द्धिनि। आधि व्याधि हरेनित्यं तुलसी त्वं नमोस्तुते।

कुशस्य। विरञ्चिनासहोत्पन्न परमेष्ठिनिसर्गज। नुद सर्वाणि पापानि दभ स्वस्तिकरो भव।

शमीवृक्षस्य। शमी शमयते पापं शमी लोहित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

कण्टका । धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च । दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहंशमीं शुभाम् ।

धात्रीवृक्षस्य । गौरीबीजात्समुद्भूता विश्वधात्री प्रकीर्तिताः । विष्णुसायुज्यदात्रीच धात्रि तुभ्यन्नमोनमः ।

वटवृक्षस्य । अकारमूलरूपाय उकारस्कन्धशाखने । मकारफलपुष्पाय वटवृक्षाय ते नमः ।

दूर्वायाः । त्वन्दूर्वे ऽमृतजन्मासि वन्दितासि सुरैरपि । सौभाग्यं संततिं देहि सर्वकार्यकरी भव ॥ यथा शाखाप्रशाखाभिर्विस्तृताऽसि महीतले । तथा ममापि सन्तानं देहि त्वमजरामरे ॥

ग्रहाणांमन्त्राः

जन्मलग्नाद्वर्षलग्नाद्गोचराच्चऽमुकाऽमुकस्थानस्थिता ग्रहा *अनिष्टफलदा अपि पूजया, होमेन, दानेन, जपेन च प्रीताः शुभफलं प्रयच्छन्ति इति ज्यौतिषसंहिता स्मृतिपुराणाऽऽगमेषु प्रसिद्धम् । तेषां जपादिसङ्कल्पा लिखिताः । अत्र तेषां ग्रहादीनां मन्त्राअपि लिख्यन्ते ।

---

* 'जपहोमग्रहोपास्ति देवद्विजगवार्चनैः । नश्यत्यमंगलं सर्वं कुदशाग्रहसम्भवम्' इति याज्ञवल्क्यः । यश्च यस्य यदा दुष्टः स तं यत्नेन पूजयेत् । ब्रह्मणैषां वरोदत्तः पूजिताः पूजयिष्यथ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

तान्त्रिकामन्त्राः

सूर्यस्य ।

ॐ घृणिः सूर्यआदित्यः

सूर्याऽष्टाक्षरमन्त्रस्य देवभागऋषिर्गायत्रीच्छन्द आदित्योदेवताऽऽदित्यप्रीत्यर्थे जपे विनियोगः । शिरसि देवभागऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि आदित्याय देवतायै नमः ।

सत्यतेजो ज्वालामणे हुं फट् स्वाहा शिरसे स्वाहा । विष्णुतेजो ज्वालामणे हुं फट् स्वाहा शिखायैं वषट् । रुद्रतेजो ज्वालामणे हुं फट् स्वाहा कवचायहुम् । अग्नितेजो ज्वालामणे हुं फट् स्वाहा नेत्रत्रयाय वौषट् । सर्वतेजो ज्वालामणे हुं फट् स्वाहा अस्त्रायफट् ।

ॐ आदित्यायनमः मूर्द्धि । एं रवये नमः मुखे । ॐ भानवेनमः हृदये । इं भास्करायनमः लिङ्गे । अं सूर्यायनमः पादयोः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ॐ ॐनमः मूर्द्धिन । ॐ घृनमः मुखे । ॐ णिनमः कण्ठे । ॐ सूनमः हृदये । ॐर्यः नमः कुक्षौ । ॐ आनमः नाभौ । ॐदि नमः लिङ्गे । ॐत्यः नमः पादयोः । इत्थं न्यासं कृत्वा श्लोकोक्तरूपं ध्यात्वा जपेत् । रक्ताऽब्जयुग्माऽभयदानहस्तं केयूरहाराऽङ्गदकुण्डलाढ्यम् । वन्धूककान्ति विलसत्त्रिनेत्रां माणिक्य मौलिं दिननाथमीडे । दानं वरम् । पुरश्चरणमष्टलक्ष जपः ।

दक्षिणे	वामे
१ कमल	१ कमल
२ वर	२ अभय

चन्द्रस्य

सौं सोमायनमः

सोमषडक्षरमन्त्रस्य भृगुर्ऋषिः पङ्क्तिश्छन्दः सोमोदेवता सोमप्रीत्यर्थे जपे विनियोगः । भृगु ऋषियेनमः शिरसि । पंक्तिश्छन्दसेनमः मुखे । सोमदेवतायैनमः हृदि ।

• पदार्थादर्शे 'आचार्यैश्च सौमित्युद्धृतम्' इत्युक्तेर्मुद्रितेऽनुष्ठानप्रकाशे मतान्तरे सौं सोमायनमः इत्युक्तेश्च चन्द्रमसः औकार (व्यापिनी) सहितः 'सौं सोमायनमः' इति षड्क्षरोमन्त्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सां हृदयायनमः। सीं शिरसेस्वाहा। सूं शिखायै वषट्। सैं कवचायहुम्। सौं नेत्रद्वयाय वौषट्। सः अस्त्राय फट् इति न्यस्य। श्लोकोक्तरूपं ध्यात्वा जपेत्। कर्पूरस्फटिकाऽवदातमनिशं पूर्णेन्दुविम्बाऽऽननं मुक्तादामविभूषितेन वपुषा निर्मूलयंतं तमः। हस्ताभ्यां कुमुदं वरञ्च दधतं नीलाऽलकोद्भासितं स्वस्याऽङ्कस्थमृगोदिताऽश्रमगुणं सोमं सुधाब्धिं भजे॥ अङ्कःरथमृगात् उत्पन्नः आश्रयगुणो नीलिमा यत्र तेनाङ्कोपि ध्येय इत्यःर्थ इति पदार्थादर्शः। पुरश्चरणं षडलक्षजपः।

वामे कुमुदं, दक्षकरे वरमिति मेरुतन्त्रेः।

भौमस्य

अं अंगारकायनमः

भौमाऽष्टाक्षरमन्त्रस्य ब्रह्मऋषिर्गायत्रीच्छन्दो भौमोदेवता भौमप्रीत्यर्थं जपे विनियोगः। शिरसि ब्रह्मऋषयेनमः। मुखे गायत्रीच्छन्दसे नमः। हृदि भौमदेवतायैनमः।

अं हृदयाय नमः। अं शिरसे स्वाहा। अं शिखायै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

वषट्। अं कवचाय हुम्। अं नेत्रात्रयाय वौषट्। अं अस्त्राय फट्। इति न्यासं कृत्वा। श्लोकोक्त रूप ध्यात्वा जपेत्। नमाम्यङ्गारकं रक्तं रक्ताम्बर विभूषणम्। जानुस्थवामहस्ताढ्यं भाजनेतरपाणिकम्। भाजनं इतरपाणौ यस्य तम। अस्य पुरश्चरणमष्ट लक्षजपः।

बुधस्य

बुं बुधायनमः

बुधषडक्षरमन्त्रस्य ब्रह्मऋषिः षङ्क्तिच्छन्दो बुधो देवता बुधप्रीत्यर्थे जपेविनियोगः। शिरसि ब्रह्मऋषये नमः। मुखे षङ्क्तिच्छन्दसे नमः। हृदि बुध देवतायै नमः।

बुं हृदयाय नमः। बुं शिरशे स्वाहा। बुं शिखायै वषट्। बुं कवचाय हुम्। बुं नेत्रद्वयाय वौषट। बुं अस्त्रायफट। इति न्यासंकृत्वा। श्लोकोक्तरूपं ध्यायेत। वंदे बुधं सदादेवं पीताम्बर सुभूषणं। जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम् ॥ अस्यपुरश्चरणं षट् सहस्रजपः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

बृहस्पते

बृं बृहस्पतयेनमः

बृहस्पत्यष्टाक्षरमंत्रस्य ब्रह्मऋषिरनुष्टुप्छन्दो बृहस्पतिर्देवता बृहस्पतिप्रीतये जपे विनियोगः। शिरसि ब्रह्मऋषयेनमः। मुखे अनुष्टुप्छन्दसेनमः हृदि बृहस्पति देवतायैनमः।

बृं हृदयाय नमः। बृं शिरसे स्वाहा। बृं शिखायै वषट्। बृं कवचाय हुम्। बृं नेत्रद्वयाय बौषट्। बृं अस्त्राय फट्। इति न्यासं कृत्वा। श्लोकोक्त रूपं ध्यात्वा जपेत्। सुवर्णाऽऽभं पीतवस्त्रं रत्नस्वर्णाम्बरादिकम्। किरन्तं दक्षहस्तेन रत्नादीन् बामपाणिना। स्पृशन्तं सम्यगपरं विपणौ कनकादिकम्। नानाऽलङ्कारशोभाढ्यं विद्यासागर पारगम्। विपणौ आसीनं वामपाणिना कनकरत्नादिकं स्पृशंतमित्यर्थः। अस्य पुरश्चरणमशीतिसहस्रजपः।

शुक्रस्य

ॐ [1]शुं शुक्राय स्वाहा

शुक्रसप्ताक्षर मन्त्रस्य ब्रह्मऋषिर्विराट्छन्द शुक्रो देवता ॐ वीजं स्वाहा शक्तिः शुक्रप्रीतये जपे विनि-

---

१ वस्त्रं मे देहि शुक्राय हृदयान्तः शुमादिकः। एकादशाक्षरोमन्त्र इत्युक्ता मन्त्रान्तरं तु ताराद्यः स्वाहान्तोयं नगार्णकः। बीजं तारोग्निभार्यातु शक्तिर्मुन्यादिपूर्ववत्। इति मेरुतन्त्रोक्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

-0. In Public Domain. Digitization by eGangotri.Funding: MI

योगः । शिरसि ब्रह्मऋषयेनमः । मुखे विराट् छन्दसे नमः । हृदि शुक्रदेवतायैनमः ॐ बीजायनमः गुह्ये । स्वाहाशक्तये नमः पादयोः ।

शुं हृदयायनमः । शुं शिरसे स्वाहा । शुं शिखायै वषट् । शुं कवचाय हुम् । शुं नेत्रद्वयाय वौषट । शुं अस्त्राय फट् । इति न्यासं कृत्वा श्लोकोक्तरूपं ध्यात्वा जपेत् । शुंक्रं नमाम्यासनस्थं मुक्ताऽऽभरणभूषितम् । स्वर्णवासो रत्नधाराचिन्मुद्राऽऽन्तकरद्वयम् । सुवर्णवस्त्ररत्नधारा वामे, ज्ञानमुद्रा दक्षिणे ॥ अस्य पुरश्चरणमयुतजपः ।

शनैश्चराय ।

शं शनैश्चरायनमः

शनैश्चराऽष्टाक्षरमंत्रस्य ब्रह्मऋषिर्गायत्रीछन्दो शनैश्चरोदेवता शनैश्चरप्रीत्यर्थे जपे बिनियोगः । शिरसि ब्रह्मऋषयेनमः । मुखे गायत्रीच्छन्दसेनमः हृदि शनैश्चरदेवतायै नमः ।

शां हृदयाय नमः । शीं शिरसे स्वाहा । शूं शिखायै वषट् । शौं कवचाय हुम् । शौं नेत्रद्वयाय वौषट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

शं अस्त्राय फट्। इति न्यासं कृत्वा श्लोकोक्त रूपं ध्यायेत्। वन्दे शनैश्चरं वक्रदंष्ट्रं नीलविभूषणम्। वामजानुस्थितवामकरं दत्ते वरं दधत्। अस्य पुरश्चरणमष्टसहस्रजपः।

राहो।

रां राहवेनमः

राहुषडक्षरमंत्रस्य ब्रह्मऋषिर्गायत्रीच्छन्दो राहुर्देवताराहुप्रीतये जपे विनियोगः। शिरसि ब्रह्मऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि राहुदेवतायैनमः।

रां हृदयाय नमः। रा शिरसे स्वाहा। ह शिखायै वषट्। वे कवचाय हुम्। न नेत्रद्वयाय वौषट्। मः अस्त्राय फट्। इति न्यस्य श्लोकोक्तरूपं ध्यायेत्। वंदे राहुं धूम्रवर्णं सपकायं कृताञ्जलिम्। विकृताऽऽस्यं रक्तनेत्रं धूम्रालङ्कारमन्वहम्। अस्यपुरश्चरणं षट्सहस्रजपः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

* केतोः।

कें केतवेनमः

केतुषडक्षरमंत्रस्य ब्रह्मऋषिः पङ्क्तिश्छन्दः केतुर्देवता कें वीजं केतुशक्तिः केतुप्रीतये जपे विनियोगः। शिरसि ब्रह्म ऋषयेनमः। मुखे पंक्तिच्छंदसे नमः। हृदि केतुदेवतायैनमः। गुह्येकं वीजायनमः। पादयोः केतुशक्तयेनमः।

कं हृदयाय नमः। कं शिरसे स्वाहा। कं शिखायै वषट्। कं कपचाय हुम्। कं नेत्रद्वयाय वौषट्। कं अस्त्राय फट् इति न्यस्य। श्लोकोक्तरूपंध्यायेत्। वंदे केतुं कृष्णवर्णं कृष्णवस्त्रविभूषितम्। वामोरुन्यस्त

---

* 'केतवस्त्वष्टोत्तरशतं सन्ति। धूम्राद्विवाहवः सर्वे गदिनो विकृताऽऽननाः। गृध्राऽऽसनगता नित्यं केतवःस्युर्वरप्रदाः। सर्वे किरीटिनः कार्या ग्रहालोकहितावहाः। स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा इति। पश्चिमोत्तरतः केतून्स्थापयेच्छुकतण्डुलैः' इति च मित्राक्षरायां हेमाद्रौ च मात्स्योक्तेः। केत वोजैमिनेयाश्च' इति। 'चित्राश्चकेतवः' इति च महार्णवे स्कान्दोक्तेः। खड्गाकारांस्तथाकेतून्स्थापयेदनुपूर्वशः' इति दानमयूखोक्तेश्च। 'केतूनावाहयामि' इति, शान्तिसारोक्तेश्च। केतव इहाऽऽगच्छत केतुभ्योनमः' इति नेपालीयगौरीदत्त पण्डितकृत रत्नावल्यामुक्तेश्च। पूजादौ केतवइहाऽऽगच्छतेहतिष्ठत केतूनाऽऽवाहयामि, केतुभ्योनमः इत्यादि वहुवचनांतं प्रयुञ्जीत। प्रयोगरत्नादौ प्राय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सद्धस्तं साभयेतरपाणिकम् ॥ अस्यपुरश्चरणं द्वादशाऽयुतजपः मंत्रान्तरे तथोक्तेः ।

[1]वैदिकमन्त्राः (ग्रहाणाम्)

आकृष्णेन इमन्देवा अग्निमूर्द्धा दिवः ककुत् । उद्बुध्यश्वेतिचऋचो यथासङ्ख्यं प्रकीर्तिता. । वृहस्पते अतियदर्यस्तथैवान्नात्परिस्रुतः । शन्नोदेवी तथाकाण्डात्केतुं कृण्वन्निमास्तथा' इतियाज्ञवल्क्य मत्स्यपुराणोक्ताः 'कयानश्चित्रआभुवदितिराहोरुदाहृतः' इति मात्स्येपाठः ।

ऋग्वेदीयग्रन्थेतु केतवे साङ्गाय, केतो इमं बलिमिति प्रयोगरत्ने 'केतोइहागच्छ' इति महार्णवे चैकवचनान्तः प्रयोगो दृश्यते । नवग्रहसाधारण्यं-वदन् पादत्रयेण चतुर्थचरणेनच केतुसंख्याञ्चाह 'सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः । अंगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा । शतमिति केतूनां मानप्रदर्शनार्थं नतु नियमार्थं पूजायान्त्वैकैव मूर्तिः शिष्टाचारात्' इति महार्णवकृतः । केतूनां वहुत्वेप्येकमेव देवतात्वमिति दानमयूखकृतः । देवतात्वस्य व्यासज्यवृत्तित्वेपि पितरोदेवतेतिवद्वहुवचनान्तः प्रयोगो न विरुद्धचते । अत्रेदमवधेयम् । केतुव्यक्तयस्त्वष्टोत्तरंशतं सन्ति । तेषु देवतात्वं प्रत्येकं पर्याप्तभित्यङ्गीकारे केतुपदस्येकवचानान्तः प्रयोगोपि न विरुद्ध्यते । देवतात्वं द्वित्वादिवद्वचासज्यवृत्तीतिमते केतुपदं बहुवचनांतं प्रयोक्तव्यमिति देवतात्वस्य प्रत्येकपर्याप्तिमभिप्रेत्य मेर्वादावागमे मंत्रे ध्यानेचैकवचनान्तः प्रयोग इति ।

१ मन्त्रायमर्थंप्रकाशयन्ति तस्यहोमोपचारदानजपपूजादेवतादेरर्थ यसंगभावं भजन्ते । अर्थंप्रकाशनसामर्थ्यरूपाल्लिगात् । यथा 'वर्हिदेवसद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

नंदामि' इत्यस्य मन्त्रस्य लवनांगत्वम् । सहि मंत्रो लवनं प्रकाशयितुं समर्थः यत्र तु मन्त्राणां विनियोजकः शब्दः श्रुत्यपरपर्यायः प्रत्यक्षोऽस्ति तत्रश्रुत्या विनियोगः । यथा 'ऐन्द्र्यागार्हपत्यमुपतिष्ठते इति । अत्रैन्द्र्येति तृतीया श्रुत्या निवेशनःसंगमनोवसूनां विश्वारूपाभिचष्टे शचीभिः । देव इव सवितासत्यधर्मेन्द्रोनतस्थौ समरेपथीनाम्' इतीन्द्रप्रकाशनसमर्थस्याऽपि मन्त्रस्य गार्हपत्योपस्थानेऽङ्गत्वम् ॥ नेन्द्रोपस्थानांगत्वम् । लिंगाच्छ्रुतेर्बलीयस्त्वात् । ततश्च यत्र प्रत्यक्षाश्रुतिरस्ति तत्र श्रुत्या मन्त्रस्य तत्तदर्थेऽङ्गत्वम् । यत्रतु श्रुतिर्नप्रत्यक्षा तत्र स्वप्रकाशितेर्थे लिंगेनांगत्वम् । इति सिद्धे येषां मन्त्राणां वेदवाक्येन स्मृतिवाक्येन वा येषु होमोपचार दानादिषु विनियोगो नास्ति तेषां तत्तद्देवतोपचारादिप्रकाशनसामर्थ्यं सति लिंगेन विनियोगः येषान्तु वेदवाक्यस्मृतिवाक्याभ्यां कस्मिश्चिदर्थे विनियुक्तानामपि तदर्थ प्रकाशनसामर्थ्यं नभवति यथा 'अग्निर्मूर्द्धादिव' इत्यादीनां याज्ञवल्क्य मात्स्यादिभिर्भौमग्रहपूजादौ विनियुक्तानां भौमग्रहादिप्रकाशनसामर्थ्यं नास्ति । अग्निपदस्य वन्हौ ऽशक्तत्वात् । तादृशमन्त्रघटकानां रूढार्थवाचिनां पदानां यौगिकार्थाऽङ्गीकारेण प्रकृतार्थाभिधानसामर्थ्यं परिकल्प्य लिंगेनप्रकृतार्थे विनियोगः । अमुमेवार्थं महार्णवे श्रीविश्वेश्वरभट्टा व्याजह्रु । एवमेव प्रकृतेप्याऽवाहनार्घ्यप्रभृतिबिसर्जनान्तेषू पचारेषु यत्र यत्र पृथक् मंत्रा विहितास्तत्र तैस्तैमत्रैस्तत्तदुपचाराः कर्तव्याः । वेषूपचारेषु विशेषेण नविनियुक्तामन्त्राः तेप्वप्युपचारेषु तत्तदेवताप्रकाशका आवाहनहोमादिषु विनियुक्ता एवं मन्त्राः कर्त्रिच्छया शेषतां भजन्ते । यद्यऽप्यऽग्निमूँर्द्धादिव इत्थादयो मंत्रा अग्न्यादिप्रकाशत्वेनाऽग्न्यादिदेवत्यानसाक्षाद्भौमादिप्रकाशकास्तथाप्यैन्द्र्यागार्हपत्यमुपतिष्ठतइतीन्द्रप्रकाशि कायाऋचः श्रुत्या गार्हपत्योपस्थानेशेषत्ववोधनाद्यथकथंचिदिन्द्रादिपदानामिदिपरमैश्वर्यइत्याद्यर्थचिन्तनेन योगबृत्या गार्हपत्ये बृत्तिरिबाऽग्निमुँर्द्धादिव इति मंत्रं भौमायकीर्तयेदित्यादिभिः पूर्वदर्शितवाक्यैरग्निर्मूर्द्धेत्यादिमन्त्राणां भौमादिशेषत्ववोधनादग्न्यादिपदानां भौमादिषु यथाकथंचिद्बृत्तिरव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

गन्तव्या। सा च वृत्तिरेवं गत्यर्थादगिधातारग्निशब्द उत्पन्नः भौमोपि गमनशीलः अथवाऽग्निवर्णत्वाद्भौमस्याऽग्निशब्द वाच्यत्वम्। उद्बुध्यस्वाग्ने इत्यत्राऽप्यग्निव्दः पूर्ववद्बुधेवर्तते तेजोभूयिष्ठत्वाद्वा उद्बुध्यस्वेत्यस्मिन्पदे बुधवर्णश्रुतेर्वा। अथाक्षरसाम्यानिन्नर्वृयादिश्रुतेः। यथापश्वक्रश्यपोभवतीतिश्रुतिः। अन्नात्परिश्रुतइत्यस्मिन्मन्त्रे विपानंशुक्रमन्धस इति शुक्रपदंनाम साम्याच्छुक्रे वर्तते। शन्नोदेवीरितिमन्त्रे शनिनामस्मारकस्य शन्न इति वर्णद्वयस्य विद्यमानत्वात्समन्त्रः शनिद्योतकः। कयानश्चित्रआभुवदित्यत्र चित्रपदंश्रूयतेचित्रश्चराहु। यतः शिरसा लक्ष्यते। अनयैवदिशाऽन्यत्राप्यूहनीयम्। एवंतत्तद्देवताप्रकाशकत्वमवगन्तव्यम्। 'यातेनोच्यते सादेवते' इति सर्वानुक्रमणिकापरिभाषायामभिधानात्। अन्यथाऽन्यापूज्याऽन्यामन्त्रा भिधेयेतिविरोधः स्यादिति एतदुक्तं भवति। यस्य मन्त्रस्य यस्मिन्नर्थेवाचनिको विनियोगस्तेन मन्त्रेण तस्यार्थस्याऽनुष्ठाने शंकाया लेशोपि नास्ति। वाचनिकविनियोगाऽभावेपि कमप्यर्थंप्रति प्रसिद्धाऽङ्गत्वस्याऽङ्गिनं प्रकाशयितुमसमर्थस्य [मन्त्रस्य तु तद्घटकानां पदानां यौगिकमर्थं कल्पयित्वा प्रकृतार्थाऽभिधानसामर्थ्यमाश्रित्याऽङ्गत्वं तिनर्वाह्यमिति वाचनिके विमियोगे सत्यपि प्रकृतार्थप्रकाशनाऽसमर्थस्य मन्त्रस्येत्थमेव प्रकृतार्थप्रकाशकत्वमाश्रयणीयम्।

सूर्यस्य।

आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच।
हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्'।

सोमस्य।

'इमन्देवाअसपत्नꣳसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठायमहते जानराज्यायेन्द्रस्येन्द्रियाय। इममुष्यपुत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ममुष्यैपुत्रमस्यैव्विशएषवोमीराजासोमोऽस्माकं ब्राह्मणानाꣳराजा' ८।४० ।

भौमस्य ।

'अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्या अयम् । अपाꣳरेताꣳसिजिन्वति' ।

बुधस्य ।

'उदुबुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयंच । अस्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवा यजमानश्चसीदत' १५।५४ ।

बृहस्पतेः ।

'बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम्' २६।३ ।

शुक्रस्य ।

अन्नात्परिस्रुतोरसं ब्रह्मणाव्यपिवत्क्षत्रंपयः सोमम्प्रजापतिः । ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसइन्द्रस्येन्द्रियमिदंपयोमृतम्मधु' १९।७५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

शनैश्चरस्य ।

शन्नोदेवीरभिष्टय आपोभवन्तु पीतये शंयोरभि-स्रवन्तुनः ।'

राहोः (मत्स्यपुराणोक्तः) ।

कयानश्चित्रआभुवदूतीसदावृधःसखा कया-शचिष्ठयावृता' २७।३८ ।

केतोः ।

'केतुं कृण्वन्नकेतवे । पेशोमर्याअपेशसे समुषद्भि-रजायथाः' २८।३७ ।

इतिनवग्रहमन्त्राः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

योगिनीमन्त्राः ।

तान्त्रिकाः

ग्रहमातरि तुष्टयां किं ग्रहैर्दुःस्थितैरपि । ग्रहमातरि रुष्टायां सुग्रहैः किम्प्रयोजनम् इतिमेरुतन्त्रे ।

पिङ्गलायाः (सूर्यमातुः)

क्षेंपिङ्गले वैरिवारिणि प्रसीद फट् १३

क्षां हृदयाय नमः । क्षीं शिरसे स्वाहा । क्षूं शिखायै वषट् । क्षैं कवचायहुम् । क्षौं नेत्रत्रयाय वौषट् । क्षः अस्त्राय वट् इतिन्यस्य श्लोकोक्तरूपां ध्यात्वा जपेत् । पिंगवर्णां पिगकेशीं पिंगनेत्रां धनुः शरान् । हस्ताभ्यां दधतीं पद्मयुगलं तां भजाम्यहम् । पुरश्चरणं [1]त्रयोदशलक्षजपः ।

---

१ तत्रतत्र पुरश्चरणजपे वर्णलक्षतोक्तेः संकटायाः षोडशाऽक्षरमंत्रकथनोत्तरं तत्र षोडशलक्षाणिजप्त्वोत्युक्तेश्च जपसाम्यानुक्तौ वर्णलक्षतांगीकारौचित्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

दक्षिणे	वामे
१ कमल	१ कमल
२ वाण	२ धनु

मङ्गलायाः (चन्द्रमातुः)

'ह्रीं मङ्गले मङ्गलालये स्वाहा' ११ ।

हां हृदयाय नमः । ह्रीं शिरसे स्वाहा । हूं शिखायै वषट् । हैं कवचाय हुम् । ह्रौं नेत्रत्रयाय वौषट् । हः अस्त्राय फट् । इति न्यस्य ध्यात्वा जपेत् । ध्यायेदेनां त्रिनयनामुद्यदादित्यसन्निभाम् दरस्मेरमुखाम्भोजां सिन्दूरसुन्दराऽधराम् । पद्मद्वये धनुर्वाणन्दधतीं भुज-पल्लवैः । सुगुञ्जन्मंजुमंजीरां कांचीगुणविराजिताम् । पुरश्चरणमेकादशलक्षजपः ।

भ्रामर्याः (भौममातुः)

क्षीं भ्रामरि सपत्नान्मे अधीश्वरि भ्रामयत्क्षीं १६ ।

क्षां हृदयाय नमः । क्षीं शिरसे स्वाहा । क्षं शि-खायै वषट् । क्षैं कवचाय हुम् । क्षौं नेत्रत्रयाय वौषट् । क्षः अस्त्राय फट् इति न्यस्य । ध्यात्वा जपेत् । पिंग-वर्णां पिंगकेशीं पिंगनेत्रां । दक्षवामयोरुपरि कमले । अधः वाणधनुषी दधानां पिंगलावत्सर्वमस्या इत्युक्तेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

भद्रिकायाः (बुधमातुः)

[1]व्लूँ भद्रिके मे मम भद्रंदेहिपरभद्राणिनाशय नाशय स्वाहा ॥२४॥

व्लां हृदयाय नमः । व्लीं शिरसे स्वाहा । व्लूँ शिखायैवषट् । व्लैं कवचाय हुम् । व्लौं नेत्रत्रयाय वौषट् । व्लँः अस्त्राय फट् इतिन्यस्य । उद्यादाऽऽदित्यकान्तिं त्रिनयनां स्मेरमुखां रक्तोष्ठीं उपरि पद्मद्वयं अधो दक्षादिवाणधनुषी दधतीं मञ्जीरकांच्यादिभूषणभूषितां ध्यात्वा जपेत् । मङ्गलावद्ध्यानं पिंगलावज्जपादिकमित्युक्तेः । पुरश्चरणं चतुर्विंशतिलक्षजपः ।

धन्यायाः (गुरुमातुः)

श्रीं धनदे धन्ये स्वाहा

श्रां हृदयाय नमः । श्रीं शिरसे स्वाहा । श्रूं शिखायै वषट् । श्रैं कवचाय हुम् । श्रौं नेत्रत्रयाय वौषट् इति न्यस्य । पिंगलावद्ध्यात्वा जपेत् । श्रामर्यांपिंग

• दन्त्योष्ठवकारयुक्तं वीजम् । व्लूं बीजं तोयभूयोगाज्जा तमादौ समुच्चरेत्' इति मेरूक्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

लावत्सर्वमस्या इत्युक्तेर्भद्रिकायामपि 'पिंगलावत्सर्व मुद्दिष्टं जपाद्यं प्रोक्तवर्त्मने' इत्युक्तेश्च यस्या योगिन्या यद्यन्नोक्तं तत्सर्वं पिंगलावत्कार्यमिति प्रतीतेः। पुरश्चरणमष्टलक्षजपः।

सिद्धायाः (शुक्रमातुः)

'ह्रीं सिद्धिदे सर्वं मम साधय साधय नमः' १६

हां हृदयाय नमः। हीं शिरसे स्वाहा। हूं शिखायै वषट्। हैं कवचाय हुम्। हौं नेत्रत्रयाय वौषट्। हः अस्त्राय फट् इतिन्यस्य। पिंगलावद्ध्यात्वा जपेत्। पुरश्चरणं षोढशलक्षजपः।

उल्कायाः (शनिमातुः)

'ऐं ह्रीं उल्कादेव्यै नमः'।८।

ऐं हीं हृदयाय नमः। ऐं हीं शिरसे स्वाहा। ऐं हीं शिखायै वषट्। ऐं हीं कवचाय हुम्। ऐं हीं नेत्रत्रयाय वौषट्। ऐं हीं अस्त्राय फट। इतिन्यस्य पिंगलावद्ध्यात्वा जपेत्। पुरश्चरणमष्टलक्षजपः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सङ्कटायाः (राहुमातुः)

'ह्रीं संकटे रोगं मे परमं नाशय नाशय' १६

हां हृदयाय नमः। हीं शिरसे स्वाहा। हू शिखायै वषट। हैं कवचाय हुम्। हौं नेत्रत्रयाय वौषट। हः अस्त्राय फट। इतिन्यस्य। पिङ्गलावद्ध्यात्वा जपेत्। अस्यपुरश्चरणंषोडशलक्षजपः।

विकटायाः (केतुमातुः)

'ॐ नमो भगवते विकटे वीरपालिके प्रसीद प्रसीद' ॥२१॥

ॐ नमः हृदयायनमः। भगवति शिरसे स्वाहा। विकटे शिखायै वषट्। वीरपालिके कवचाय हुम्। प्रसीद नेत्रत्रयाय वौषट्। प्रसीद अस्त्राय फट्। [1]इतिन्यस्य। पिङ्गलावद्ध्यात्वा जपेत्। पुरश्चरणमेक विंशतिलक्षजपः।

योगिन्यास्तु प्रसादार्थं वर्णलक्षं मनुं जपेत्। दुर्योगिन्यनुकूलार्थं जपेत्तत्संख्यकाऽयुतम्। सर्वासां

---

१ इत्थं न्यासो भवितुमर्हति स्थलान्तरे तथा दृष्टत्वात्। मूलं मार्गणीयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

योगिनीनां पूजाहोमादित्य पिङ्गलावत्कर्तव्यम् । पिङ्गलाप्रकरणे पूजाविध्युपक्रमे 'अथ पूजाविधिं वक्ष्ये सर्वासामेव तन्त्रतः ।' इति पूजाहोमादिविधिमुक्ता 'पूजाप्रकारोहोमश्च सर्वासामयमेव हि' इत्युक्तेः ॥

द्रव्यदेवता

हेमाद्रि दानदिनकरोद्योत दानमयूख दानचन्द्रिकासु तैत्तिरीये विष्णुधर्मोत्तरे पुरश्चर्याणवधृतमहाकालसंहितायाञ्च ।

छागस्य समधिः सुवर्णस्य दीपस्य जांगलस्य सर्वलोहानां	अग्नि	सिंहासनस्य पाषाणादेः ३ताम्बूलस्य	इन्द्रः
		पिष्टस्य सिन्दूरस्य	इन्द्राणी
		शरभस्य	ईशानः
मृगमदस्य सुगन्धस्य १अलङ्करणानां २मालायाः	अप्सरसः	दोलायाः यानस्य ४रथस्य शकटस्य छत्रस्य शय्यायाः	उत्तानाङ्गिराः
वितानस्य	आकाश	उपानहोः	
बभ्रोः	आदित्यः	कृष्णाजिनस्य आसनस्य	

१—गन्धर्वः रतिश्च । २—विद्याधरश्च । ३—वैश्वानरश्च । ४—प्रजापतिश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

चामरस्य	कामधेनुः	लोहस्य	भैरवः
गुडस्य	कुबेरः	पित्तलस्य	भौमः
कार्पासस्य	केतुः		
रक्तवस्त्रस्य	किन्नरः	ओदनस्य	
गन्धानाम	गन्धर्वः	गण्डकस्य	ब्रह्मा
व्याघ्रस्य		तल्पस्य	मनुः
सिंहस्य	गौरी	शर्करायाः	मित्रः
रजतस्य			
दध्नः	चन्द्रः	घृतस्य	मृत्युन्जयः
सुरायाः	डाकिनी	महिषस्य	यमः
क्षीरस्य	तारा	एकशफस्य	
पट्टवस्त्रस्य	दुर्गा	मधुनः	यक्षः
ध्वजस्य	धर्मः		
रंगस्य	नासत्यः	तैलस्य	राहुः
अश्वतरस्य		गोः	
गन्दर्भस्य		बृषभस्य	रुद्रः
उष्ट्रस्य	निर्ऋतिः	२अनुक्तस्य	
५ मांसस्य			
हलस्य		पुष्पस्य	लक्ष्मीः
उशीरस्य	पर्जन्यः	धूपस्य	
तिलानाम्	पूषा	द्रुमाणाम्	
मेषस्य	वरुण	लतानम्	
		शाकानाम्	वनस्पतिः
पुरुषस्य		फलानाम्	
कन्यायाः		हरितकरय	
दास्याः		पुष्पाणाम्	
दासस्याः			
गजस्य		३ अश्वस्य	
२ धान्यजातानां	प्रजापतिः	४ मेषस्य	
पक्कन्नस्य		जलाशयस्य	
मत्स्यस्स		वारिधान्याः	वरुणः
मजस्य		कमण्डलोः	
		कुम्भस्य	

१—विश्वस्यादेवा च (धानस्य) २—विष्णुश्च। ३—यमश्च। ४-पूषा-श्च। ५--प्रजापतिश्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

करकस्य प्रवालस्य मुक्तायाः गोधायाः ग्राहस्य प्रपायाः जलस्य	वरुणः
पक्षिणां आरण्यानाम् पशूनाम् मृगभेदानाम् सीसस्य पताकायाः व्यजनस्य	वायुः
१ अन्नस्य	प्रजापतिः
२शिल्पभाण्डस्य पात्राणाम्	विश्वकर्मा
भूमेः वराहस्य नैवेद्यस्य	विष्णुः
शस्त्रस्य वर्मण ध्वजस्य ३शूरोपरणकस्य नृपोपरणस्य	शक्रः
३अभयस्य	शिवः
रत्नानाम् लवणस्य ४जलस्य	समुद्रः
गृहस्य	सर्वदेवता
५विद्यया: ५विद्योपकरणस्य पुस्तकानाम्	सरस्वती
मधुपर्कस्य	स्मरः
कच्छपस्य	साद्धयः
ताम्रस्य	सूर्यः
६वाससा रसानाम् पादुकयोः	सोमः
हस्तिनः	हिमवान्

प्रतिग्रहस्थानानि

दानचन्द्रिकायां हेमाद्रौ गृह्यपरिशिष्टे हेमाद्रौ-दानखण्डे, दानदिनकरोद्योते, दानमयूखे, विष्णुधर्मोत्तरेण ।

१-वाक्च । २—भाण्डं उपकरणम् ३—सर्व देवताच । ४-वरुणश्च । ४-ब्रह्माच । ६-बृहस्पतिश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

गाम्	पुच्छे	उपानहौ,	
गजम् कर्णे, वा	करेआरुह्यवा	पात्रं, बस्त्रम्	प्रगृह्य
१दासम्,		दत्तक प्रतिग्रहे	उत्संगमारोप्य
दासीम्	मूर्द्धिन,	रथम्	युगाधारकाष्ठे
अजाम्			
अश्वतरम्		कन्याम्	करे
गर्दभम्	पृष्ठे		
अश्वम्	कर्णे,सटायावा,	उक्तभिन्ना	
अन्नम्	स्पृष्ट्वा	न्पशून्	पुच्छे
		सश्रृंगाने	
शय्याम्		कशफान्	श्रृंगे
आसनम्	संस्पृश्य	यानानि	अधिरुह्य
क्षेत्रम्			
२वृहम्			
		राशीकृता,	
भूमिम्	प्रदक्षिणी कृत्य	न्धान्यादीन्	मुष्टिमादाय
	मृदमादाय वा,	रत्नानि	आदाय
सुवर्णम्	आदाय	वस्त्राणि	दशान्तमादाय
उष्ट्रम्	ककुदि,		परिधाय वा,
	अधिरुह्य वा	उपानहौ	
		मञ्चं	आरुह्य
मृगान्		पादुके	
महिषान्	कर्णे		
गोधाम्		वर्म	
पक्षिणः	पक्षे	ध्वजम्	संस्पृश्य
छत्रम्	दण्डें धृत्वा	उत्सर्गार्थं	
वृक्षम्	मूले करन्यासेन	वापीतडागं	जलेऽवतीर्य
फलम्	गृहीत्वा	आयुधानि	आदाय
दण्डम्	धृत्वा	अलंकरणानि	परिधाय

१-तयोर्हृदि करं विन्यस्य वा.

२-प्रविश्वा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मृद्भूमेः श्रवणंत्वजैकशफयोः शृंगं तथा शृंगिणां हस्तो वारणकन्ययोरथकचोदासस्य दास्या अपि। पुच्छं गोपशुपक्षिणां विटपिनो मूलं प्रविश्याऽऽलयं ग्राह्येषातु रथस्य तीरगमनैर्वाप्यादिकानांमतम्। खट्वामञ्चकपादुकादिवचनादारुह्य संस्पृश्य वा शय्यामासनमम्बरस्य च दशाः पुत्रस्तथांगीकृतः। स्पृष्ट्वा बर्मसचामरध्वजमथान्येषांलघूनां जनो विद्वान्धारणमाचरेत्करतले स्थूलन्तु वस्तु स्पृशेत्।

प्रतीग्रहीतोक्तं स्थानं प्रतिगृह्य स्वीकुर्यात्। दातापि सौकर्याय यथासम्भवं तत्रैव स्पृष्ट्वा दद्यादिति प्रतिभाति।

प्रतिग्रहप्रकारः

प्रतिग्रहप्रकारो दानदिनकरोद्योते। दात्रा 'सम्प्रददे तत्सन्नमम' इत्युक्ते प्रतिग्रहीता ऽऽग्नेयेन तीर्थेन 'रुद्राय गामोप्रतिगृह्णामि स्वस्ति' इति ब्राह्मणे दातरि उच्चैः पटन्, क्षात्रिये दातरि 'रुद्राय गां प्रतिगृह्णामि' इतिनिरोङ्कारं मध्यमस्वरेण पठन्। वैश्येदातरि उपांशु पठन्, शूद्रे दातरि मनसा पठन् सकुशोदकंपुच्छं प्रतिगृह्णीयात्। भूम्यादिषु कुशोदकं प्रतिगृह्य भूमिं प्रदक्षिणीकुर्यात्, गजशिविकादि आरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

हेत्। ततः 'कोदात्कस्माअदात्कामोदात्कामायादात्। कामोदाता कामःप्रतिग्रहीता कामैतत्ते' इति कामस्तुतिं पठेत।

°प्रार्थनाश्लोकाः (द्रव्याणां)

अ

अश्वस्य। विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः। चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छमे।

आज्यस्य। कामधेनोः समुद्भूतं देवानामुत्तमं हविः। आयुर्विवर्धनं पुंसामाज्यं पातु सदैव माम्।

आसनस्य। आसनं दिव्यभोगादिनीरोगत्वप्रदं यतः। अतस्तव प्रदानेन कल्पोक्तं फलमस्तु नः।

आयुधस्य। त्वं देवानां मनुष्याणां राक्षसानामथाऽऽयुधम्। तस्मात्तवप्रदानेन शान्तिर्भवतु मे सदा।

ओदनस्य। अन्नमेवयतो लक्ष्मीरन्नमेव जनार्दनः। अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि।

अङ्गलीयकस्य। हिरण्यगर्भसम्भूतं सौवर्णंचांगुलीयकम्। धर्मप्रदं प्रयच्छामि प्रीणातु कमलापतिः।

उ

उदकुम्भस्य। वारिपूर्णो घटो यस्मादेवत्रयमयो मतः। प्रीयतां धर्मराजस्तु दानेनानेकपुण्यदः।

° हेमाद्रि दानदिनकरोद्योतादिभ्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

उपानहोः। उपानहौ प्रदास्यामि कण्टकादि निवारणे। सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छतम्।

ऊर्णापटस्य। और्ण पटमनुध्येयं स्वर्णं वीजं तव प्रभो। दत्तं गृहाण देवेश पापं संहर सत्वरम्।

क

कर्पूरस्य। कन्दर्पदर्पदं यस्मात्कर्पूरं प्राणतर्पणम्। अहर्पतिभवस्तापस्त्वद्दानादपसर्पतु।

कस्तूर्याः। समस्तेभ्योपि वस्तुभ्यः संस्तुतासि-सुराऽसुरैः। विन्यस्ताङ्गेषु कस्तूरी सुखदास्तु सदामम।

कश्मीरकम्बलाद्यूर्णाप्रावरणस्य। सर्वाऽऽधिव्याधिविध्वंसः सततं सुखमुत्तमम्। ऊर्णा प्रावरणस्याऽस्य दानाद्भवतु मे हरे।

काष्ठपादुकयोः। कण्टकोच्छिष्टपाषाणवृश्चिकादिनिवारणे। पादुके सम्प्रदास्यामि विप्र प्रीत्या प्रगृह्यताम्।

काष्ठानाम्। सोमोद्भवानि दारूणि जातवेदः प्रियाणि च। तस्मादेषां प्रदानेन श्रेयो देहि विभावसो।

कुलत्थस्य। अग्निगर्भोद्भवाः सौम्या बलारोग्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

-0. In Public Domain. Digitization by eGangotri.Funding: MI

यशःप्रदाः। कुलत्थाः सर्वपापघ्ना अतः शान्तिं प्रयच्छत।

कुङ्कुमस्य। कुंकुमं शोभनं रम्यं सर्वदा मङ्गलप्रदम्। दानेनाऽस्य महच्छौख्यं सौभाग्यं स्यात्सदा मम।

कूष्माण्डस्य। ब्रह्महत्यादिपापघ्नं ब्रह्मणानिर्मितंपुरा। कूष्माण्डं बहुवीजाढ्य मतः शान्तिं प्रयच्छमे।

कृसरान्नस्य। सर्वात्मा सर्वलोकेशः सर्वव्याषी सनातनः। नारायणः प्रसन्नः स्यात्कृसरान्नप्रदानतः।

कृष्णवस्त्रस्य। धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम्। सर्वक्लेशविनाशाय कृष्णवस्त्रं ददाम्यहम्।

ग

गुडस्य। प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा। तथा रसानांप्रवरः सदैवेक्षुरसो मतः। मम तस्मात्परां शान्तिं ददस्व गुड सर्वदा।

गोधूमानाम्। धान्यचूडामणिर्जम्बूद्वीपे गोधूमसम्भवः। गान्धर्वसौख्यधनदा अतः शान्तिं प्रयच्छत।

गोः। यज्ञसाधनभूताया विश्वस्याऽघप्रणाशिनी। विश्वरूपधरो देवः प्रीयतामनया गवा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

कपिले सर्वदेवानाम्पूजनीयासि रोहिणी । तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ।

गृहस्य । इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम् । तव विप्र प्रसादेन ममाऽस्त्वऽभिमतं फलम् ।

च

चन्दनखण्डस्य । चन्दनावासमन्दार सल्लेवृन्दार-कार्चित । चन्दन त्वत्प्रसादेन सान्द्राऽऽनन्दः सदाऽस्तु मे ।

चामरस्य । शशाङ्करसंकाश हिमडिण्डीरपाण्डुर । प्रोत्सारयाऽऽशु दुरितं चामराऽमरबल्लभः ।

छ

छत्रस्य । इहाऽमुत्राऽऽतपत्राणं कुरु केशव मे प्रभो । छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया शुभम् ।

छागस्य । यस्मात्वं छाग यज्ञानामात्मतत्वे व्यवस्थितः । यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छमे ।

ज

जलकुम्भस्य । एष धर्मघटो दत्तो ब्रह्मविष्णु-शिवात्मकः । अस्य प्रदानात्सकला मम सन्तु मनोरथाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

-0. In Public Domain. Digitization by eGangotri.Funding: MI

जलस्य । पानीयं परमं लोके प्राणिनां प्राणरक्षणम् । जलशायी जगद्योनिः प्रीयतामस्य दानुतः ।

त

तण्डुलानाम् । अन्नेन जायते विश्वं प्राणिनां प्राणरक्षणम् । तण्डुला वैश्वदेवत्याः पाकेनान्नं भवन्ति ये । पावनाः सर्वयज्ञेषु प्रशस्ता यज्ञकर्मणि । तस्मात्तण्डुलदानेन प्रीयन्तां विश्वदेवताः ।

ताम्रपात्रस्य । परापवादपैशून्यादभक्ष्यस्यच भक्षणात् । उत्पन्नं यच्च मे पापं ताम्रपात्रात्प्रणश्यतु ।

ताम्रस्य । ताम्रं पुष्टिकरं यस्मात्सर्वदोषक्षयङ्करम् । सर्वरक्षाकरं यस्मादतः शान्तिं प्रयच्छतु ।

ताम्बूलस्य । ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् । अस्य प्रदानाद्ब्रह्माद्याः श्रियं यच्छन्तु पुष्कलाम् ।

तिलपात्रस्य । देव देव जगन्नाथ वाञ्छितार्थ फलप्रद । तिलपात्रं प्रदास्यामि तवाङ्गे संस्थितेरहम् ।

तिलानाम् । तिलाः पापहरा नित्यं विष्णोर्देह समुद्भवाः । तिलदानेन सर्वं मे पापं नाशय केशव ।

तुलसीपत्रस्य । तुलसीपत्रदानाद्यदाङ्मनःकायसम्भवम् । पापं प्रशममायातु मम सन्तु मनोरथाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

तैलस्य । तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् । अमाङ्गल्यहरं पुण्यमतः शान्ति प्रयच्छमे ।

त्रिकटुनः । कटुत्रयमिदं यस्माद्रोगघ्नं सर्वदेहिनाम् । तस्मादस्य प्रदानेन प्रीतो भवतु भास्करः

द

दर्पणस्य । दर्शनेन त्वमादर्श नृणां मङ्गलदायक । सौख्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव ।

दण्डस्य । प्रददाति यथावर्णं यो दण्डं ब्रह्मचारिणे । स महापुरुषो लोके ब्रह्मवर्चसमश्नुते । दुर्बलानां समालम्बः शृङ्गिदंष्ट्रिभयाऽपहृत् खानित्रसहितसारदारुजो वक्रवृन्तवान् । विशेषेण तनोस्त्राता पिच्छिले पथि गच्छतः । दण्डस्तद्दानतो मे स्यात्प्रसन्नो भूतभावनः ।

दध्योदनस्य । चन्द्रमण्डलमध्यस्थ चन्द्राम्बुजसमप्रभम् । दध्यन्नं तस्य दानेन प्रीयतां वामनो मम ।

दध्नः । पवित्रं मंगलंचैव कुन्देन्दुधवलं दधि । सर्वमंगलदं यस्मादतः शान्तिं प्रयच्छ मे ।

दास्याः । इयंदासी मया तुभ्यं श्रीवत्सप्रतिपादिता । सदा कर्मकरी भोग्या यथेष्ट भद्रमस्तुते ।

दीपस्य । आज्यं च वर्तिसंयुक्तवन्हिना योजितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।

दूर्वायाः । यथा शाखाप्रशाखा भिर्विस्तृतासि महीतले । तथा ममापि सन्तानंदेहि त्वम जराऽमरे ।

ध

धान्यस्य । धन्यं करोति दातारमिहलोके परत्रच । तस्मात्तदीयते धान्यमतः शान्तिं प्रयच्छ मे ।

प

पायसान्नस्य । पायसं परमान्नं च सर्वदानोत्तमोत्तमम् । सर्वदैवत्योग्यञ्च श्रेयः पुष्टिं प्रयच्छतु ।

पीतवस्त्रयुग्मस्य । पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् । प्रदानात्तस्य मे विष्णुरतःशान्तिं प्रयच्छतु ।

पुष्पाणाम् । आश्रयन्ति मनो यस्मात्तस्मात्सुमनसः स्मृताः । दत्तादद्दतु मे नित्यमत्याऽऽह्लादं सतीं श्रियम् ।

पुस्तकस्य । सर्वविद्याऽऽश्रयं ज्ञानकरणं ललिताऽक्षरम् । पुस्तकं सम्प्रदास्यामि प्रीता भवतु भारती ।

फ

फलस्य । इदं फलं मया विप्र स्थापितं पुरतस्तव । तेन मे सुफलाऽवाप्तिर्भवेज्जन्मनि जन्मनि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

भ

भक्ष्याणाम्। केशव प्रीतिदा भक्ष्याः शंभुब्रह्मार्क तुष्टिदाः। पृथग्विधाऽपूपकाद्या यच्छन्तुबलमौरसम्।

भाण्डानाम्। हिरण्यादीनि भाण्डानि पात्राणि मृन्मयानिच। गृहाणेमानि चैतस्माद्भास्करः प्रीयतां मम।

भूमेः। यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम्। दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विहाः। सर्वभूताऽऽश्रया भूमिर्वराहेण समुद्धृता। अनन्तसस्यफलदा अतः शांतिं प्रयच्छ मे। सदा रोहन्ति बीजानि फालाऽऽकृष्टे महीतले। तव प्रदानात्सकला मम सन्त मनोरथाः।

म

मधुनः। यस्मात्पितृणां श्राद्धे त्वं प्रीतं मध्वऽमृतोद्भवम्। तस्मात्तव प्रदानेन रक्ष मां दुःखसागरात्।

महिषस्य। यमस्य बाहनत्वेन ख्यातस्त्वमसि कासर। वलिषु प्रथमो देव्यास्ततो मे शान्तिमावह।

महिष्याः। धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः। महिषाऽसुरस्य जननी या सास्तु बरदा मम।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

माषाणाम्। यस्मान्मधुवधे काले विष्णुदेहसमुद्भवाः। पितृप्रीतिकरा माषा अतः शान्तिं प्रयच्छत।

मुद्गानाम्। मुद्गबीजानि वैयस्मात्प्रियाणि परमेष्ठिनः। तस्मादेषां प्रदानेन प्रीतिः सिद्ध्यतु मे सदा।

मुक्तानाम्। ताम्रपर्ण्यर्णवोत्पन्ना वर्णाढ्या वर्ण कल्पिताः। मुक्ताः शुक्त्युद्भवाः सन्तु भुक्तिमुक्तिप्रदा मम।

मृत्युमहिष्याः। महिषां वत्ससंयुक्तां सुशीलाञ्च पयस्विनीम्। रत्नवस्त्रेणपुष्पेण दत्वा मृत्युञ्जयेन्नरः।

मेषस्य। यस्मात्वं मेष यज्ञानामाहुतित्वे व्यवस्थितः। यानं विभावसोर्नित्यमतःशान्तिं प्रयच्छ मे।

य

यज्ञोपवीतस्य। ब्रह्मसूत्रं महादिव्यं मया यत्नेन निर्मितम्। ब्राह्मं जन्मास्तु मे देव ब्रह्मसूत्रसमर्पणात्।

यवानाम्। धान्यराजाश्च माङ्गल्या द्विजप्रीतिकरा यवाः। तस्मादस्य प्रदानेन ममास्त्वऽविकलं फलम्।

र

रजतस्य। शिवनेत्रसमुद्भूतं रजतं पितृवल्ल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

भम् । तस्मादस्यप्रदानेन रुद्रः संप्रीयतां मम ।

रथस्य । रथाय रथनाथाय नमस्ते विश्वकर्मणे । विश्वभूताय नाथाय अरुणाय नमोनमः ।

रत्नस्य । यथा सर्वेषु रत्नेषु सर्वेदेवा व्यवस्थिताः । तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ।

रक्तवस्त्रस्य । रक्तवस्त्रयुगं यस्मादादित्यस्यप्रियं सदा । प्रदानादस्य मे सूर्योप्रीतः शान्तिं प्रयच्छमे ।

रक्तवृषस्य । धर्मस्त्वंवृषरूपेण जगदाऽऽनन्दकारकः । अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ।

ल

लवणस्य । रसानामग्रगंश्रेष्ठं लवणं वलवर्धनम् । ब्रह्मणानिर्मितं यस्मादतःशान्तिं प्रयऽछ मे ।

लोहपात्रस्य । पापानि यान्यनेकानि कामाकाम कृतानि च । लोहपात्रप्रदानेन तानि नश्यन्तु मे सदा ।

लोहस्य । यस्मादायसकर्माणि त्वदधीनानि सर्वदा । लाङ्गलच्छुरिकादीनि अतः शान्तिं प्रयऽछ मे ।

व

वस्त्रस्य । शरण्यं सर्वलोकानां लज्जाया रक्षणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

परम् । सुवेषधारिता यस्माद्वासः शान्तिं प्रयच्छमे ।

विष्णुमूर्तेः । त्वया जगद्व्याप्तमिदं समस्तं त्वां विष्णुरित्येववदन्ति सन्तः । त्वत्स्थानि सर्वाणि वदन्ति देव त्वया धृतं विश्वमनन्तमूर्ते । तत्त्वत्प्रसादादनघो भवामि यथा जगत्कारणकारणेश । तथा कुरुत्वं शरणं प्रपन्ने मयि प्रभो देव वरप्रसादम् ।

वृषभस्य । धर्मस्त्वं वृषरूपेण जगदानन्दकामुकः । अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ।

वंशपात्रस्य । वंशपात्रामदं पुण्यं वंशजातसमुद्भवम् । दानानामुत्तमंदानमतः शान्तिं प्रयच्छ मे ।

व्यजनस्य । देवदेवजगन्नाथ व्यजनं शौत्यकारकम् । पितृणांवल्लभं नित्यमतः शान्तिं प्रयच्छ मे ।

श

शय्यायाः । यथा नकृष्णशयनं शून्यं सागरजातया । शय्याममाप्यशून्यास्तु तथा जन्मनि जन्मनि ।

शङ्खस्य । पुण्यस्त्वं शङ्खपुण्यानां मङ्गलानां च मङ्गलम् । विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे ।

शर्करायाः । अमृतस्य कुलोत्पन्न इक्षुस्तद्रस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सर्करा । सूर्यप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे ।

शालग्रामस्य । शालग्रामशिलाचक्रे भुवनानि चतुर्दश । तस्मादस्य प्रदानेन प्रभो शान्तिं प्रयच्छ मे ।

शाकानाम् । सर्वदेवप्रियं यस्माच्छाकं तृप्तिकरं प्रियम् । ददामि सर्वमंगल्यमतःशान्तिं प्रयच्छ मे ।

शिवमूर्तेः । त्वया सुराणाममृतं विहाय हालाहलं संहृतमेव यस्मात् । तथाऽसुराणां त्रिपुरञ्च दग्धमेकेषुणा लोकहितार्थमीश । त्वद्रूपदानादहमप्यशेषैर्दोषैर्विमुक्तः शरणं प्रपद्ये । तथा कुरु त्वंशरणं प्रपन्ने मयि प्रभो देव वरप्रसादम् ।

शिविकायाः । देव देव जगन्नाथ विश्वात्मन्दत्तयाऽनया । प्रभो शिविकया देव प्रीतो भव जनार्दन ।

श्वेताऽश्वस्य । यस्माद्विष्णुस्वरूपेण यस्मादमृत सम्भवः । चन्द्राऽर्कवाहनं नित्यमतः शांतिं प्रयच्छ मे ।

श्वेतवस्त्रस्य । शरण्यं सर्वलोकानां लज्जायारक्षणं परम् । सुवेषधारिता यस्माद्वासः शान्तिं प्रयच्छ मे ।

स

सजलकमण्डलोः । कमण्डलुर्जलैः पूर्णः स्वर्णगर्भः सुलक्षणः । अर्पितस्ते महासेन प्रसन्नस्तेन मे भव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सहिरण्यतिलानाम् । तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः । विष्णुप्रीतिकरा नित्यमतः शान्तिं प्रयच्छत ।

सक्तूनाम् । प्राजापत्या यतः प्रोक्ताः सक्तवो यज्ञकर्मणि । तस्मात्सक्तून्प्रयच्छामि प्रीयतां मे प्रजापतिः ।

सिन्दूरस्य । सिन्दूराऽगरुसम्भूतः गौरीसीमन्तसंगतः । गजास्येन धृतं मूर्ध्नि दानान्मे स्यादभीप्सितम् ।

सुवर्णस्य । हिरण्यगर्भगर्भस्थं हेमवीजं विभावसोः । अनन्तपुण्यफलद मतः शातिं प्रयच्छ मे ।

सौभाग्यद्रव्यस्य । कंचुकी वस्त्रयुग्मैश्च तथा कर्णावतंसकैः । कंठसूत्रैश्च भूषाभिः प्रीयतां गिरिनन्दनी ।

सुवर्णकमलस्य । त्वदुद्भवोजगत्स्रष्टर्वेधसो हेमपङ्कज । पद्मावास हरेर्नाभिजात मां पाहि सर्वदा ।

स्वर्णनागस्य । विद्युन्तुदनमस्तुभ्यं सिंहिकानन्दनाव्यय । दानेनाऽनेन नागस्य रक्ष मां वेधजात्ययात् ।

ह

हरिद्रायाः । लक्ष्मीप्रियाच लक्ष्मीदा लक्ष्म्याश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

वसनाश्रया। सौभाग्य कृद्वरस्त्रीणां दरिद्रा श्रीप्रदाऽस्तु मे। गौर्याः प्रीतिकरी नित्यं हरिद्रा सर्वकामदा। तस्मादस्याः प्रदानेन सौभाग्यं जन्मजन्मनि।

द्रव्यादिमानम्

सुवर्णस्य।

हेमाद्रौ याज्ञवल्क्यः 'ते त्रयः। कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितमिति। ते मध्यमा यवाः'।

३ यवाः	१ कृष्णलः
५ कृष्णलाः	१ माषः
१६ माषाः	१ सुवर्णः
४ वा ५ सुवार्णाः	१ पलम्।

रजतस्य।

तत्रैव, 'द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते। शतमानन्तदशभिर्धरणैः पलमेवत। निष्कं सुवर्णाश्चत्वारः।'

३ यवाः	१ कृष्णलः
२ कृष्णले	१ माषः
१६ माषाः	१ धरणम्
१० धरणानि	१ शतमानं (पलम्)
४ सुवर्णाः (तोला)	१ निस्कम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

ताम्रस्य ।

तत्रैव, कार्षिकस्ताम्रिकः पण इति पलस्य चतुर्थांशः कर्ष इति लोकप्रसिद्धः । कर्षेणोन्मितः कार्षिकः ताम्रस्य विकारस्ताम्रिकः । कर्षसंमितस्ताम्रविकारः पणसंज्ञो भवति । कार्षापणसंज्ञश्चेति मिताक्षरायाम् । पलचतुर्थांऽशमादाय संज्ञाभिधानेन ताम्रस्य सुवर्णादिव देवव्यवहार इति ज्ञायते । एवंच ताम्रस्य पलादिग्रहणे सुवर्णादिव देवमानं ग्राह्यं तथैव कांस्यरीतिका दीनामपि ग्राह्यम् । कांस्यरीतिकादीनामपि लोकव्यवहाराङ्गभूतानामेवमेवोन्मानं द्रष्टव्यं इतिमिताक्षरोक्तेः ।

धान्यानाम् ।

हेमाद्रौ विष्णुधर्मोत्तरे । पलंचकुडवः प्रस्थ आढको द्रोण एवच । धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः । द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते । कुम्भैस्तु दशभिर्वाधी धान्यसंख्या प्रकीर्तिता इति ।

४ पलानि	१ कुडवः
४ कुडवाः	१ प्रस्थः
४ प्रस्थाः	१ आढकः
४ आढकाः	१ द्रोणः
१६ द्रोणाः	१ खारी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

२० खार्यः	१ कुम्भः
१० कुम्भाः	१ बाघी

द्रवद्रव्याणाम्

तत्रैव स्कान्दे। पलद्वयेन प्रसृतं द्विगुणं कुडवं मतम्। चतुर्भिः कुडवैः प्रस्थ आढकस्तैश्चतुर्गुणैः। चतुर्गुणो भवेद्रोण इत्येवं द्रवमानकम्।

२ पले	१ प्रसृतम्
२ प्रसृते	१ कुडवम्
४ कुडवानि	१ प्रस्थः
४ प्रस्थाः	१ आढकः
४ आढकाः	१ द्रोणः।

भूमेः

तत्रैव बृहस्पतिः दशहस्तेन दण्डेन त्रिंशद्दण्डा निवर्तनम्। दश तान्येव गोचर्म।

वशिष्ठः। दशहस्तेन वंशेन दशवंशान्समन्ततः। पञ्चाभ्यधिकान्दद्यादेतद् गोचर्म चोच्यते।

विष्णुधर्मोत्तरे। यदुत्पन्नमथाऽश्नाति नरः सम्वत्सरं द्विजः। एकं गोचर्ममात्रन्तुभुव प्रोक्तं विचक्षणैः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

मत्स्यपुराणे । दण्डेन सप्त हस्तेन त्रिंशद्दण्डा निवर्तनम् । त्रिभागहीनं गोचर्ममानमाह प्रजापतिः ।

वृद्धवशिष्ठः । गवां शतं वृषश्चैको यत्र तिष्ठेदयन्त्रितः । एतद्गोचर्म मात्रन्तु प्राहुर्वेदविदोजनाः इति ।

पञ्चगव्य रचना प्रयोगः

अरोगाणां गवां गोमूत्र गोमयक्षीरदधिसर्पींषि कुशसंयुतमुदकंच पृथक् पृथक् सम्पाद्य अंगुष्ठार्द्धपरिमितंगोमयं द्विगुण गोमूत्रं (१) गायत्र्या प्रणवेन वा ताम्रमयभिन्ने पात्रे निक्षिप्यः अंगुष्ठार्द्धपरिमितंगोमयं (२) गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् । इति मन्त्रेण प्रणवेन वा निक्षिप्यः गोमयाऽष्टगुणंक्षीरं (३) आप्यायस्वसमेतुते विश्वतः सोमवृष्मयम् । भवावाजस्यसंगथे । इति प्रणवेन वा निक्षिप्यः गोमयपञ्चगुणं दधि (४) दधिक्राव्णोअकारिषं जिष्णोरश्वस्यवाजिनः सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् इतिप्रणवेन वा निक्षिप्यः गोमयचतुर्गुणं घृतं (५) तेजोसिशुक्रमस्यमृतमसिधामनामासि । प्रियन्देवानामनाघृष्टन्देवयजनमसि इति प्रणवेन वा निक्षिप्यः चतुर्मांष कुशोदकं देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्या पूष्णोहस्ताभ्याम् । इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मन्त्रोच्चारणान्ते अभिषिञ्चामि इति स्मृत्वा प्रणवेन वा निक्षिप्यः प्रणवमुच्चार्य हस्तेन समालोडयेत्। एषा च मन्त्रसहितेतिकर्तव्यताय यत्र पञ्चगव्य विनियोगस्तत्रतत्रज्ञेयाः। होमस्तु नपञ्चगव्याङ्गं किन्तु ब्रह्मकूर्चस्य। प्रोक्षणाय पञ्चगव्यकरणे इत्थं पञ्चगव्यं। प्रसाध्य तत्तद्विध्युक्तमन्त्रेण प्रोक्षेत्। पानायकरणेतूक्तरीत्या प्रसाध्य। प्रणवेनाऽभिमन्त्र्यप्रणवेनोद्धृत्य प्रणवेन [1]ब्रह्मतीर्थेनपिवेत्।

पञ्चगव्यवस्तूनां सर्वेषामलाभे समन्त्रं रचना कारिणश्चाऽसन्निधाने गोमूत्रे घृतमात्रां कुशोदकं च प्रक्षिप्य गायत्र्याऽभिमन्त्र्य प्रणवेनाऽऽदाय तेनैव पिवन्ति।

आशौचिनः सन्ध्यादि

शावाऽऽशौचे जननाऽऽशौचे च सन्ध्यावन्दनं नत्यजेत्। इयांस्तु विशेषः मन्त्रान्मनसा स्मृत्वा कर्म कुर्यात्। प्राणायामन्त्वऽमन्त्रकम्। गायत्रीं सम्यगुच्चार्य सूर्यायाऽर्घ्यं निवेदयेत्। उपस्थान तु नभवति। प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यात्। तर्पण देवपूजा पञ्चमहायज्ञनित्यश्राद्धगोग्रासादिकंतु नभवति। स्मार्तकर्मणां सर्वेषामाशौचानषेधात्।

---

१ अंगुष्ठस्यमूल' ब्रह्मतीर्थम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

आशौचे त्यक्तानां कर्मणामुपादानंचैकादशाद्याऽऽशौचाऽपगमदिनादारभ्य कुर्यात् ।

[1]आमिषाणि

अ	**च**
अलाबु	चणक
आढकी	चर्मस्थंजलम्
क	**ज**
कलिङ्गम्	जम्बीरम्
करीरः	ज्योत्स्निका
कुलत्थम्	**त**
कूष्माण्डः	ताम्बूलम्
केमुकः	तालफलम्
कोद्रवाः	ताम्रपात्रस्थंगव्यं
क्षार	तैलम्
ग	**द**
गुडम्	द्विजक्रीतारसाः
गोछागमहिषीतद्दुग्धम्	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

न

निष्पावाः

प

पटोलम्
पल्वलस्थंजलम्
पर्युषितमन्नम्
पालङ्की

ब

बिभीतक

भ

भूमिजंलवणम्

म

मधु
माष
मांस

र

रसान्तरा पादितम्
रक्तमूलकम्
राजमाषाः

ल

लवणशाकम्

व

वार्ताकः
वन्ताकः

श

शुक्त्यादि प्राण्यङ्गं
चूर्णम्

स

सन्धितम्
सितमुद्गः
स्विन्नंधान्यम्

ह

हिंगु

---

१ निर्णयसिन्धौ तृथ्वीचन्द्रोदये अग्निपुराणे पुरश्चर्यार्णवेस्मृतौ च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

[1]हविष्यानि

पुरुश्चर्यार्णवे, स्मृतौ, अगस्त्यसंहितायां, निर्णयसिन्धौ, व्रतराजेच।

अ	क
अजा गोमहिषी	कलायाः
क्षीरादि	कङ्गवः
असृतफलम्	कन्दः
अनुद्धृतनवनीतं	कदलीफलम्
तक्रम्	कालशाकम्
आम्राणि	ग
आर्द्रकम्	गोधूमाः
इ	च
इक्षः	चिंचा
इक्षुविकाराः	ज
(गुडभिन्नाः)	जम्बू

१ अत्राऽलिखितान्यपि वस्त्वन्तराणि हविष्याण्याऽऽमिषाणिच प्रचलितानि स्वदेशसम्प्रदायाऽऽचाराऽनुसारेण उपयोक्तव्यानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

जीरकम्	पिप्पली
त	पिण्डालुकः
तिलाः	म
द	मिष्टिफलम्
दाडिमी	मुद्गाः
ध	मृद्वीकाः
धात्रीफलम्	र
न	रक्तालुकम्
[1]नारिकेलम	य
प	यवाः
पनसफलम्	यावकः

---

१ नारिकेलफलं हविष्यत्वेन ग्राह्यम्। निर्णयसिन्धौ। रघुनन्दनीयै-कादशीतत्वेच अगस्तिसंहितायां हविष्य गणनायां 'नारिकेलफलंचैब कदलीं लवलीं तथा' इत्युक्तेः। तस्याऽऽभिषत्वभ्रान्तिस्तु निर्णयसिन्धौ दीपिकोक्त-त्वेन लिखिते 'कूष्माण्डंवृहतिफला' निति श्लोके, पद्मपुराणीय कार्तिक-माहात्म्ये सप्तमेऽध्याये 'कूष्माण्डंबृहतीफल' मित्यादिश्लोकेच नारिकेल-स्योल्लेखदर्शनात्। वस्तुतस्तूभयत्र प्रतिपदादितिथिषु वर्जनीयफलगणनार्थं कूष्माण्डादिगणनायां तस्याभिधानात्। तन्निषेधपरिपालनश्रद्धालवोऽष्टम्यां नारिकेलं वर्जयेयुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

ल	श्यामाकः
लवली	श्वेतमूलकम्
व	स
वास्तुक	सूरणः
व्रीहयः	ह
श	हरीतकी
शुण्ठी	हिलमोचिका

❀

यज्ञोपवीतरचनाप्रयोगः

अविधिनोत्पादितस्य ब्रह्मसूत्रस्य 'विधानेन विना जातंसूत्र गोकण्ठरज्जुवत्' इति भरद्वाजेन । तन्निर्माणप्रकाराऽनभिज्ञस्य ब्राह्मणस्य 'ब्राह्मणो यो नजानाति उपवीतस्य संस्थितिम् । मूढात्मा वहते भारं रज्जुं गौरिव सर्वदा' इति व्यासेन च गायत्रीरहस्येऽवगानात् । स्थितिं मर्यादामुपवीत निर्माणप्रकारमिति यावत् । तादृशब्राह्मणकर्तृक वेदोक्तयज्ञादिनैष्फल्यस्य 'य एनं नाभिजानाति ब्रह्मसूत्रसमुद्भवम् । वेदोक्तं निष्फलं तस्य यज्ञदान जपादिकम्' इति तत्रैव पितामहेना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

ऽभिधानाच्च ब्राह्मणस्य यज्ञोपवीतरचनाप्रकारज्ञानमावश्यकम्। तत्र।

तन्तुनिर्माणप्रकारो यथा।

प्रणवेन कार्पासमादाय व्याहृत्या बीजान्यऽपाकृत्य गायत्र्या वर्तिकां कृत्वा वेदपाठेन तन्तून्बिदध्यात् इति।

त्रिवृत्करणादिप्रकारः।

ग्रामान्निष्क्रम्य देवागारादिशुचिदेशस्थोऽकृत भोजनः शुचिर्ब्राह्मण उक्तप्रकारेण निर्मितं तदसम्भवेऽन्यनिर्मितमपि सूत्रमुपादाय तन्तुद्वयप्रान्तं संयोज्य संहतानां दक्षिणहस्तस्य तर्जनीमध्यमाऽनामाकनिष्ठानाम्मूले ॐ केशवाय नमः १ ॐ नारायणाय नमः २ ॐमाधवाय ननः ३ ॐगोविन्दाय नमः ४ ॐविष्णवेनमः ५ ॐ मधुसूदनायनमः ६ ॐ त्रिविक्रमायनमः ७ ॐ वामनाय नमः ८ ॐश्रीधराय नमः ९ ॐ हृषीकेशाय नमः १० ॐपद्मनाभाय नमः ११ ॐदामोदरायनमः १२ ॐ संकर्षणाय नमः १३ ॐवासुदेवाय नमः १४ ॐप्रद्युम्नाय नमः १५ ॐअनिरुद्राय नमः १६ ॐ पुरुषोत्तमाय नमः १७ ॐअधोक्षजाय नमः १८ नृसिंहाय नमः १९ ॐअच्युतायनमः २० ॐजनार्दनाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

नमः २१ ॐउपेन्द्राय नमः २२ ॐहरयेनमः २३ ॐ कृष्णाय नमः २४ इति चतुर्विंशत्या मन्त्रैश्चतुरावृत्तैः षण्णतिवारानावेष्ट्य तन्तु द्वयमध्ये एकं छित्वा परित्यज्याऽपरं वेष्टितेन सह संयोज्य अङ्गुलिमूलात्प्रमोचयंस्त्रिगुणं विधायाऽबलिङ्गैरापोहिष्ठेत्यादिभिस्त्रिभिः प्रक्षाल्योर्द्ध्ववृत्तं कृत्वा त्रिगुणीकृत्वाऽधोवृत्तं कृत्वा गायत्र्या दृढंकुर्यात् अङ्गुलीमूलवेष्टनादावेके गुणेच्छिन्ने पुनः संयोज्याऽऽवेष्टयेत्। द्वयोश्छिन्नयोस्तु यावच्छेदं परित्यजेदिति सम्प्रदायः। ततः प्राणानां ग्रन्थिरसि रुद्रोमाविशान्तकः तेनान्नेनाप्यायस्व । नमोरुद्राय विष्णवे मृत्योर्मे पाहि इति शिष्टाचार प्राप्तेन मन्त्रेण यथासम्प्रदायं ब्रह्मग्रन्थियुतं विधाय हरिब्रह्मेश्वरान्नमेत्।

यज्ञोपवीतप्रतिष्ठाप्रयोगः

श्रावण्यां पूर्णिमायामुपाकर्मदिने देशकालौ संकीर्त्य यज्ञोपवीतप्रतिष्ठां करिष्ये इति सङ्कल्प्य। यथाविधि कलशं स्थापयित्वा तत्र कलशे प्रतिस्थापनीयान्युपवीतानि निधाय ॐप्रथमतन्तुदेवतायै ओङ्कारायनमः १ ॐ द्वितीयतन्तुदेवतायै अग्नये नमः २ ॐतृतीयतन्तुदेवतायैनागाय नमः ३ ॐ चतुर्थतंतुदेवतायैसोमाय नमः ४ ॐ पञ्चमतन्तुदेवतायैपितृभ्योनमः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ षष्ठतंतुदेवतायै प्रजापतयेनमः ६ ॐ सप्तम तंतु-देवतायै वायवेनमः ७ ॐ अष्टमतंतुदेवतायै सूर्याय नमः ॐ नवमतंतुदेवतायै सर्वाभ्योदेवताभ्यो नमः ९ ॐ प्रथमग्रन्थिदेवतायै पितामहाय नमः १ ॐ द्वितीयग्रन्थि-देवतायै हरयेनमः २ ॐ तृतीयग्रन्थिदेवतायैईश्वरा-यनमः ३ ॐ चतुर्थग्रंथिदेवतायै परब्रह्मणेनमः ४ इति तन्तुदेवताग्रन्थिदेवताश्च सम्पूज्य ॐ आकृ-ष्णेन रजसावर्तमानो निवेशयन्नमृतंमर्त्यंच। हिरण्य-येन सविता रथेनादेवो यातिभुवनानि पश्यन् ४३ प्रवा-वृजे सुप्रयावर्हि रेषामाविश्यतीव व्वीरिटऽइयाते। विशामक्तोरूषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वात् ४४ इन्द्रवायूवृहस्पतिम्मित्राग्नी पूषणं भगम्। आदित्यान्मारूतङ्गणम् ४५ वरुणःप्रविताभुवन्मित्रो-विश्वाभिरूतिभिः करतान्नःसुगधसः ४६।३० इति सवित्रेदर्शयित्वा पुनः कलशे निधाय गायत्र्याऽभि-मन्त्रयेत्।

यज्ञोपवीतधारणप्रयोगः।

यज्ञोपवीतपरिवर्तननिमित्तवान्द्विजः शुद्धः शुद्धऽऽ-सनस्थितः आचम्य देशकालकीर्तनान्ते श्रौतस्मार्त-कर्माऽनुष्ठानसिद्धयर्थमुपवीतधारणमहङ्करिष्ये इति सङ्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: Mi

ल्य। एकमुपवीतंगायत्र्या दशकृत्वोभिमन्त्रिताभिरद्भिः सिक्त्वा, यज्ञोपवीतमितिमन्त्रस्य परमेष्ठीऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्तादेवता श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थमुपवीतधारणे विनियोगः। ॐ यज्ञोपवीतं परमंपवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः यज्ञोपवीतमसि यज्ञस्यत्वोपवीतेनोपनह्यामि' इति मन्त्रं पठित्वा दक्षिणं बाहुमुद्धृत्य वामस्कन्धे निवेशयेत्। एवमेवाऽपरं धारयेत्। तृतीयादिधारणेपि सङ्कल्पाद्यावर्त्य धारयित्वा पुरातनं निष्काश्य प्रणवव्याहृतिभिरप्सु प्रास्येत्। जीर्णयज्ञोपवीतानि शिरोमार्गेण संत्यजेदिति संग्रहोक्ते मु. श्रावणी प्रयोगे।

इदं यज्ञोपवीतधारणं नित्यम् 'सदोपवीतिना भाव्यं सदाबद्धशिखेन च। विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्, इति संस्कारमयूखधृत भृगुस्मृतेः।

उपवीतपरिवृत्तिनिमित्तानि–उपवीतस्य गुणच्छेदः, दाहः, शरीराद्धन्शः, कर्णधारणं विना मलमूत्रोत्सर्गः मासचतुष्टयलङ्घनं, जननाशौचं शावाऽऽशौचं; चितिकाष्ठस्य, चितिधूमस्य, चण्डालस्य, शवस्य, सूतिकायाः रजस्वलायाश्च स्पर्शः एषु अनुपदोक्तेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

षट्सु स्नानमधिकम् । श्राद्धकर्तृत्वं उपाकर्मदिनं । अन्यच्च धर्मशास्त्रोक्तमित्यादीनि ।

यज्ञोपवीतधारणेविशेषः ।

धृतस्य यज्ञोपवीतस्य नाशे ।

धृतयज्ञोपवीतस्य शरीराऽनवस्थितिज्ञाने सति अमन्त्रकमन्यद्धृत्वा मनोजूतिः १ अग्नेव्रतपते व्रतञ्चरिष्यामि तच्छकेयंतन्मेराध्यताम् २ वायो०-ताम् ३ आदित्यं व्र०-ताम् ४ इति मंत्रचतुष्टयेन चतस्रआज्याहुतीर्हुत्वा विधिवन्नूतनं धारयेत् ।

कोपादिनोपवीतत्यागेऽपि अमन्त्रकमन्यद्धृत्वा प्रायश्चित्तान्ते सविधि नवं धारयेत् ।

अधिकारिभेदेन धारणीययज्ञोपवीतसंख्यादि ।

ब्रह्मचारिण एक उपवीतं । स्नातकस्य (कृतसमावर्तनस्य) द्वे । उत्तरीयाऽभावे तृतीयम् । जीवत्पितृकेणजीवज्ज्येष्ठभ्रातृकेणचोत्तरीयं तत्स्थाने तृतीयं यज्ञोपवीतं च न धार्यम् । आयुष्कामस्यत्र्यधिकानि यज्ञोपवीतानि लिखितेषुसर्वेष्वऽर्थेषु प्रमाणान्याऽऽकरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri. Funding: Mi

नवयज्ञोपवीतधारणादिनादि ।

नवीनानिच यज्ञोपवीतानि उपाकर्मदिने उपाकर्मकारिभिरक्षतधानाप्राशनोत्तरं वेदारम्भात्पूर्वं धारणीयानि उपाकर्माऽनाचरद्भिरपि तस्मिन्नेव दिने धारणीयानि, 'वेदारम्भणतः पूर्वं शक्तुप्रशानतः परम् । नव यज्ञोपवीतानि दद्याद्वै धारयेत्ततः' इति श्रावण्यां पूर्णिमायामुपाकर्म प्रस्तुत्य भगवन्तभास्करे समयमयूखे काष्णाजिन्युक्तेः । सक्तुप्राशनं शाखान्तराऽभिप्रायेण कातीयानामक्षतधानाप्राशनविधानात् । अक्षतधाना अखादंतः प्राष्णायुरिति पारस्करगृह्योक्तेः । अखादन्तः दंतैरनवखण्डयन्तः [1]प्राशनान्तेप्रत्यङ्मूखेभ्य उपविष्टेभ्य ॐकारमुक्त्वात्रिश्च सावित्री मध्याया दीन्ब्रूयादिति पारस्करगृह्योक्तेः । कृत्वा यज्ञोपवीतानि नवानि वसुधाऽधिप । हुत्वाऽग्नौ गुरवे दत्वा पितृभ्योधारयेतत' इति तत्रैव गालवोक्तेश्च पितृभ्य इत्यत्रापि दत्वेत्यनुषज्यते । आयुष्कामेन चोपाकर्म दिने यज्ञोपवीतदानं कर्तव्यम् । 'उपाकर्मणि विप्रेभ्यो

---

१ वेदारम्भकालप्रदर्शनार्थमाह । प्राशनान्तेप्रत्यङ्मुखेभ्य इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

दद्याद्यज्ञोपवीतकम्। आयुष्माञ्जायते तेन कर्मणा मानवो भुवि' इति तत्रैव वायवीयोक्तेः।

रक्षाबन्धनपूजा।

श्रावण्यां पूर्णिमायामुपाकर्मदिनेऽपराह्णसमये पुरोहितः निर्मलक्षौमैर्नानावर्णकार्पासैश्चित्रवस्त्रैश्चित्रतन्तुभिर्निर्मितमक्षतसिद्धार्थपोटलिकायुतं हेमविभूषितमभावे चित्रतन्तुनिर्मितं रक्षाप्रतिसरं यव दूर्वा शर्षप चन्दन गोमय दधिसहितं पात्रे निधाय पात्रं स्पृशन्। पूर्वे रक्षतु गोविन्द अग्नेय्यां धरणीधरः। याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते। केशवा वारुणीं रक्षेद्वायव्यां मधुसूदनः। उत्तरे श्रीधरो रक्षेदैशान्यान्तु गदाधरः। ऊर्द्ध गोवर्द्धनो रक्षेदधस्तात्तु महेश्वरः। एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः। यज्ञाग्रं रक्षताच्छङ्खः पृष्ठे च पद्ममुत्तमम्। वामपार्श्वे गदा रक्षेद्दक्षिणे च सुदर्शनः। उपेन्द्रः पातु ब्रह्माण माचार्यं पातु वामनः। ऋग्वेद मच्युतो रक्षेद्यजुर्वेदम थोत्तमः। कृष्णो रक्षतु सोमानमथर्वाणं च माधवः।

उपविष्टाश्च ये विप्रास्तांश्च रुद्रो भिरक्षतु। यज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मानं सपत्नीकं पुण्डरीकाक्षो ऽभिरक्षतु । रक्षाहीनं तु यत्स्थानं तत्स्थानं रक्षताद्धरिः । ततः पूजनम् ॐ नतद्रक्षा ꣳसि नपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳ ह्येतत् । योविभर्ति दाक्षायण ꣳ हिरण्य ꣳ सदेवेषुकृणुते दीर्घमायुः समनुष्येषु कृणुतेदीर्घमायुः । यदावध्नन्दाक्षायणहिरण्य ꣳ शतानीकायसुमनस्य मानाः । तन्मआवध्नामिशतशारदायायुष्माञ्जरंदष्टिर्यथासम् ३३।५२ रक्षोहणं बलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यम्मेनिष्ट्योयममात्योनिचखाने दमहन्तंवलगमुत्किरामि यम्मेसमानोयमसमानो निचखानेदमहन्तंवलगमुत्किरामि यम्मेसबन्धुर्यमबन्धुर्निचखानेदमहन्तमहन्तं बलगमुत्किरामि यम्मेसजाजातो यमसजातोनिचखानोत्कृत्याङ्किरामि । स्वराडसिसपत्नहा सत्रराडस्यभिमातिहा जनराडसिरक्षोहा सर्वराडस्यमित्रहा । रक्षोहणोवोवलगहनः प्रोक्षामि वैष्णवान् रक्षोहणोवोवलगहनो वनयामि वष्णवान् रक्षोहणोवोवलगहनो वस्तृणामिवैष्णवान् रक्षोहणोवांवलगहना उपदधामिवैष्णवी रक्षोहणोवां बलगहनौ पर्यूहामिवैष्णवी वैष्णवमसिवैष्णवास्थ ५।२५ त्वंयविष्ठदाशुषो नॄंः पाहि शृणुधीगिरः रक्षातोकमुतत्मना १३।५२ सप्तऋषयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

प्रतिहिताशरीरे सप्तरक्षन्ति सदमप्रमादम् । सप्तापः स्वपतोलोकमीयुस्तत्रजागृतोअस्वप्नजौ सत्रसदौचदेवौ इतिसम्पूज्य ।

उपलिप्ते गृहमध्ये पिष्टपिष्टातकादिनाविहितचतुष्के आसनं विन्यस्य तत्रोपविष्टस्य यजमानस्य सपरिवारस्य दक्षिणकरे [1]'येन वद्धोबलीराजा दानवेन्द्रो महाबलः । तेन [2]त्वामपि वध्नामि रक्षे माचल माचल, इतिमन्त्रेण रक्षाप्रतिसरं भद्ररहिते समये वध्नीयात् । नृपतिस्तु भद्रां विहायैव वध्नीयात् । निर्णयामृते स्मृतिसंग्रहे 'भद्रायां द्वे नकर्तव्ये श्रावणी फाल्गुनी तथा । श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनि इति । अत्र श्रावणी श्रावण्यां क्रियमाणं रक्षावन्धनादि कर्म गृह्यते' इत्युक्तेः ।

यात्रासमयकृत्यम् ।

यात्राकर्ता त्रिदिनं क्षौरं पञ्चदिनं दुग्धं सप्तरात्रं यथाशक्तिं वा मैथुनं परिहरेत् । यात्रादिने मधु

---

१ येन रक्षाप्रतिसरेण हेतुना महावलो ·दानवेन्द्रा वलीराजा इन्द्रेण (कर्त्रा) वद्धः, तेन तादृशेन रक्षाप्रतिसरेण त्वामपि बध्नामि । हे रक्षे रक्षाप्रतिसर माचल माचल माऽपसर ।

२ निर्णयामृते निर्णयसिन्धौ च 'त्वामपि' इति पाठः । हेमाद्रौ व्रतराजेच मुद्रिते 'त्वामभि' पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

तैल गुडक्षार मांस वमनानि स्त्रीणां द्विजानाञ्चाऽ वमानं परिहरन्हविष्यभोजी अवश्यनेयवस्तुजातं-संगृह्य भारवाहकादिभ्यः समर्प्य अश्वशिविकादियानं सज्जीकृत्य वाहकसात्कृत्वा देवागारे देवतां पित्रादींश्च प्रणम्य। देवागारात् पितृगृहात् स्वशय्यागृहात् मुख्यभार्यागृहाद्वानिर्गत्य उभयतः स्थापिताऽलंकृतपूर्णकलशं सुपूजितसिद्धिविनायकं द्वारदेशं गत्वा पुरोहितादिनादत्तं पुष्पाञ्जलिमादाय 'अविरलमदजलनिवहं भ्रमरकुलानीकसेवितकपोलम्। अभिमत फलदातारं कामेशं गणपतिं वंदे। अभिप्सितार्थसिद्ध्यर्थंपूजितो यः सुराऽसुरैः। सर्वविघ्नच्छिदे तस्मै गणाधिपतये नम' इति सिद्धिविनायकाय पुष्पाञ्जलिं समर्प्य गणेशपूजाकर्त्रे दक्षिणान्दत्वा प्रथमंदक्षिणं पादमुद्धृत्य द्वात्रिंशत्पदानि गत्वा ससुवर्णतिलताम्र पात्रं ज्योतिर्विदे, विप्रभ्यो दक्षिणाञ्च दत्वा यानमारुह्य 'लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः। येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः।' अविरल म०—वन्दे। अभीप्सि०—तयेनमः। वैन्यं पृथं, हैं हय मर्जुनंच शाकुन्तलेयं भरतं नलं च। एतान्नृपान्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्च । धेनुर्वत्स प्रयुक्ता वृषगजतुरगा दक्षिणावर्तवह्निर्दिव्स्त्री पूर्ण कुम्भो द्विजनृपगणिका पुष्पमाला पताकाः । सद्योमांसं घृतं वा दधि मधु रजतं कञ्चनं शुभ्रधान्यं दृष्ट्वा स्मृत्वा पठित्वा फलमिह लभते मानवो गन्तुकामः । देवेन्द्रमौलिमन्दार मकरन्दकणारुणाः । विघ्नं हरन्तु हेरम्बरचरणाऽम्बुजरेणवः । सिद्धिविनायकायनमः निर्विघ्नमस्तु । गच्छगौतम शीघ्रं त्वं ग्रामे वा नगरे पि वा । आसनं भोजनं शय्यां शीघ्रं मे परिकल्पय । इत्यादिपठञ्छकुनानि विलोकयन्गच्छेत् ।

स्त्रिया आर्तवे शुद्धिपर्यंतं, नगच्छेत् तस्यां स्नातायां गच्छेत् ।

सुमुहूर्ते स्वयं गमनाऽसम्भवे [1]प्रस्थानं कार्यम् । ब्राह्मणो यज्ञोपवीतसहितं, क्षत्रिय आयुधसहितं, वैश्यो मधुसहितं, शूद्रोनारिकेलसहितं प्रियं परिधानीयवस्त्राऽलङ्कारयानादिवस्तु तस्मिञ्छुभे लग्ने प्रस्थापयेत् । स्वयं गमनाद्वस्तुस्थापनाख्यप्रस्थानेऽर्द्धफलं मिति धर्मसिन्धौ । पश्चात्स्वगमनसमये प्रस्थापित वस्तु आदायगच्छेत् ।

---

१ प्रस्थानं नामाऽभीष्टवस्तुनो वहिर्नयनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रस्थानेकृते राजा नवरात्रात् सामन्तः पड्रात्रात् ताभ्यामितरश्चतूरात्रादधिकमेकत्र न तिष्टेत् । अवस्थानाऽवधिदिनाऽतिक्रमेत पुर्नगृहं गत्वा लग्नान्तरे गच्छेत् । एतदालोक्य प्रस्थापितस्य तण्डुलयज्ञोपवीतादेश्चतूराजादधिकमेकत्रस्थाने नस्थापनं स्थानान्तरे नयनमिति सम्प्रदायः प्रचलित इति भाति ।

विजयादशम्यां चन्द्राद्याऽनुकूल्लाऽभावेऽपि विजयमूहूर्ते यात्रां कुर्यात् । विजयमुहूर्तस्तु 'ईषत्संध्यामतिक्रम्य किञ्चिदुद्भिन्नतारकाः । विजयो नाम कालोऽयं सर्वकामार्थसाधकः । एकादशो मुहूर्तोपि विजयः परिकीर्तितः । तस्मिन्सर्वैर्विधातव्या यात्रा विजय काङ्क्षिभिः रित्युक्तो द्विविधोपि विजयादशमीस्थ एव । उक्तद्वयान्यतरमुहूर्ते दशमीयुक्ते यात्रा कर्तव्या । एकादशीयुक्ते तु न भवति । रघुनन्दनीये ज्योतिस्तत्वे व्यासः 'लग्नशुद्धिर्यदा नास्ति प्राप्तकालोनिवर्तते । अविशेषेण वर्णानां तदा गोधूलिरिष्यते । तथा तिथ्यादिषु निषिद्धेषुचन्द्रताराविलोमतः । उषांगोधूलियोगं वा स्वीकृत्य गमनं भवेत् । प्राच्यामुषां प्रतीच्यां च गोधूलिं वर्जयेन्नृपः । तत्रैव सूर्यसिद्धान्ते अर्द्धास्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

मयात्सन्ध्या व्यक्तीभूता न तारका यावत्। तेजः परिहानिरुषा भानोरर्धोदयं यावत्' उषा सन्ध्या च नार्थान्तरं, संध्या गोधूलिश्च नाथान्तरम्।

संस्काररत्नमालायां कालप्रदीपे 'गव्यूतिहीने त्वर्थनैवनिर्गमान्मासे दिने वा नवमे पुनर्विशेत्' इति।

नामकरणविषये किञ्चिदुच्यते।

नामानि चत्वारि कर्तव्यानि। कुलदेवतासंबद्धं, नक्षत्राऽऽद्याक्षरसंबद्धं, मासदेवतासंबद्धं, व्यावहारिकं चेति पीयूषधारायां शङ्खेन 'कुलदेवतानक्षत्रादिमास संबद्धं नाम पिता वा कुर्यादन्योऽपिवा कुलवृद्ध' इत्युक्तेः। तत्रैव 'अत्रकेचित् जन्मानामतु गोपयेत्। इतिस्मरणान्नक्षत्रसंबन्धिनाम गुप्तं संस्थाप्य व्यवहारार्थमन्यन्नाम कुर्यादित्याहु' रित्युक्तेश्च। तत्र कुलदेवतासम्बद्धं देवीभक्तः, शिवभक्तः, विष्णुभक्तः इत्यादि। नक्षत्राद्यक्षरसम्बद्धन्तु जन्मनक्षत्रचरण लक्षितस्वरोदयाभिहित शतपदचक्रान्तर्गताऽक्षरादिकं चूडामणिः, चेदीशः चोलेशः इत्यादि। शतपदचक्रसारोद्धारो पियूषधारायां ज्योतिषार्के 'चू चे चो ला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

पदे ष्वाद्ये, ली लू ले ला यमस्यभे। आ ई उ ए इमेग्नेर्मै, ओ वा वी वू तथा कभे। वे वों का की, मृगेख्याताः। कू घ ङ छ स्तुरौद्रभे। के को हा ही त्यदिति, भे हू हे हो ढा च पुष्यमे। डी डू डे डो इमे साप, मा मी मू मे मघामिधे। मो टा टी टू तथाभाग्ये। टे टो पाप्यर्यमर्क्षके। पू ष णा ठा तथा हस्ते। पे पो रा रीति चित्रभे। रू रे रो रा तथा स्वातौ, ती तू ते तो द्विदैव भे। ना नी नू ने क्रमान्मैत्रे, नो या यी यू इतीन्द्रमे। ये यो भा भीतिमूलाख्ये, भू धा फा ढा जलस्य भे। भे भो जा जीतिविश्वर्क्षे, जू जे जो षा भिजिद्भवेत्। खी खू खे खा श्रुतौ, ज्ञे या, गा गी गू गे च वासवे। गो सा सी सू जलेशर्क्षे, से सो दा दीत्यजाङ्घ्रिमे। दू ञ रू था तथोयान्ते, दे दो चा चीतिपौष्णमे। इति प्रोक्ता इमे पद्ये वर्णानामादिजाः स्फुटाः। ज्ञेया मेषादिराशीनां नवभिर्नवभिः पदैः' इति।

जातस्य शिशोः किन्नदात्राऽक्षरादिकं नामकर्त्तव्यन्तत्परिज्ञानप्रकारो यथा जन्मसमये सूर्योदयाद्गतघटिकादिकंविज्ञाय तद्दिनपञ्चाङ्गपत्रलिखिताभोग्यघटयत्र। पूर्वनक्षत्रभोगाघटिकोत्तराभुक्तघटय तदुभययोगसम्पन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

तदिननक्षत्रभोगघटीसङ्ख्यं चतुर्धा विभज्य जन्मसमये तन्नक्षत्रस्य प्रथमोद्वितीयस्तृतीयश्चतुर्थोवा कतमश्चरणोस्ति इति परिज्ञाय नक्षत्रचरणाऽक्षरादिकं नाम कुर्यात् ।

मासदेवतानामानि पीयूषधारायां वशिष्ठेनोक्तानि 'चैत्रादिमासनामानि वैकुण्ठोऽथ जनार्दनः । उपेन्द्रो यज्ञपुरुषो वासुदेवस्त्रिविक्रमः । योगीशः पुण्डरीकाद्याः कृष्णोऽनन्तोऽच्युतस्तथा चक्रधारीति चैतानि क्रमादाहुर्मनीषिण ।' इति ततश्चमासदेवता संवद्धं, नाम चैत्रे जातस्य वैकुण्ठः, वैशाखे जातस्य जनार्दन इत्यादि ।

❀

विवाहविषये किञ्चिदुच्यते

कन्याकीदृशी विवाह्या ?

'अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् । अरोगिणीं भ्रातृमतीमसमानार्यगोत्रजाम्' इति याज्ञवल्क्याद्युक्ता विवाह्या मनोदत्ता, वाचादत्ता, अग्निपरिगता, सप्तमं पदं नीता, भुक्ता, गृहीतगर्भा, प्रसूता इति सप्तपुनरभ्वः । तद्भिन्ना अनन्यपूर्विका, कान्ता,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सुन्दरी, समानः एकः पिण्डः पिण्डदानक्रिया मूलपुरुषशरीरं वा यस्याः सा सपिण्डाः तद्भिन्ना ।

सापिण्डयविचारः ।

सापिण्ड्यं द्विविधम् । पिण्डदान क्रियायां दातृत्वोद्देश्यत्वाऽन्यतरसम्बन्धेनान्वयित्वेसति पितृकुल मातृकुलान्यतरोत्पन्नत्वं निर्वाप्यसापिण्ड्यम् । दातरि देवदत्ते तत्पित्रादिषुं षट्सु च लक्षणसमुन्वयः । पूर्वेषु सप्तमादिषु पुरुषेष्वऽतिव्याप्तिवारणाय सत्यन्तम् पिण्डभाक्षु त्रिषु पित्रादिषु लेपभाक्षुच त्रिषु चतुर्थपञ्चमषष्ठेष्वेवोद्देश्यता सत्वात् । सप्तमादिषु तद्विरहात् । 'सर्वाभावे तु नृपतिः कारयेत्तस्य रिक्थत' इति मार्कंडेयपुराणाद्धनहारिणोपि दातृत्वेन गयादौ मित्रादेरप्युद्देश्यत्वेन च धनहारिषु मित्रादिषुचाऽतिव्याप्तिवारणाय विशेष्यदलम् ।

साक्षात्परम्परयाऽऽधारत्वेन वा मूलपुरुषैकशरीरावयवान्वयोऽवयवसापिण्ड्यम् । साक्षादवयवान्वयः परम्परयाऽवयवान्वयः, साक्षादाधारत्वेन परम्परयाऽऽधारत्वेनेत्यर्थः । पुत्रे साक्षात्, पौत्रादिषु परम्परया । मूलपुरुषस्त्रियां साक्षादाधारत्वेन, तत्पुत्रादिस्त्रीषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

परम्परयाऽऽधारत्वेन, मूलपुरुषशरीराऽवयवस्य शुक्रस्याऽन्वयाल्लक्षणसंगतिः। एकशरीराऽवायवान्यवस्य सप्तमादिषु परःशतेष्वपि सत्वेपि 'पञ्चमात्सप्तमाद्ऊर्ध्वं मातृतः पितृतस्तथा' इति याज्ञकल्वयवचनेन पञ्चमपर्यन्तं सप्तमपर्यन्तमेव सापिण्ड्यं भवति। तत उद्ऊर्ध्वंतु निवर्तते इति नियमान्नातिप्रसङ्गः। तथा पितृसम्बन्धे मातृ सम्बन्धे सत्येव सापिण्ड्यं भवतीति नियमाच्च निर्वाप्यसापिण्ड्यलक्षणे विशेष्यदलं दत्तम्। येन लेपभाग्भ्यः पूर्वेषां सापिण्ड्यं नातिप्रसक्तम्। अवोचामच तथैव। अत्र कूटस्थमारभ्य गणनाकार्या तदुक्तम्। 'वध्वावरस्यवा तातः कूटस्थाद्यदिसप्तमः। पञ्चमीचेत्तयोर्माता तत्सापिण्ड्यं निवर्तते' इति। कूटत्थो मूलपुरुपः यतः सन्तानभेदः तथाच पितृ द्वारकसापिण्ड्यविचारे सप्तमादूद्ऊर्ध्वं सापिण्डयनिवृत्तिः। मातृद्वारकसापिण्ड्यविचारे तु पञ्चमादूद्ऊर्ध्वं तन्निवृत्तिरितिनिणयः। एकसन्ततिपङ्क्तौ सापिण्ड्यनिवृत्या न विवाहः। किन्तूभयसन्ततिपङ्क्तौ सापिण्ड्यनिवृत्या विवाहः।

❀

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

अत्रोदाहरणानिः ।

हरदत्तः

कमलादेवी	तीर्थकुमारी
श्रीकान्तः	नीलनाथः
टीकादत्तः	शिवनिधिः
शिवनाथः	भानुकान्त
विष्णुकान्तः	पद्मनाभ
सूर्यनाथः	श्यामलाल
कान्तिमञ्जरी	हरप्रसादः

अत्र कान्तिमञ्जरी हरप्रसादयोरष्टमयोर्विवाहः पितृद्वारकत्वात् ।

गौरीनाथः

गौरीनाथः	रामकान्तः
कीर्तिदत्तः	भवदत्तः
विश्वनाथः	रामनाथः
नेत्रकुमारी	महालक्ष्मी
तीथनाथः	कृष्णकुमारी

अत्र कृष्णकुमारी तीर्थनाथयोः षष्ठयोविवाहः मातृद्वारकत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

काशीनाथः

शिवदत्तः	टीकाप्रसादः
कान्तिनाथः	शिवशङ्करः
टीकाबल्लभः	बुद्धिनाथः
मायादेवी	शङ्करप्रिया
शम्भुनाथः	नेत्रप्रसादः
हेमकुमारी	विष्णुकान्तः

अत्र हेमकुमारी विष्णुकान्तयोर्नविवाहः मण्डूकप्लुत्या सापिण्ड्याऽनुवृत्तेः।

विष्णुहरिः

सोमनाथः	कमलाकान्तः
शम्भुप्रसादः	ईश्वरनाथः
स्तोत्रनाथः	विश्वनाथ
विष्णुकुमारी	हरदत्तः
मायादेवी	शिवप्रसादः

अत्र मायादेवी शिवप्रसादयोर्नविवाहः एकतो निवृत्तावपि अन्यतोऽनुवृत्तेः। इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

नाडीषट्काष्टकविचारः ।

अश्विन्याऽऽर्द्रा पुनर्वसूत्तराफाल्गुनी, हस्त, ज्येष्ठा, मूल, शततारका, पूर्वभाद्रपदा, प्रथमनाड़ी । भरणी, मृग, पुष्य, पूर्वाफाल्गुनी, चित्राऽनुराधा, पूर्वाषाढ़ा धनिष्ठोत्तराभाद्रपदा मध्यमनाड़ी । कृत्तिका रोहिण्यऽश्लेषा, मघा, स्वाति, विशाखोत्तराषाढ़ा, श्रवणरेवत्यः चरमनाड़ी ।

वरकन्यानक्षत्रयोरेकनाड़ीपातो वर्जनीयः । स्त्री पुंसराश्योः परस्परं षष्टाऽष्टमराशित्वे न विवाह । इदं धर्मसिन्धोरुद्धृतम् । अत्र परिहारो विशेषश्च ज्योतिर्विद्भ्यो ज्ञेयः । राश्यैकेचेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव । नाडी दोषो नो गणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात् ।'

रजोदर्शनविषयेकिञ्चिदुच्यते

यथा प्रथमं रजो भर्तृगृहेस्यान्नपित्रादि परगृहे तथा यत्नः कर्तव्यः । 'रतिव्रता पतिस्थाने,' 'पराऽऽगारे च दुशीला' इति मयूखे वशिष्ठोक्तेः । परगृहइत्यनेन पित्रादिगृहमपिगृह्यते' इति मयूखोक्तेः । 'पि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

तृपरसदनेनसदिति' निर्णयसिन्धौ ज्योतिर्निबन्धे वशिष्ठोक्तेश्च ।

प्रथमतौ अक्षतैरासनं कृत्वा तत्र तामुपवेश्य पतिपुत्रवत्यः स्त्रियो हरिद्राकुंकुमगन्धपुष्पस्रक्ताम्बूलादि तस्यै दत्वा दीपैर्नीराज्य सदीपाऽलंकृते गृहे तां वासयेयुः । तत्परिजनश्च सुवासिनीभ्यो गन्धादिकं लवणमुद्गादीनि च दद्यात् ।

सर्वर्तुसाधारणानियमाः ।

त्रिरात्रमस्पृस्या भूत्वाऽऽञ्जनाऽभ्यङ्ग दिवास्वाप स्नानाऽग्निस्पर्श दन्तधावन गोरसमधुमांसाऽशन सूर्यचन्द्रतारावलोकन भूमिरेखाकरण प्रवासकङ्कन गन्धपुष्पमाल्यालङ्कार ताम्बूल पीठाधिरोहण रज्जुसर्जन खट्वाशयनानि वर्जयेत् एवं त्रिदिनं स्थित्वा चतुर्थेऽहनि षष्टिवारं मृत्तिकाशौचेन मलं प्रक्षाल्य दन्तधावनपूर्वकं सङ्गवकाले स्नायात् । सूर्योदयात्प्राक् स्नानन्तु अनाचारः । रजस्वला ज्वरादिभिरातुरा स्नातुमशक्ता चेदन्या सवर्णा [1]रजस्वला स्पृष्ट्वा सचैलं स्नात्वाऽऽचा-

---

१ नेपालदेशीयास्तुब्राह्मणक्षत्रियादयः प्रथमपुष्पवत्यैं दिनत्रयं लवणरहितं भक्ष्यमेव ददति न भोजनम् । चतुर्थदिने सशिरकं स्नानम् । तद्दिनादारभ्य प्रातर्भोजनं सलवणव्यञ्जनसहितं सायं भक्ष्यम् । अष्टमेऽपि सशिरक स्नानम् । द्वादशे दिने सशिरस्नानोत्तरं प्रियेण सह सम्पूजितं भास्करं दर्शयन्ति । द्वादशदिनमारभ्य सायमपि भोजनम् । पञ्चदशे विशेद्वाविशे वादिने तत्संस्पृष्टं जलं ग्रह्णन्ति, सर्वस्मिन्कर्मणि शुद्धां मन्यन्ते । अत्राऽऽचारमन्तरेण मया प्रमाणं नोपलब्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

मेत् । एवं दश कृत्वः स्पृष्ट्वा स्नात्वाऽऽचामेत् । आतुरा शुद्धंवस्त्रान्तरे धृत्वा शुद्धा भवति अन्यापि स्नात्वा शुद्धा । चतुर्थेऽहनि रजोनिवृत्तौ भर्तृशुश्रूषणादौ शुद्धिः पंचमेऽहनि दैवपित्र्यकर्मणि शुद्धिः । कानिचिद्दिनानि रजोयद्यनुवर्तेत तदा तन्निवृत्तिपर्यन्तं दैवपित्र्ययोर्नशुद्धिः ।

प्रथममम्बुव्यतीपाताद्यशुभदिने रजोदर्शने तस्याः शुद्धौ शान्तिं कुर्यात् ।

रात्रौ रजसि जननादौ रात्रिं त्रिभागां कृत्वा आद्यभागद्वयेचेत्पूर्वं दिनं, परतस्तूत्तरमिति मिताक्षरायाम् । यत्तु प्रागर्धरात्रात्प्राग् वा सूर्योदयात्पूर्वं दिनमित्युक्तं तत्रदेशाऽऽचाराद्यवस्थेति निर्णयसिन्धौ ।

यस्या विंशतिदिनोत्तरं प्रायशो रजस्तस्याः सप्तदशदिनपर्यन्तं पुना रजादृष्टौ स्नानमात्रं, अष्टादशे एकरात्रं ऊनविंशेद्वयहः, विंशतिप्रभृति त्रिरात्रम् । त्रयोदशदिनादूर्ध्वं प्रायो रजोवतीनामेकादशदिनात्प्रागशुचित्वं नास्ति । एकादशे दिने एक रात्रं, द्वादशे द्विरात्रं, ऊर्द्धं त्रिरात्रमितिसिन्धुः ।

रोगजे तु रजसि विशेषः । संग्रहे 'रोगेण यद्रजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

स्त्रीणामन्वह हि प्रवर्तते । नाऽशुचिस्तु भवेतेन यस्मा-द्वैकारिकं मतम्' । दैवपित्र्यकर्माऽधिकारस्तु रजोनि-वृत्तावेव । 'साध्वाचारानतावत्स्यान्स्नातापिस्त्री रजस्व-ला । यावत्प्रवर्तमानंहि रजोनैव निवर्तते' इति श्राद्ध-हेमाद्रौ शङ्खोक्तेः । तत्रापि स्वकालेत्वऽशुचिरेवेत्याह ऋष्यशृङ्गः । 'रोगजे वर्तमानेऽपि काले निर्याति कालिकम् । तस्मात्कालेऽप्रमत्तस्या दन्यथा सङ्करो भवेत्' इति सिन्धुः ।

रजस्वला कामतो ऽकामतो वोत्तमवर्णां सवर्णामपि जनन्यादिमपि हीनवर्णां तु काकथा सर्वथा नस्पृशेत् । चण्डाल श्वशूकरादिस्पर्शोऽपि परिहार्यः । पृस्शेच्च-त्प्रायश्चित्तमाचरेत् । स्पर्शविशेषे प्रायश्चित्त विशेषस्तु सिन्ध्वादिभ्यो ज्ञेयः ।

बुद्धिपूर्वमबुद्धिपूर्ववा रजस्वलास्पर्शे स्नानम् । बुद्धिपूर्वकं रजस्वलास्पर्शे तत्पर्शिस्पर्शे च स्नानम् । चतुर्थः आचामेत् । पञ्चमादिः प्रोक्षयेत् । अबुद्धिपूर्वके साक्षात्स्पर्शे दण्डाद्यऽचेतनान्तरिते च स्पर्शे तृतीयस्या-ऽऽचमनम् । वस्त्रान्तरिते स्पर्शे तु प्रचेतसा 'वस्त्रान्त-रितसंस्पर्शः साक्षात्स्पर्शोऽभिधीयते । साक्षात्पर्शेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

यत्प्रोक्तं तद्वस्त्रान्तरितेपि च' इत्पुक्तम्। स्नानोत्तरं 'यज्ञोपवीतं परिवतयेत्। रजस्वलायाः शयनप्रावरणाऽन्तरीय जलपात्रादिस्पर्शेतु आचमनंप्रोक्षण वा स्पृश्यतारतम्येन।

'मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शनेचैव नस्नायादुष्णवारिणां॥ नैमित्तिकत्वेन रात्रौस्नाननिषेधो नास्ति। 'प्रदोषपश्चिमेयामे दिनवत्स्नानमाचरेत्। मध्यमयोर्यामयोस्तु वन्हिं पश्यन्घृतसुवर्णाऽङ्गुलीयो वा स्नांयात्' इति।

रजस्वलास्पृष्टं कामतो भुक्त्वा कृच्छ्रं, अकामतोऽधकृच्छ्रं,।

ग्रहण विषये किञ्चिदुच्यते

सूर्यग्रहणं नाम सूर्यविम्बे चन्द्रविम्बस्य छाया पातेन तेजः पिधानम्। चन्द्रग्रहणन्तु चन्द्रबिम्बे भूमण्डलस्य छायापातेन कौमुदीपिधानम् तां छायां राहुनाम्ना, पिधानं ग्रहणनाम्ना व्यहरन्ति। एतच्च ज्योतिःशास्त्रे प्रसिद्धम्।

---

१ अत्र आचारमन्तरेण प्रमाणं मया नोपलब्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

सूर्यग्रहणे स्पर्शयामात्प्राक्तनेषु चतुर्षु यामेषु भोजनं न कुर्यात्। चन्द्रग्रहणेतु ग्रहणयामात्पूर्वेषु त्रिषु यामेषु न भुञ्जीत। बालानां वृद्धानां रोगिणां च भोजने दोषो नास्ति। बालादिभिरपि 'अपराण्हे ग्रहणे मध्यान्हे भोजनं न कर्तव्यम्। मध्यान्हे ग्रहणे सङ्गवे भोजनं न कर्तव्यं। सङ्गवे ग्रहणे प्रातर्भोजनं न कर्तव्यम्।

चन्द्रस्य ग्रस्तोदये पूर्वंतद्दिनंभुञ्जीत। सूर्यस्य ग्रस्तोदये पूर्वसर्वारात्रिंनभुञ्जीत। चन्द्रस्य ग्रस्ता ऽस्तत्वे पुनरुदितं निर्मलं चन्द्रं दृष्टवा स्नात्वा भुञ्जीत। सूर्यस्य ग्रस्ताऽस्तत्वे पुनरुदितं निर्मलं सूर्यं दृष्ट्वा भुञ्जीत। मेघाऽऽच्छादनेन निर्मलस्य चन्द्रस्य सूर्यस्य वा दर्शनाऽभावेप्युदितं ज्ञात्वा भुञ्जीत। ननु मेघाऽऽच्छादनेन ग्रहणस्याऽदर्शनेपि गणित प्रमाण्येन ज्ञात्वा स्नानदानाद्यनुष्ठेयमुत 'स्नानं दानं ततः श्राद्धमनन्तं राहुदर्शने। चन्द्रसूर्योपरागे तु यावद्दर्शनगोचर' इत्यादिवचनेषु दृशि प्रयोच्चाक्षुषज्ञानाऽभावे सति नानुष्ठेयम्। अनुष्ठेयमिति ब्रूमः। सकलमु-

(१) पंचधा विभक्तस्य दिनस्य क्रमेण प्रथमादयो भागाः प्रातः संगवो मध्यान्होऽपरान्हः सायान्ह इत्युच्यन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

निबचननिचयपर्मालोचनया ग्रहणज्ञानस्यैव निमित्तत्वनिश्चयात् । तदनुसारेण क्वचिच्छ्रूयमाणस्य दृशिपदस्य ज्ञानसामान्ये लक्षणाङ्गीकारात् । अतएवाऽन्धानामपि स्नान दानादि न विरुध्यते । 'रजसोदर्शने नारी त्रिरात्रमशुचिर्भवेत्' इत्यादावपि एषैवगतिः । अन्यथाऽन्धानांस्त्रीणामाशौचाभावः प्रसज्येत । तस्माज्ज्ञानमेव निमित्तं नतु चाक्षुषज्ञानम् । तेन मेघाच्छादनेऽन्धादेश्च स्नानादि भवेत्येव ।

स्पर्शमारभ्य मोक्षपर्यन्तो ग्रहणकालः । धर्मसिन्धौ । 'तत्रस्नानममन्त्रकम् । सुवासिनिभिः स्त्रीभिसशिरस्कंस्नानं कार्यम् । जाताऽऽशौचे मृता शौचे च ग्रहणनिमित्तकंस्नानदानश्राद्धादिकं कार्यमेव । ग्रहणे देवपितृतर्पणं कार्यमिति केचित् । अत्र गोभूहिरण्यधान्यादिदानंमहाफलम् । दाने पात्रऽपात्रविचारः सतिसम्भवे कर्तव्यः ।

सूर्यग्रहणे मन्त्रोपदेशो ग्रहीतव्यः, चन्द्रग्रहणे तु दारिद्र्यादिदोषः । चन्द्रसूर्यग्रहेतीर्थे सिद्धक्षेत्रे शिवालये । मंत्रमात्रप्रकथनमुपदेशः सउच्यते । अत्र मन्त्रग्रहणे लग्नविचारो नावश्यकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

ग्रहणपुरश्चरणेतिकर्तव्यता । स्पर्शकालात्पूर्वं स्नात्वा अमुमगोत्रोऽमुकशर्माहं राहुग्रस्ते दिवाकरे निशाकरे वा अमुकदेवताया अमुकमंत्रसिद्धिकामो ग्रासादिमुक्तिपर्यन्तममुकमंत्रस्य जपरूपं पुरश्चरणं करिष्ये इति सङ्कल्प्याऽऽसनबन्धन्यासादिकं च स्पर्शात्पूर्वमेव विधाय स्पर्शादिमोक्षपर्यन्तं मूलमन्त्रजपं कुर्यात् । ततः परदिने स्नानादिनित्यकृत्यंविधाय अमुकमंत्रस्य कृतैतद्ग्रहणकालिकामुक संख्याकपुरश्चरणजपसांगतासिद्ध्यर्थं तद्दशांशहोमं तद्दशांशतर्पण तद्दशांशमार्जन तद्दशांशब्राह्मण भोजनानि करिष्यये इति सङ्कल्प्य होमादिकं तत्तच्चतुर्गुणद्विगुणाऽन्यतरजपं वा कुर्यात् ।

ग्रहणकाले च तत्प्रेरितः पुत्रादि रमुकशर्मणोऽमुकगोत्रस्याऽमुकग्रहणस्पर्शस्नानजनितश्रेयः प्राप्त्यर्थं स्पर्शस्नानं करिष्ये इत्यादि सङ्कल्पपूर्वकं तदीयस्नानदानादिकं कुर्यात् । पुरश्चरणमकुर्वद्भिरपि गुरुपदिष्टः स्वस्वेष्टदेवतामंत्रजपो गायत्रीजपश्चाऽवश्यं ग्रहणे कार्योऽन्यथा मन्त्रमालिन्यं ।

ग्रहणकाले शयनेकृते रोगः, मूत्रेदारिद्र्यं, पुरीषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

कृमिः, मैथुने ग्रामसूकरः, अभ्यंगे कुष्ठी, भोजने नरकः।

पूर्वपक्वमन्नं ग्रहणोत्तरं त्याज्यम्। एवं ग्रहणकालस्थितजलपाने पादकृच्छ्राभिधानाज्जलमपि त्याज्यम्। काञ्जितं तक्रं घृततैलपाचितमन्नं क्षीरं च पूर्वसिद्धं ग्रहणोत्तरं ग्राह्यम्। घृते सन्धिते गोरसेषु ग्रहणकाले कुशप्रक्षेपं कुर्यात्। ग्रहणदिने पित्रादेर्वार्षिकश्राद्धप्राप्तौ सतिसम्भवेऽन्नेन कार्यम्। ब्राह्मणाद्यऽलाभेनाऽसम्भवेतु आमेन हेम्ना वा कार्यम्। स्वजन्मराशेस्तृतीय षष्ठैकादश दशम राशिस्थितं ग्रहणंशुभप्रदं, द्वितीयसप्तमनवम पञ्चमस्थानेषु मध्यमम्। जन्मचतुर्थाऽष्टमद्वादशराशिस्थितमनिष्टप्रदम्। यस्य जन्मराशौ जन्मनक्षत्रे वा ग्रहणं तस्य विशेषतोऽनिष्टप्रदं। तेन गर्गाद्युक्ता शान्तिः कार्या, अथवा बिम्बदानं कार्यम्। तद्यथा चन्द्रग्रहे रजतमयं चन्द्रबिंबं सुवर्णमयीं नागप्रतिमां कृत्वा सूर्यग्रहे सौवर्णं सूर्यबिंबं नागप्रतिमां च कृत्वा घृतपूर्णे ताम्रपात्रे कांस्यपात्रे वा निधाय तिलवस्त्रदक्षिणासाहिप्यं सम्पाद्य। ममजन्मराशि जन्मनक्षत्रस्थिताऽमुकग्रहणसूचितसर्वाऽनिष्टप्रशान्तिपूर्वकं एकादशस्थान स्थितग्रहणसूचितशुभफलाऽवाप्तये बिंबदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

करिष्ये इतिसङ्कल्प्य । सूर्यं चन्द्रं वा राहुं च ध्यात्वा नमस्कृत्य 'तमोमय महाभीम सोमसूर्यविमर्दन । हेमनाग प्रदानेन मम शान्तिप्रदो भव । विधुन्तुद नमस्तुभ्य सिंहिकानन्दनाऽच्युत । दानेनानेन नागस्य रक्षमां वेधजाद्भयात्' इति मन्त्रमुच्चार्य इदं सौवर्णराहु बिंबं सौवर्णरविबिबं, राजतं [1]चन्द्रबिंबं सुवर्णमयीराहुप्रतिमां वा घृतपूर्णकांस्यपात्रनिहितं यथाशक्ति तिलवस्त्रदक्षिणासहितं ग्रहणसूचिताऽरिष्टविनाशपूर्वकं शुभफलप्राप्त्यर्थं तुभ्यमहं सम्प्रददे इति दानवाक्येन पूजितब्राह्मणाय [2] दद्यात् । एवं चतुर्थाद्यनिष्टस्थानेष्वपि दानं कार्यमिति भाति । यस्य जन्मराश्यादौ ग्रहणं तेन राहुग्रस्तरवीन्दुबिंबं नाऽवलोकनीयम् । इतरजनैरपि पटजलादि व्यवधानेनैव ग्रस्तबिंबं द्रष्टव्यंन साक्षात् ।

देवविशेषेणवर्तितन्तुविशेषः

शुद्धस्य कार्पासस्य तन्तूंस्तिस्टष्वङ्गुलिषु यथा स्वतर्जनीसमदीर्घा भवति तथा सार्द्धवारमावेष्टयेत् । एवं त्रिसूत्रावर्तिर्भवति । सा सर्वेषु देवेषु अर्पणीया । तदुक्तं

---

१ बिम्बं प्रतिमाम् ।

२ पूर्वसङ्कल्पितस्य द्रव्यस्य ग्रहणोत्तरंदाने तद्द्विगुणं देयं भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

व्रतराजे बिल्ववर्तिव्रतविधौ जैमिनीये आरण्यके। 'कार्पासस्य स्वहस्तेन तन्तुंनिष्कास्य यत्नतः। स्वकीयैर्वाऽपि विप्राद्यै रंगुलित्रयसंमिता। त्रिवृता शोभनाचैव बिल्ववर्तिरुदाहृता। तान्तुसम्वर्तयेद्वर्तिंस्वप्रदेशिनिसंमिताम्' इति।

शिवेत्वेकादशसूत्रा वर्तिर्विहिता। तत्रैव रुद्रवर्तिव्रतविधौ भविष्यपुराणे। 'कार्पासतन्तुभिः कार्या रुद्रवर्ती शिवप्रिया। स्वहस्तेन कर्तव्यं सूत्रं श्वेतं दृढंशुभम्। एकादशैस्तन्तुभिश्च कारयेद् रुद्रवर्तिका' इति।

विष्णौ तु पञ्चसूत्रा चतुरंगुलदीर्घावर्तिर्विहिता। तत्रैव विष्णुवर्तिव्रते विष्णुरहस्ये 'सम्यग्विशोध्य कार्पासं तृणधूलिविवर्जितम्। तस्य सूत्रं विधायाऽऽशु चतुरंगुलिका कृता। पञ्चसूत्रयुतावर्तिर्विष्णुवर्तीति कथ्यते' इति। शक्तौ नवसूत्रां, सूर्ये द्वादशसूत्रां कुर्वन्ति।

अञ्जनस्नेहविशेषेण फलविशेषः

तत्रैव लक्षदीपदानविधौ स्कन्दपुराणे। 'घृतेन ये प्रकुर्वन्ति तेषां पुण्यं वदामिते। यावत्कालं प्रज्वलन्ति दीपास्तस्य शिवाग्रतः। तावद्युगसहस्राणि स्वर्लोके च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

महीयते। कौसुम्भेन च तैलेन दीपान्दद्याच्छिवालये। तेन पुण्येन कैलासे वसते शिवसन्निधौ। अतसीतैल-संयुक्तान्दीपान्दद्याच्छिवालये। ज्ञानिनो हि भविष्यन्ति दीपदानप्रभावतः। तिल तैलेन यो दीपान्ददते च शिवालये। तेजस्विनो महाभागाः कुलेन च शतेन वै। ते प्राप्नुवन्ति सायुज्यं नात्रकार्या विचारणा' इति।

पुष्पाद्यर्पणे विधिनिषेधौ

देवविशेषेण पुष्पविशेषेषु विधिनिषेधाः सन्ति। ते तुष्पाध्यायपर्यालोचनया ज्ञातव्याः। केशकीटदूषित, भूमिपतित, शुष्क, उग्रगन्ध, पर्युषित, याचित हस्तभिन्नाऽङ्गलग्न, छिन्नभिन्नानि वर्ज्यानि। विल्व पत्रादि तु छिन्नभिन्नं न दुष्यति। विल्वस्य खदिरस्यैव तथा धात्रीदलस्य च। तमालस्य च पद्मस्य छिन्नभिन्नं न दुष्यति' इति तन्त्रसारोक्तेः।

इदन्त्वऽवधेयम्। 'नाक्षतैरर्चयेद्विष्णुं न तुलस्या विनायकम्। नदूर्वया यजेद्दुर्गां विल्यपत्रैर्दिवाकरम्। उन्मत्तमर्कपुष्पञ्च विष्णौ वर्ज्यं सदा बुधैः इत्यादि। पदार्थादर्शे ज्ञानमालाद्युक्तं विशिष्य निषिद्धं तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

सर्वथा वर्जनीयम्। अधोमुखत्वेनाऽर्पणमपि निषिद्धम्। 'पुष्पं वा यदि वा पत्रं फलं नेष्टमधो मुखम्। दुःखदं तत्समाख्यातं यथोत्पन्नं तथाऽर्पणम्, इति। विचित्रपूजायां पुष्पाञ्जलौ च निषिद्धानामप्यर्पणे न दोषः। 'चित्रपूजासु सर्वासु ननिषिद्धस्य दूषणम्। अधोमुखाऽर्पणंनेष्टं पुष्पाञ्जलिविधौनतत्। इति पदार्थादर्शोक्तेः। केषुचित्पर्युषितेषु दोषाऽभाव उक्तः। पदार्थादर्शे ज्ञानमालायाम्। 'नपर्युषितदोषोऽस्ति जलजोत्पलचम्पके। तुलस्यऽगस्तिवकुले विल्वे गङ्गाजले तथा' इति। तुलस्या निर्माल्यदोषोपि नास्तीत्युक्तं तत्रैव सद्यः पर्युषितावापि निर्माल्यान्नैव दुष्यति। तथाऽन्यैर्नहरेस्तुष्टिस्तुलस्यास्तुष्यतेयथा' इति। तन्त्रसारेराघवभट्टः। सर्वपुष्पैः सदा पूजाविहिता विहितैरपि। कर्तव्या सर्वदेवानां भक्तियोगोऽत्रकारणम्। तथा तन्त्रसारे। देवीपूजा सदा कार्या जलजैस्थलजैरपि। विहितैरविहितैर्वापि भक्ति युक्तेन चेतसा। इदन्तु विहिताभावेऽत्यन्त भक्तंपरम्' इत्युक्तं। तत्रैव नाक्षतैरर्चयेद्विष्णुं, इति पुष्पाऽभावेऽतिदेशप्राप्तस्य तण्डुलस्य निषेधपरम्। तथा पुष्पाऽभावे जलेनापि दूर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

यातण्डुलेन च। नित्यपूजाप्रकर्तव्या भक्तिभावेन सुन्दरि। नत्वर्घ्यादिनिषेधपरम्। तथाच गन्धपुष्पाऽक्षतयवकुशाग्रतिलसर्षपैः। सदूर्वैः सर्वदेवानामेतदर्घ-मुदीरितम्। एवं नदूर्वया पावंतीमित्यपि' इत्युक्तम्।

अंगस्फुरणे फलम्

—:०:—

वसन्तराजीये।

पुंसां दक्षिणे स्त्रीणांवामे फलं, विपर्ययेविपर्ययः।

अधरोष्ठे	मिष्टान्नलाभः	दृष्टिमध्ये	अर्थसम्यत्
अण्डे	पुत्रलाभ.	दृष्टचादौ	प्रीतिः
ओष्ठे	प्रियसमागमः	दृष्टचधरे	सङ्ग्रामजयः
उरसि	जयः	दृक्कोणयोः	लक्ष्मीः
उर्वग्रे	सहायलाभः	नाभौ	स्थानच्युतिः
ऊरुपृष्ठे	दोषः	नाभिरन्ध्रे	धनबृद्धिः
कर्णे	प्रियवार्ताश्रवणम्	नासिकायां नासिका	गन्धजंसुखम्
कपोले	स्त्रीलाभः	ऽक्षिमध्ये	सखिलाभः
कटचां	वलहर्षौ	पृष्ठे	हानिः
गले	लाभ	पार्श्वयोः	हर्षः
ग्रीवायां	शत्रुभयः	पायौ	वाहनाऽवाप्ति
चरणतले	लाभदायात्रा	बाहौ	इष्टसभागमः
चरणोपरि	स्थानलाभः	भाले	स्थानसिद्धिः
जंघायां	हानिः	भ्रूमध्ये	प्रियसङ्गम
जनुनि	शत्रुणांसंधि,	मुखे	मधुरभोजनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

वस्तौ	युवतिप्रबृत्तिः	हनौ	भयम्
शिरसि	पृथ्वीलाभः	हस्ते	धनलाभः
स्कन्धे	भोगबृद्धिः	हृदये	धनजन्यं
स्फिचि	वाहनावाप्तिः		सुखम्
स्तने	धनलाभः		

मषक तिलक पिटक व्रणविन्हानामपि स्फुरणवत्फलानि ।

'कण्डूतिर्दक्षिणे पाणौ नृपाणां जयदा स्मृता । अन्येषां लाभदा पादतले गमनकारिणी' इति ॥

पल्लीपतने फलम्

विधानपारिजाते गर्गसंहितायां, शान्तिसारधृतायां वशिष्ठसंहितायां नारदसंहितायाञ्च ।

अंसे	तेजोबृद्धिः (वशिष्टसं०)
उदरे (द० भा०)	पुत्रप्रप्तिः (नारदसं०)
,, (वा० भा०)	महानरोगः (,,)
ऊर्वोः	वाहनम् (वशि० & गर्गसं०)
कण्ठे	प्रियप्राप्तिः (गर्गसं०) / स्त्रीलाभः (वशिसं०)
कट्यां	वस्त्रप्राप्तिः (गर्गसं०)
कटौ (द० भागे)	महद्यशः (ना० सं०)
,, (वा० भा०)	निधनम् (,,)
करे	द्रव्यव्ययः (गर्ग सं०)
करद्वये	अर्थबृद्धिः (वशि० सं०)

Nepal Sanskrit University, Balmeeki Campus, Kathmand

-0. In Public Domain. Digitization by eGangotri.Funding: M

कर्णे	भूषणं (व० सं०)
कुक्षौ	सुपुत्रलाभः (गर्ग & ब० सं०)
कुक्षौ दक्षे	धनलाभः (नार० सं०)
,, वामे	निधनम् (,,)
गुदे	मृत्युः (गर्ग सं०)
गुह्यस्थाने	मसागमः (ब० सं०)
जघने	शुभम् (ग० सं०)
जङ्घयोः	निरुद्योगः (गर्ग सं०) गमनम् (वशि० सं०)
जानुनोः	अर्थसंग्रहः (गर्ग सं०) वाहनं (वशि० सं०)
जानुनि (दक्षे)	महद्यशः (ना० सं)
,, (वामे)	निधनम् (,,)
वासिकायाम्	सौभाग्यं (गर्ग स०) सुगन्धलाभः (व० सं०)
नाभौ	कीर्तिबृद्धिः (वशि० सं०)
नेत्रयोः	मित्रलाभः (व० सं०) भयदर्शनम् (गर्ग सं०)
पार्श्वयोः	बन्धुदर्शनम् (गर्ग सं०) सुहृदागम् (व० सं०)
पादे (दक्षे)	शुभम् (ना० सं०)
,, वामे	गमनम् (,,)
पादयोः	भ्रमणं (ग० सं०) गमनं (व० सं०)
पृष्ठे	अर्थलाभः (वशि०)
बाह्वो	धनलाभः (गर्ग०)
भाले	भूषणं (वशि०) ऐश्वर्यबृद्धिः (नारः)
भुजे (दक्षे)	जयः (नारः)
,, (वामे)	महद्भयम् (,,)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: M

बक्त्रे	मिष्ठान्नभोजनम् (गर्ग०) सुभोजनम् (वशि०)
वक्षस्थले	सौभाग्यं (वशि०)
शिरसि	राज्यं (वशि० गर्ग० नार०)
स्कन्धयोः	विजयः (गर्ग, वशि०)
स्तनयुग्मे	सौभाग्यम् (गर्ग०)
हृदि	सौख्यबृद्धिः (गर्ग०) प्रीतिबृद्धिः (वशि०)
हस्ते (दक्षे)	मित्रलाभः (नार०)
हस्ते (वामे)	निःस्वता (,,)

पादतश्चोद्ध्वंगमनं कुर्यादामस्तकाद्यदि। गात्रे प्रदक्षिणेचापि राज्यलाभो भवेत्तदा। मस्तकात्पाद-पर्यन्तं यदि गच्छेदधोपि वा। भवेयुश्च तदा तस्य कुटुम्ब कलहामया इति शान्तिसारे वशिष्टसंहितायाम्। पुंसां दक्षिणाऽङ्गे शुभं, वामाङ्गेष्वऽशुभम्। स्त्रीणां वामाङ्गे शुभं, दक्षिणाङ्गेष्वऽशुभम्। तत्रशान्तिः। स्पर्शसमनन्तरं स्नानम्। वहिर्गत्वा प्रातर्विष्णोः सायं शिवस्य यथाशक्तिप्रदक्षिणं कृत्वा सम्पूज्य षोडशभिर्दीपै र्नीराज्य गृहमागत्य यथाशक्ति ब्राह्मणभोजनम्। सरटप्ररोहणेप्येवम्। इतिविधानपारिजाते गर्गसंहितायाम्। सरटप्ररोहणे इतराङ्गस्पर्शमन्तरेण तत्तत्स्थानेष्वाऽऽरोहाऽसम्भवात्सर्वेष्वङ्गेष्व-

Nepal Sanskrit University, Balmeeki Campus, Kathma

-0. In Public Domain. Digitization by eGangotri.Funding: M

ऽशुभम्। पल्लीपतनेऽपि शुभस्थाने शुभाऽधिक्याया-ऽशुभस्थाने दोषशान्तये शुभाऽशुभयोरुभयत्रशान्ति रिति नारदमतम्।

तत्रशान्तिः। सुवर्णेन पल्लीस्वरूपं मृत्युञ्जयप्र-तिमां च विधाय अग्निप्रतिष्ठान्ते मृत्युञ्जयं मृत्युञ्जय-मन्त्रेण पल्लीप्रतिमां च सम्पूज्य, तिलपायसाभ्यां प्रत्येकमष्टोत्तरशतं हुत्वा गणेशक्षेत्रपालसूर्यदुर्गा पृथि-वीनां जपं कृत्वा कर्मशेषं समाप्याऽऽज्यावलोकनं प्रति-मादानं च कृत्वा वारुणैःसूक्तै राचार्येणाऽभिषिक्तो यजमानो यथाशक्ति ब्राह्मणान्भोजयेदिति।

अमानशङ्काविरहादकम्पं सङ्कल्परत्नावलिमाद्रि-यध्वम्। विद्येत चेत्पुस्तकमेतदीयं पुरोधसां कृत्यवि-धौ कुतो भीः। इति कौण्डिन्यमुनिकुलोत्पन्नेन हरि-नाथशर्मणा सङ्कलितायां सङ्कल्परत्नावल्यां विविधविषय प्रकरणम्।

सङ्कल्परत्नावलीसमाप्ता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

Nepal Sanskrit University, Balmeeki Campus, K

-0. In Public Domain. Digitization by eGangotri.Funding: M

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

-0. In Public Domain. Digitization by eGangotri.Funding: MI

Nepal Sanskrit University, Balmeeki Campus, K

-0. In Public Domain. Digitization by eGangotri.Funding: M

शांत वाचकी
शंकराचार्य

६६०००० × ५४

२८०००० ३००००० ३२,८०००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu